and implores the fire god to enlighten him with all knowledge. In the second song it is Ganesha who has been praised in twenty eight verses composed again in *bhayahārī* metre. The Muni sings the glories of Lord Ganesha and prays the lord to give him strength so then he can work for the well-being of his country. In the next song Indra has been extolled in forty two verses composed in *tanumadhyā* metre. Here the Muni urges Indra to bestow him with divine prowess so then he can do something beautiful in this world. In *vāyugītam* there are twenty stanzas in *tanumadhyā* metre. Here Vayu, the wind god has been described as the life-force of the entire universe, as the one of illimitable splendour, as the one of indescribable glories. Next fifteen verses in *pādākulaka* metre are put under the title *sūryagītam* where the Muni sings the glories of Surya, the sun god, who shines brilliantly in the three worlds. The sixth song, entitled *daśāvatāragītam*, has ten verses in *tūṇaka* metre. Here, in each verse the Muni intones the magnificence of each of the ten incarnations of Lord Vishnu. *Ambikāgītam* has seventeen verses in *pādākulaka* metre uttering the grandeur of goddess Ambika. She is portrayed here as the one who can fulfill all the desires of her devotee, and can annihilate all his sins by her grace. In the next song, entitled as *reṇukāgītam*, the Muni eulogizes goddess Renuka in twenty eight *ardha-pādākulaka* metre. In this song any sensitive reader can experience the utmost simplicity of the language used by the Muni. The ninth song *gurugītam* has seventeen verses in *madalekhā* metre where the Muni lauds his guru, Bhagavan Ramana Maharshi. He depicts him as the one who shines eternally in his heart. The last song, *yogasāragītam*, has twenty verses in a metre called *girā* where the essence of Yoga has been beautifully depicted. The Muni declares that in this song he has churned out the essence from the many words of experienced Yogis and put it in the form of a song. This marks the end of *gītamālā*.

Śivagītam has twenty five verses in a metre called *mukula*. Here Lord shiva has been praised to the skies as the refuge of all. This being titled as *śivagītam* we have put it right at the end of the *gītamālā*. Many a stanzas from *śivastavarāja* are repeated here.

Ramaṇagītam, the last *stotra* in this volume, is composed in a lyrical style which can be sung beautifully. This is an elegant piece of composition where the Muni summons the mankind to croon the majestic glories of Bhagavan Ramana Maharshi.

A Note on
śrīramaṇacatvāriṁśat

This article was published in the December 2000 issue of the Mountain Path published by the Ramanasramam, Tiruvannamalai. Since this volume contains Sri Ramanachatvarimshat, I found it useful to put it here as an additional note.

The contact between Bhagavan Sri Ramana Maharshi and his famous *chela,* seer-poet Kavyakantha Ganapati Muni on 18.11.1907 was historic. It has been described in detail by B.V. Narasimha Swami and other writers. On that memorable afternoon of 18th November, in the Virupaksha Cave, Kavyakantha wrote five verses in Sanskrit lauding Maharshi, proclaiming him Ramana and gave the paper containing the verses to the attendant Palaniswamy. As bad luck would have it, these verses have been lost to posterity forever.

The Muni had the conviction from his earliest years that he was a partial incarnation of Lord Ganesa and so he could easily spot out his younger brother Lord Subrahmanya, whatever might be the disguise in which he might appear! An event of great significance took place at Pachaiamman temple at the foot of the hill during Maharshi's stay there along with Muni and other disciples for about three months from January to March 1908.

One early morning Muni and other disciples were all sitting before Maharshi, who was as usual indrawn. The Muni saw a sparkling light come down from the skies and touch the forehead of Maharshi six times. Immediately the Muni had the realisation that Maharshi was none other than an incarnation of Lord

Subrahmanya. The seer-poet Ganapati Muni gave expression to this realisation through the famous eight verses *(Ramana Ashtakam)* beginning with the words *Yanayatra.* This was the first composition of Muni on Bhagavan after the five verses written in Virupaksha Cave on 18.11.1907 which were lost.

Later when Bhagavan was staying on the hill the Muni composed the ten verses beginning with the words *Kathaya nijaya,* with a concluding verse for these ten as follows:

Ganapathy, son of Narasimha born in Vasishta Kula, praised the glory of his Master in ten verses in Thotaka Metre.

Again when Maharshi had his abode at Skandasramam, Muni compiled twenty-one verses on the glory of Maharshi in two chapters. The first chapter covered the ten verses beginning with the words *Kathaya.* He added three more verses on Bhagavan to the eight verses already composed at Pachaiamman temple. He put these eleven verses in the 2nd chapter and completed the twenty-one verses. He composed an *upasamhara sloka* (concluding verse) as follows:

Ganapati, the son of Narasimha of the lineage of Vasishta, has thus adored Sri Ramana Guru, who is Skanda, in twentyone verses.

Besides this Nayana (Bhagavan Maharshi used to call Ganapathy Muni endearingly as Nayana) composed three verses on Bhagavan on different dates when he was living at Skandashram. He composed one verse on Bhagavan on his 44th Jayanti day 3.1.1923, which was the first Jayanti celebrated at the present ashram. So there were twenty-five verses in all on Bhagavan when Nayana left for Sirsi in North Canara District (present Kamataka State) in March 1929.

From there he was writing weekly letters to Bhagavan in Sanskrit from 10th March 1931 for some months. Along with some

of these letters he used to write one or more verses in praise of Bhagavan. He intended to compose in this manner a hundred verses on the glory of Bhagavan Maharshi in different metres consisting of ten *dasakams* (decads) that is, ten verses al for each chapter.

Nayana, however, did not compose the intended ten decads in continuous fashion. He was capable of composing one or more verses in a particular metre at one time and in different metres at other times. Finally he used to edit these verses as per his plan. But to our misfortune he did not complete
composing the ten decads as planned. He composed only fifteen verses from North Canara. Thus we get forty verses on the glory of Bhagavan, inclusive of the in twenty-five verses he composed before he left for Sirsi in March 1929.

When Bhagavan came to know that Nayana intended to compose a hundred verses on him in ten chapters (ten verses per chapter) in different metres, he prepared a notebook for writing down these verses. As soon as he got the verse or verses along with some letters, he used to note down immediately the verse or verses in the notebook under the particular chapter as per Nayana's plan.

After the demise of Nayana on 25.7.1936 Bhagavan edited these forty verses for the 1st edition published in 1936.
It may be seen from the manuscript (pp.220-226 of this issue) that Bhagavan has noted on the left the number given by Nayana according to the chapter. On the right side Bhagavan has noted the number of the verse he allotted for his edited version. We see the rearrangement as explained below.

As the 1st decad was complete he retained it as it was (1 to 10). After that he put the 61st verse of the 7th decad as 11 and the 81st verse of the 9th decad as 12. He marked the 10 verses of the 2nd decad as 13 to 22. The 10 verses of the 5th decad were renumbered as 23 to 32. The first verse of the 6th decad was num-

bered as 33. Verses 34 to 36 were taken from 3rd decad. The 37th verse was the one composed on the Jayanti day, 3.1.1923. The only verse of the 8th decad was numbered as 38. The 2 verses of the 4th decad found a place as the last 2 verses i.e. 39 and 40. .

Then Bhagavan also altered the concluding verse (2nd line) of the *Ramana Ekavimsati* suitably to suit the new arrangement as follows:

Ganapati, the son of Narasimha Sastry of the lineage of Vasishta, has thus adored Sri Ramana Guru who is Skanda, in forty verses.

Thus the 1st edition *Forty verses in praise of Maharshi* was published in 1936.

Another verse commencing with the words *Vande Sri Ramana Risheh* was added in the 2nd edition as an invocation:

I bow to the Lotus Feet of Sage Sri Ramana, the great Teacher, who showed me the effulgent Lord, transcending the darkness (of nescience).

It is explained below how it happened.

Once Bhagavan engaged himself in collecting Sanskrit verses in praise of him by different devotees. I happened to be present at that time in the old Hall. I just mentioned to Bhagavan that Nayana had composed the verse quoted above.

Then Bhagavan asked me, 'Where did you get the verse and when it was composed by Nayana' etc. I replied that at the request of Sri Kapali Sastry and Sri S. Doraiswamy Iyer, in order to translate in Sanskrit *The Mother* written in English by Sri Aurobindo, Nayana heard the gist of that work from them and started the translation on 18.8.1928 under the title *Matru Vyuha Chatushkam* during his visit to the Sri Aurobindo Ashram. The verse under reference was an invocation for the proposed work. But he did not complete that work. Then Maharshi desired to see

the note book containing the verse. The note book in Nayana's own handwriting was shown to Bhagavan the next day. Bhagavan at once copied this verse and said that this verse may be added to the *Chatvarimsat* in the beginning as an invocation in the 2nd edition, as the 1st edition was already published in 1936. Subsequent editions contain this verse.

These forty verses are being chanted daily in the morning at the shrine of Sri Bhagavan.

Sri Ramnasramam
Tiruvannamalai

K. Natesan

वासिष्ठकाव्यकण्ठगणपतिमुनेः ग्रन्थमाला

स्तोत्रग्रन्थमाला - तृतीयः खण्डः



श्रीरमणचत्वारिंशत्

वन्दे श्रीरमणर्षेराचार्यस्य पदाब्जम् ।
यो मेऽदर्शयदीशं भान्तं ध्वान्तमतीत्य ॥ १ ॥

कथया निजया कलुषं हरता करुणानिधिनाऽरुणशैलजुषा ।
खगवाहनभाषिततत्त्वविदा वृषवाहनमौनरहस्यभृता ॥ २ ॥

गणराण्मुखसूरिसभागुरुणा गुणसञ्चयरत्नमहोदधिना ।
घनगूढसहस्रकरेण यथा तनुकञ्चुकगुप्तमहामहसा ॥ ३ ॥

चतुरेण चलेन्द्रियनिग्रहणे पटुना परकीयगुणग्रहणे ।
छलवर्जितमौनसमाधिजुषा बलतर्जितभीकरकामरुषा ॥ ४ ॥

जठरं समये परिपूरयता कठिनं व्रतमद्रितटे चरता ।
झषकेतनशस्त्रदुरापहृदा कृषिमात्मविबोधविधौ दधता ॥ ५ ॥

भवभीकरवारिनिधिं तरता करतामरसेन सुपात्रवता ।
स्वदृशाऽधिकशीतलकान्तिभृता भयमङ्घ्रिसरोजजुषां हरता ॥ ६ ॥

नमतामतिभक्तिमतां निधिना घनतापविधूननसन्निधिना ।
यतिधर्मततिं परिपालयता परितश्च तमो विनिवारयता ॥ ७ ॥

फणिनायकवर्ण्यगुणौघभृता भणितीः प्रियसत्यहिता भणता ।
बहुमानवशादयता सुखितामवमानततेरविदूनवता ॥ ८ ॥

यतिनामधिपेन कुशाग्रलसन्मतिना धृतिना शितचित्तभुवा ।
लहरींप्रमदस्य सदावहता निहतान्तरशात्रवसंहतिना ॥ ९॥

भगवत्पदमन्यजनासुलभं स्वगुणैरधिगत्य परं जयता ।
ममतारहितेन हितेन सतां निहितेन गणप्रभुणा हृदये ॥ १०॥

धरणीधरजाङ्कमपि त्यजता धरणीतलवासितमोधुतये ।
नरवेषभृता नगरन्ध्रकृता रमणेन सनाथमिदं भुवनम् ॥ ११॥

परदेशिनेव धवलेन वाससः शकलेन वेष्टितकटीविशोभिना ।
वरदेशिकेन नरवेषधारिणा शिखिवाहनेन गुरुमज्जगद्भवेत् ॥ १२॥

अतीतगुणजालाय नैष्ठिकब्रह्मचारिणे ।
नमो मायामनुष्याय गुरवे तारकारये ॥ १३॥

यानायात्र न केकिनां कुलपतिः स्नानाय न स्वर्णदी
पानाय क्षितिभृन्महेन्द्रदुहितुर्नस्तन्यदुग्धामृतम् ।
गानाय प्रमथेश्वरास्सवयसो नैवात्र वीणाभृतो
वासं शोणगिरौ करोषि भगवन् क्रौञ्चाद्रिभेत्तः कुतः ॥ १४॥

एकं वक्त्रमुमाङ्कवासविरहः पाणौ न शक्त्यायुधं
मर्त्यत्वं न पताकिनी च पृतना पार्श्वद्वये नाकिनाम् ।
वेषोऽलं पुनरेष मुग्धनयनप्रच्छादने भूजुषा-
मन्तर्धानमुपैषि तारकरिपो क्व स्तन्यदायादतः ॥ १५॥

केचिद्योगविदां पुरःसर इति प्रज्ञानिबुद्ध्या परे
साधुः कश्चिदितीतरे गुरुधिया केऽप्यङ्घ्रिपद्मं तव ।

सेवन्ते रमणाभिधानमनुजक्षेमाय जातक्षितौ
द्वित्रास्त्वां गिरिजाङ्कपीठनिलयं जानन्ति देवं गुहम् ॥ १६ ॥

ओङ्कारार्थमुपादिशो भगवते वाणीमनोहारिणे
तातायाप्युपदेष्टुमुद्यतमभूत् किञ्चित्त्वदीयं मुखम् ।
ज्येष्ठस्याद्य सहोदरस्य गुरुतां प्राप्तोऽसि धीगौरवात्
सुब्रह्मण्य कनिष्ठतामपि गतः सर्वाधिकस्त्वं गुणैः ॥ १७ ॥

यत्पूर्वं श्रुतिपारदर्शिधिषणो द्वैपायनोऽध्यारुहत्
पश्चाद्बोधकलाविधूततिमिरः शङ्कापहश्शङ्करः ।
तत्सम्प्रत्यखिलावनीतलजुषामाचार्यसिंहासनं
देव त्वां प्रतिवीक्षते नरतनो गीर्वाणसेनापते ॥ १८ ॥

धर्मे नाशमुपागते त्रिभुवने पर्याकुले पापतः
प्रज्ञाने परितो गिरां पथि मुधा सञ्चार्यमाणे जनैः ।
सद्भावे परमेश्वरस्य च पितुः सन्देहडोलां गते
द्वीपः कैतवमर्त्यकेकितुरग त्वामन्तरा कस्सताम् ॥ १९ ॥

वैराग्यं तव वित्तमस्तु करुणां शक्नोषि हातुं कथं
दूष्यस्तेऽस्तु समुद्यमः पितृपदध्यानं च किं तादृशम् ।
कामस्तेऽस्तु विगर्हितो विनमतां रक्षा च किं गर्हिता
स्कन्दच्छद्मनुष्य किं नु समयं कञ्चित्समुद्वीक्षसे ॥२० ॥

दूरं याहि कुवाद धर्मवृष ते नेतः परं पङ्गुता
दुर्भ्रान्ते भुवनं जहीहि परितो वर्धस्व संसत्सताम् ।
सोदर्येण समन्वितो भुवमिमां प्राप्तो गुरुग्रामणीः
शूरान्तःपुरनेत्रविभ्रमहरो देवो भवानीसुतः ॥ २१ ॥

जन्मस्थानमवाप्य गुप्तमहमो यो भेदमाधूतवान्
भूतानां चरतां पृथग्विधधियामात्मैव यो भासते ।
देहं सर्वमिदं जगच्च विभवादाक्रम्य यः प्रोल्लस-
त्येकस्तं गुरुमूर्तिमानमत रे लम्बोदरभ्रातरम् ॥ २२॥

अन्तर्यश्च बहिर्विधूततिमिरं ज्योतिर्मयं शाश्वतं
स्थानं प्राप्य विराजते विनमतामज्ञानमुन्मूलयन् ।
पश्यन्विश्वमपीदमुल्लसति यो विश्वस्य पारे पर-
स्तस्मै श्रीरमणाय लोकगुरवे शोकस्य हन्त्रे नमः ॥ २३॥

प्रसरतादितः शुभविलोकितम् ।
रमण ते सकृत्फलतु मे कृतम् ॥ २४॥

रमण जन्मिनामयि भवान् गुरुः ।
अभिद आशयस्तव महानुरुः ॥ २५॥

जगदहं परः स्फुरति मे त्रयम् ।
सदभिदं गिरा तव विसंशयम् ॥ २६॥

त्वदुपदेशतो गलति संविदा ।
मयि निरन्यया सदहमोर्भिदा ॥ २७॥

अहमि योऽन्तरस्तममलं हृदि ।
अनुभवेम भोस्तव कृपा यदि ॥ २८॥

न करुणा गुणस्तव विदां पते ।
हृदयतेजसः सहजभैवते ॥ २९॥

तव तनुर्ज्वलत्यनघ विद्युता ।
तव दृगातता लसति भास्वता ॥ ३० ॥

कबलितं मनस्तव विभो हृदा ।
त्वमसि सन्ततं विलसितो मुदा ॥ ३१ ॥

भुवनभूपतेर्भगवतः कृते ।
भवसि पाचको यमवतां पते ॥ ३२ ॥

नरपशूनिमानहमि ताडयन् ।
परशिवौदनं वितनुषे पचन् ॥ ३३ ॥

तिमिराणि न केवलं वचोभिः
करुणापाङ्गविलोकितैश्च नृणाम् ।
हृदये प्रसरन्ति मर्दयन्तं
भगवन्तं रमणं गुरुं नमामि ॥ ३४ ॥

भवजलनिधिं गाहं गाहं चिरादलसालसान्
पदजलरुहद्वन्द्वद्वीपं श्रितांस्तव सम्प्रति ।
रमणभगवन् कल्याणानां निकेतन पाहि नः
सदय दयया सिक्तैर्भक्तानपाङ्गविलोकितैः ॥ ३५ ॥

यदि न जननी स्तन्यं दद्याच्छिशोर्बत का गतिः
यदि पशुपतिः क्रोधं कुर्यात्पशोरवनं कुतः ।
यदि पदजुषामाचार्य त्वं निहंसि न संशयं
भ्रमशतपराभूता एते तरन्तु भवं कथम् ॥ ३६ ॥

विशदहसिते पूर्णा शान्तिः सुधाकरसोदरे
स्थिरपृथुलयोः पूर्णा शक्तिर्दृशोरतुलार्चिषोः ।
हृदयकमले नित्या निष्ठा बहिश्च सरत्प्रभे
रमणभगवन् को वा मौनी समस्तव भूतले ॥ ३७॥

देवी शक्तिरियं दृशोः श्रितजनध्वान्तक्षयाधायिनी
देवी श्रीरियमम्बुजाक्षमहिषी वक्त्रे सहस्रच्छदे ।
देवी ब्रह्मवधूरियं विजयते व्याहारगूढा परा
विश्वाचार्य महानुभाव रमण त्वां स्तौतु कः प्राकृतः ॥ ३८॥

सोऽहं जातो रमणभगवन् पादयोस्ते दविष्ठो
यद्यप्यस्मिन्महति समये शक्तिलास्ये प्रवृत्ते ।
सूर्यस्येव ज्वलितमहसो दूरगां नाथ शक्तिं
विश्वस्याग्र्यां तव मम मनो वीतदुःखं तथापि ॥ ३९॥

तद्भागधेयमसमानमनेकमौनि-
वासार्जितं क्षितिभृतः खलु लोहितस्य ।
अङ्गीचकार भगवान् रमणो महर्षि-
रन्येषु सत्सु यदिमं बहुषु स्थलेषु ॥ ४०॥

शान्तिर्नितान्तमधिका परमास्य शक्ति-
र्वैराग्यमद्भुततमं करुणा तु सान्द्रा ।
ज्ञानं निरस्तकुहनं मधुरं च वृत्तं
नृणां निदर्शनमयं रमणो महर्षिः ॥ ४१॥

नारसिंहिर्गणपतिर्वासिष्ठो रमणं गुरुम् ।
चत्वारिंशन्मितैः पद्यैः स्कन्दांशं स्तुतवानृषिम् ॥ ४२॥

शिवशतकम्

प्रथमं गीतिदशकम्

श्रियमातनोतु सुकृतं पुष्णातु ततान्यघानि मुष्णातु ।
दिशतु च भूयो भूयस्तव भगवानष्टमूर्तिरिष्टानि ॥ १॥



प्रकृतिस्वयंवरपतेर्यस्य जटाः शेखरेन्दुकपटेन ।
प्रहसन्ति देवयूनां कल्पस्त्रगलङ्कृतान् कचकलापान् ॥ २॥

वामार्धाधरदंशनवलितायां दक्षिणार्धरदपङ्क्तौ ।
यस्य विलक्षणमास्यं विलोक्य विजयाऽऽस विकसितकपोला ॥ ३॥

हा तनय हा सुते हा प्रिये हतोऽस्म्येष चेति मुखरस्य ।
जगतो दशैव तेने सन्तापं यस्य न गरलं पीतम् ॥ ४॥

यस्य परुषाट्टहासज्वलनेनैवाशिते पुरत्रितये ।
आत्मन्येव पृषत्को जज्वाल निरामिषो द्विषन्नसुरान् ॥ ५॥

जनयन्ति ह्रियमेव त्रिभुवनसंहारशक्तिनाथस्य ।
यस्यान्धकादिनिर्जयकथानकान्यमरसमितिगीतानि ॥ ६॥

यस्य स्मरापराधादुज्झितनिद्रे ललाटजुषि नयने ।
गणयामास विधाता युगान्यतीतानि वेपमानकरः ॥ ७॥

रुधिरार्द्रमजिनमंसे परितोऽङ्गानि श्मशानभसितरजः ।
कण्ठे कपालमाला वेषोऽयं यस्य दुरवगाहार्थः ॥ ८ ॥

भुवनं झरैः कतिपयैरावृण्वाना युगान्तमिव कर्तुम् ।
यस्य जटापटलमिता गङ्गा नार्द्रीचकार कोणमपि ॥ ९ ॥

हित्वा मानसशालां विज्ञानमयेऽवतीर्य निजरूपे ।
आनन्दं पश्यन्तो यं मुनयो यान्ति संसृतेः पारम् ॥ १० ॥

अथ द्वितीयं उपजातिदशकम्

उमावपुः सौरभमुद्गिरन्तो भूषेन्दुपीयूषकणान् किरन्तः ।
भूतेशचूडासरितस्तवाशु भूयासुरायासहराः समीराः ॥ ११ ॥

मुहुर्मुहुर्दिक्षु वमन्नपर्णा धम्मिल्लसन्तानलतान्तगन्धम् ।
दुःखानि वो धूर्जटिजाटजूटस्रोतस्विनी वातशिशुर्धुनोतु ॥ १२ ॥

आश्लिष्य पीयूषमयूखरेखां गाढं जगद्राजजटानिकुञ्जे ।
बहिः शनैः सञ्चलितः सुखं वः सुरस्रवन्ती पवनस्तनोतु ॥ १३ ॥

स्वेदं हरन्नङ्गभवं गणानां दिने दिनेऽङ्गीकृतताण्डवानाम् ।
युष्माकमेनांसि महेशमौलिमन्दाकिनीमन्दमरुद्धुनोतु ॥ १४ ॥

स्विद्यन्ति ते कन्दुककेलिसङ्गादङ्गानि मातङ्गमुखस्य मातुः ।
चिरं भजन्तः शिवशीर्षगङ्गाभङ्गानिलाः शान्तिमितो भणन्तु ॥ १५ ॥

भव्यं क्रियाद्वो भवमौलिरङ्गाद्भागीरथीभङ्गभवः समीरः ।
ललाटलोलानलकानरालानुत्सारयन्यो भजते भवानीम् ॥ १६॥

आमन्त्र्य गौरीमुखगन्धवाहमाभाष्य नागाननकर्णवातम् ।
चलन्नितः शर्वशिरः स्रवन्ती समीरणः सर्वहिताय भूयात् ॥ १७॥

मुदे सतां कैरवबन्धुमौलिमौलिस्रवन्ती मरुतोऽस्तु गानम् ।
औशीनरं यो यशसाऽत्यशेत भूषाऽहयेऽन्नं सकलोऽपि भूत्वा ॥१८॥

भूषेन्दुरेखाकिरणैर्विभक्तैर्भङ्गावलीषु द्विगुणीकृताऽऽभा ।
भवस्य मौलिं परितश्चरन्ती भागीरथी वो विदधातु भद्रम् ॥ १९॥

करारविन्दे गिरिशस्य खेलन् कुरङ्गबालः कुशलं क्रियाद्वः ।
विश्वस्य धात्री नगराजपुत्री यस्मादधीते तरलेक्षितानि ॥ २०॥

अथ तृतीयं रथोद्धतादशकम्

निर्जरस्तुतिकथाप्रसङ्गतो दक्षिणं श्रवणमद्रिजापते ।
दीनबान्धव निवर्तय क्षणं घोषमेष कुरुते पदानतः ॥ २१॥

पश्य देव सकृदेतमर्भकं शीतदीधितिमयेन चक्षुषा ।
तेन सिध्यति परोपकारिता लोकतात तव काऽपि न क्षतिः ॥२२॥

अम्बराणि हरिदम्बरादहं हर्म्यजालमगसानुवासिनः ।
नो वृणोमि कनकं च भिक्षुकादर्थये सदयमेव वीक्षितम् ॥ २३॥

तत्किल प्रभवति क्षितेर्जगत्यन्तरिक्षभुवनेऽथवा दिवि ।
कर्तुमप्रतिममात्मगोचरं मौलिभूतमकृतात्मनामपि ॥ २४ ॥

तस्य शक्तिररिलोकदुःसहा तस्य सिद्धिरणिमादिशालिनी ।
तस्य सम्पदखिलात्मभावदा यं विशोधयति दृष्टिरीशितुः ॥ २५ ॥

याचकः पदसरोजकिङ्करो वीक्षितेन खलु साध्यमीप्सितम् ।
अत्र चेद्भव भवान्पराङ्मुखो निर्दयेषु गणना भवेत्तव ॥ २६ ॥

दृष्टिदानविमुखेन किं त्वया दीयते निजमनामयं पदम् ।
किं ददाति हर सर्वमापणं विण्णिशाशकलदानदुर्मनाः ॥ २७ ॥

किं नु संलपसि शैलकन्यया नन्दिना किमु करोषि भाषणम् ।
सर्वलोकजनकप्रभो कुतो नार्भकस्य रुदितं निशम्यते ॥ २८ ॥

संस्तुतो न च दधासि सम्मदं दूषितो न च महेश लज्जसे ।
अप्यहं चतुरभाषणः कविः किं करोमि विगुणस्य ते पुरः ॥ २९ ॥

पाहि वा पशुपते जहीहि वा जीवनं तव पदोः समर्पितम् ।
देहि वा विमुखतामुपेहि वा प्रार्थये किमपि नाथ नापरम् ॥ ३० ॥

अथ चतुर्थं पथ्यावक्त्रदशकम्

किं घोषं कुरुषे द्वारि देहि देहीति भूभुजाम् ।
रसने हर गौरीश पाहि पाहीति गीयताम् ॥ ३१ ॥

कर्तुं काव्यानि नव्यानि व्यसनं रसने यदि ।
न किं सन्ति चरित्राणि पवित्राणि पिनाकिनः ॥ ३२॥

सुतरां सुलभो मोक्षः कीर्तनात्कृत्तिवाससः ।
उपायमविदित्वैतमपायं यान्ति जन्तवः ॥ ३३॥

सुधाघटोऽधरः स्त्रीणां सुधातोयधरः कविः ।
सुधातरङ्गमाली ते नामध्वनिरुमापते ॥ ३४॥

किञ्चिदस्त्यधरे स्त्रीणां सुधायामस्ति वा न वा ।
माधुर्यमन्धकारातेर्नामधेये विशेषतः ॥ ३५॥

अस्माकमाकुलं पापैः प्रायश्चित्तं विदूयते ।
हरसङ्कीर्तनं तेषां प्रायश्चित्तं विधीयते ॥ ३६॥

शम्भोरम्भोरुहाकारं चरणं शरणं सताम् ।
अंहःसंहारमाधातुं नमतेः कर्म कुर्महे ॥ ३७॥

पाप दूरमितो याहि समाप्ता ते मयि स्थितिः ।
पदपद्मं पुरारातेः साम्प्रतं सम्प्रणम्यते ॥ ३८॥

करणे सर्वसौख्यानां हरणे वाऽखिलैनसाम् ।
नास्ति मे मदनारातेः पदनालीकतः परम् ॥ ३९॥

पारिजातमहेशा ङ्घ्री दातारौ भवतः समौ ।
उद्ग्रीवैः प्राप्यते तस्मान्नतग्रीवैरितः फलम् ॥ ४०॥

अथ पञ्चमं भुजगशिशुभृतादशकम्

अभयवरवतः पाण्योरमृतकरवतो मौलौ ।
अखिलभुवनसम्राजश्चरणसरसिजं सेवे ॥ ४१॥

तव गरलवतः कण्ठाद्विगलति यदि पीयूषम् ।
अभयमजर नो चित्रं भुजगवलयितात्पाणेः ॥ ४२॥

निजविषयपरं वित्तं शिवचरणपरं चित्तम् ।
इह जगति सतां येषां जयति चरितमेतेषाम् ॥ ४३॥

भुवनजनककारुण्यान्न किमपि परमास्रव्यम् ।
प्रसरति यदि तत्पूर्णं सकलमपि च सम्पूर्णम् ॥ ४४॥

जगदिदमतिदौर्गुण्यं विषयविषधरारण्यम् ।
हर तव चरणध्यानं वरमति कुसुमोद्यानम् ॥ ४५॥

शुचितरहृदयाङ्गारो नयनरुचिशिखोद्दीप्तः ।
परमशिवविमर्शाग्निः प्रभवति दुरितं दग्धुम् ॥ ४६॥

असि भुवि भव हव्याशी हर नभसि शचीनाथः ।
दिवि मृड महसामीशो जयसि च शिव सद्रूपः ॥ ४७॥

इह तव महिषीधेनुर्नभसि सहचरी शक्तिः ।
उपरि तु ललना छाया त्रयमिदमखिलाराध्यम् ॥ ४८॥

सुरपतिरितरो न त्वन्मधुरिपुररुणश्चैकः ।
शतधृतिरनलो न द्वौ पुरहर विदितं वेद्यम् ॥ ४९॥

त्वमजर मरुतामात्मा दिनकृतिवसतां विष्णुः ।
इह भुवि भवतां ब्रह्मा पृथगपि पुरुषा यूयम् ॥ ५०॥

अथ षष्ठमौपच्छन्दसिकदशकम्

जगदेतदनारतं पचन्तं महतोऽस्मादपि पुष्करान्महान्तम् ।
तपसा निरुपाधिकेन गम्यं परमात्मानमजं शिवाख्यमीडे ॥५१॥

सदलङ्कृतियुक्तया सुकान्त्या हृदयाकर्षकभावया गुणज्ञम् ।
शिवमीशमहं गिरोपतिष्ठे नृपतिं कन्यकयेव वैभवार्थी ॥ ५२॥

मम मङ्गलमातनोतु भास्वत्करधौताहरितः शुचीर्वसानः ।
शशिना मुकुटी दिवा जटावांस्तिलकीहव्यभुजा विभुर्विभूनाम् ॥५३॥

अपि निष्करुणस्य मानसं चेद्द्रवति प्रार्थनयेह दुर्गतानाम् ।
करुणावरुणालयस्य चित्ते भवतः को भव संशयं विधत्ते ॥ ५४॥

स्मरणे तव सञ्चलन्ति यूथान्युरुकीर्ते हृदयान्मनोरथानाम् ।
अनिवार्यगतीनि शीतभानोरवलोके जलधेर्यथा जलानि॥ ५५॥

परिणीतिगृहे महेशपूर्णे परितो बन्धुजनैर्वरस्य साम्यम् ।
हृदये परिपूरितेऽत्र कामैस्तव पादस्तु जपे दधाति मृग्यः ॥ ५६॥

तव मन्त्रमुदीक्षते मनश्चेदचलं कानिचिदक्षराणि तानि ।
अथ ते सुगुणा नगोचरास्ते विधया नाथ कया भजेमहि त्वाम् ॥ ५७॥

धवलाकृतिरुच्यसेऽङ्ग कैश्चित् भणितः कैश्चन नीललोहितस्त्वम् ।
अपरे हर कृष्णपिङ्गलं त्वां विदुरन्ये प्रवदन्ति काञ्चनाभम् ॥ ५८॥

मनसा परिकल्पितानि सन्तस्तव रूपाणि यथेष्टमामनन्तः ।
महते खलु संशयाय नृणामभवन्केन निरूपयेम सत्यम् ॥ ५९॥

अथवा भगवन्निराकृतिस्त्वं प्रभवस्याकृतिमीप्सितां च धर्तुम् ।
इयती खलु चर्ययेतिको वा तव मायां विबुधः प्रवक्तुमीष्टे ॥ ६०॥

अथ सप्तमं शशिवदनादशकम्

अमृतमयूखं मुकुटमनर्घम् ।
जयति दधानो जगदधिराजः ॥ ६१॥

सकलबुधौघे विफलविधाने ।
असति शरण्ये मतिमतिगण्ये ॥ ६२॥

दुरितविसारप्रतमसि लोके ।
ऋषिकुलजानां सदसि सशोके ॥ ६३॥

अतिदुरदृष्टान्नरनियुतेषु ।
अपि मितमत्तुं धनरहितेषु ॥ ६४ ॥

उदितविरोधास्वयुतभिदासु ।
चतसृषु जातिष्वबलतमासु ॥ ६५॥

मुहुरपि लोले क्षितिसुरशीले ।
अजगणकल्पे भुजभवसङ्घे ॥ ६६॥

चतुरविरोधिव्रजहृतसाराम् ।
अविरतनेत्रस्रुतजलधाराम् ॥ ६७॥

भरतधरित्रीं भुवननृपालः ।
अवतु दयालुः सितगिरिशालः ॥ ६८॥

अरुणधरित्रीधर हर दूनाम् ।
भरतधरित्रीमव शिव दीनाम् ॥ ६९॥

हर भरतक्ष्माजनवरदूतम् ।
कुरु चरितार्थं गणपतिमेतम् ॥ ७०॥

अथाष्टमं तनुमध्यादशकम्

पाता भुवनानां धाता च विधाता ।
नेता प्रमथानां त्राता भवतान्नः ॥ ७१॥

कर्ता भुवनानां भर्ताऽपि च हर्ता ।
ख्यातोऽवतु देवस्तातो मरुतां नः ॥ ७२॥

कर्तुं भुवनं वाग्भर्तुं भवभाते ।
हर्तुं खलु भद्रा योगामलनिद्रा ॥ ७३ ॥

मेयः शिव सर्वो गोलात्मकलोकः ।
सीमारहितोऽसावेकस्तव नाकः ॥ ७४ ॥

आत्मानमुताहो तातं खचराणाम् ।
आहोस्विदधीशं ध्यायामि सुराणाम् ॥ ७५ ॥

तं व्योमचराणां जीवं पवमानम् ।
तातं शिवमाहुर्नाथं मघवानम् ॥ ७६ ॥

अभ्रे विचरन्तं भान्तं निनदन्तम् ।
अस्मत्पितरं तं वन्दे भगवन्तम् ॥ ७७ ॥

यान्तं पवमानं भान्तं मघवानम् ।
नाके निनदन्तं गायन्ति शिवं तम् ॥ ७८ ॥

भातो गगनाग्रेर्यातः पवनस्य ।
तारस्य च रूपं नानेकमपापम् ॥ ७७ ॥

लक्ष्मीपतिसङ्ख्या यावद्रविलोकम् ।
गौरीपतिरेको राजत्यधिनाकम् ॥ ८० ॥

अथ नवमं वसुमतीदशकम्

नित्यं स्वरति यो व्याप्याभ्रमखिलम् ।
गायन्ति कवयस्तं तारममलम् ॥ ८१॥

ताराह्वयवपुः शम्भोरभयदम् ।
भानोः किरणवद्वैभूतिकमिदम् ॥ ८२॥

तं पुष्करगुणं गायन्तु बहवः ।
स त्वग्निरजरो दिव्यः शिवरवः ॥ ८३॥

यद्रोदितिवियद्देशेऽनवरतम् ।
भद्रं बुधगणो रुद्रं भणति तम् ॥ ८४॥

तारः स गगने न त्वेव मरुताम् ।
सर्वत्र च महान्प्राणो जनिमताम् ॥ ८५॥

तस्यैव गगने प्राणस्य चरतः ।
भङ्गाः पुनरिमे वाताः कुमभितः ॥ ८६॥

रुद्रः स निनदन् राजंत्स मघवा ।
वातः सविचरन्नित्यं दिवि युवा ॥ ८७॥

एवं गुणवशादेकस्य बहुता ।
उग्रस्य जगतां राज्ञो निगदिता ॥ ८८॥

व्यासो दिवि सतश्चिद्वह्निरतुलः ।
नामान्तरवशात्ताराग्निरमलः ॥ ८९ ॥

आक्रम्य सकलं भान्तं बहुफलम् ।
गायामि विमलं चिद्वह्निमतुलम् ॥ ९० ॥

अथ दशमं शार्दूलविक्रीडितदशकम्

यः प्रज्ञानमयो यमाहुरजरं येनाभितः स्थीयते
यस्मै कर्मसमर्पयन्ति मुनयो यस्मात्परो नापरः ।
यस्यासावसुरम्बरे तपति नः प्राणान्दधानो रविः
यस्मिन्प्रोतमिदं समस्तभुवनं कस्मैचिदस्मै नमः ॥ ९१ ॥

कन्याशीतगिरेरियं सुललितैगात्रैरियं भामिनी
मातेयं गजवक्त्रतारकजितोरित्यल्पदृष्टेः कथाः ।
सर्वस्मिन्नचरे चरे च विभवादेका परा जाग्रती
शक्तिः काचन सा विचाररसिकैराराध्यते नाथ ते ॥ ९२ ॥

केषाञ्चित्स हिरण्मयो मतिमतां कृष्णः परेषां विदा-
मन्येषां विदुषां सुधांशुधवलस्त्रेधा परेषां परः ।
केऽपि स्थूलदृशां जगत्पतिवपुर्ध्यानाय कल्पा इमे
सत्यं तु ज्वलदप्यबाध्यमभितो गूढं गुहायामिव ॥ ९३ ॥

सौरं मण्डलमुज्ज्वलं तव तपः श्वासश्चरन्मारुतो
बिम्बं मेचकतोयजातसुहृदो मन्दस्मितं सुन्दरम् ।

चित्रं कन्दुकखेलनं वसुमतीलोकस्य तिर्यग्भ्रमिः
को वा भाषितुमीश ते प्रभवति स्वल्पश्रुतो वैभवम् ॥ ९४॥

संश्लिष्यन्प्रकृतिं रजोगुणमयीं देहे विराड्भण्यसे
बिम्बेऽर्कस्य हिरण्यगर्भ उदितः शुद्धां श्रितः सात्त्विकीम् ।
ईशस्त्वं परतामसीमुपगतो गुप्तां नभस्युच्यसे
धेनुः श्रीर्गिरिजेति शाक्तसमये यस्यास्त्रिधा विश्रुतिः ॥ ९५॥

ऊर्ध्वं भासि हिरण्मयाङ्गसकलप्राणे रवेर्मण्डले
लोके च ध्वनिधाम्नि रुद्रमरुतामन्तः समुद्द्योतसे ।
अस्माकं हृदयेषु च क्षितिजुषां वैश्वानर भ्राजसे
शेषं सर्वमिदं पचन्नपि पर व्याप्तोऽभितो वर्तसे ॥ ९६॥

भूतत्त्वं तव शैलजात्वमपि ते शक्तेः प्रभो पण्डिताः
चातुर्येण समर्थयन्ति युवयोर्लीलाशरीरग्रहम् ।
केचिद्विग्रहकल्पनं जडधियामर्थेकृतं साधय-
न्त्यन्येंऽशावतरं भणन्ति भणितं भाक्तं परे मन्वते ॥ ९७॥

माहात्म्यं तव व क्तु कः पशुपते यद्रोमतुल्यं महत्
ब्रह्माण्डं चरितानि वेद तव कः सर्वान्तरो भासि यः ।
यागं को विदधातु ते वरदकैर्यस्य स्वमेवाखिलं
नामैकं तव सूरिभिः प्रकटितं ङेन्तं हृदादि श्रये ॥ ९८॥

द्राक्षामाक्षिपति क्षिणोति मधुनो दर्पं सितां निन्दति
क्षीरं नो बहु मन्यते प्रशमयत्यग्र्यं सुधाया यशः ।
किं वान्यत्कथयाम तं च घृणया कान्ताऽधरं वीक्षते
प्राप्तो जन्मसभक्तवक्त्रकमलान्नामध्वनिर्नाथ ते ॥ ९९॥

किं यागैरतिदारुणेन तपसा किं वा किमभ्यर्चनैः
एका लोकहितङ्करी विजयते मुक्तेरुपायः परः ।
कामारे करुणानिधे पशुपते भूतेश गौरीपते
शम्भो शङ्कर चन्द्रचूड जगतां नाथेति नामावली ॥ १०० ॥

॥ इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोः
गणपतेः कृतिः शिवशतकं समाप्तम् ॥

शिवस्तवराजः

प्रथमः शशिवदनावर्गः

अमृतमयूखं मुकुटमनर्घम् ।
जयति दधानो जगदधिराजः ॥ १ ॥

सकलबुधौघे विफलविधाने ।
असति शरण्ये मतिमतिगण्ये ॥ २ ॥

दुरितविसारप्रतमसि लोके ।
ऋषिकुलजानां सदसि सशोके ॥ ३ ॥

अतिदुरदृष्टान्नरनियुतेषु ।
अपि मितमत्तुं धनरहितेषु ॥ ४ ॥

उदितविरोधास्वयुतभिदासु ।
चतसृषु जातिष्वबलतमासु ॥ ५ ॥

मुहुरपि लोले क्षितिसुरशीले ।
अजगणकल्पे भुजभवसङ्घे ॥ ६ ॥

चतुरविरोधिव्रजहृतसाराम् ।
अविरतनेत्रस्रुतजलधाराम् ॥ ७ ॥

भरतधरित्रीं भुवननृपालः ।
अवतु दयालुः सितगिरिशालः ॥ ८॥

अरुणधरित्रीधर हर दूनाम् ।
भरतधरित्रीमव शिव दीनाम् ॥ ९॥

सतुहिनरोचिःशकलकमस्ते ।
सकरुणगौरीरमण नमस्ते ॥ १०॥

हर भरतक्ष्माजनवरदूतम् ।
कुरु चरितार्थं गणपतिमेतम् ॥ ११॥

असि सितशैले हर हतगात्री ।
तव किमु दृष्ट्यां न भरतधात्री ॥ १२॥

पुरजित ईड्यं विलसति गुर्व्याम् ।
सितगिरिनाम स्थलमिदमुर्व्याम् ॥ १३॥

स्थलमिदमच्छक्षितिधररूपम् ।
हृदयमिलाया अपहतपापम् ॥ १४॥

हृदिव नराणां सितनगनाम ।
हृदपि धरायास्तव शिव धाम ॥ १५ ॥

क्षितिहृदये वा विलसति नित्यः ।
त्रिभुवनमध्ये शिव इति सत्यः ॥ १६॥

प्रभुमिह सन्तः प्रतिखगगोलम् ।
विदुरिममन्तर्विरचितशालम् ॥ १७ ॥

इयमखिलाभ्यो बहुतरलीला ।
नरहृदयाख्या तव शिव शाला ॥ १८ ॥

द्वितीयो मुकुलवर्गः

उद्दीप्यत् किरणं चित्रं श्रीशरणम् ।
कामारेश्चरणं भूयान्नः शरणम् ॥ १९ ॥

सत्यः कोऽपि शिवो नित्यः पालयिता ।
मध्ये यो जगतां स ध्येयः सततम् ॥ २० ॥

नास्त्येतस्य तनुर्वस्त्वे क्वापि न सः ।
मत्याऽभाणि पुनः सत्याधारपदम् ॥ २१ ॥

उक्तं सूक्ष्मतमं द्वेधैकं परमम् ।
रूपं रूपतया किञ्च स्थानतया ॥ २२ ॥

सोऽणुः स्यादणुतो धातैषां जगताम् ।
तच्छक्तिर्महतो विज्ञेया महती ॥ २३ ॥

गत्वा तिष्ठति ना यत्स्वं हार्दपदम् ।
अग्राह्यस्य विभोस्तस्य ध्यानमिदम् ॥ २४ ॥

दृष्ट्या सा भुवनं सृष्ट्वा शास्तुमिदम् ।
हैमं दिव्यवपुर्जग्राहेति विदुः ॥ २५॥

सूक्ष्मं स्यादगुणं हैमं स्यात्सगुणम् ।
देवस्यादिविभोरेवं द्वे वपुषी ॥ २६॥

भाषामात्रवपुः पूर्वं स्यादवपुः ।
अन्यद्भक्तिमतां बुद्धिग्राह्यवपुः ॥ २७॥

बिभ्रद्भाति जगत्साम्राज्यं गगने ।
हैमोऽसौ पुरुषः सिद्धानां भुवने ॥ २८॥

वाचा नव्यविदामध्यक्षः स परः ।
इन्द्रः पूर्वविदामस्माकं तु हरः ॥ २९॥

प्रत्युष्णांशुतया तन्वा बिम्बतया ।
प्रत्यण्डं प्रभुतां धत्ते सोऽद्भुतया ॥ ३०॥

अभ्रे राजति यो बिभ्राणो भुवनम् ।
शुभ्रागे च विभुः स भ्राजिष्णुयशाः ॥ ३१॥

गौरोऽयं गगने शुक्लः शुभ्रनगे ।
एकेयन्तु भिदा मायारूपकृता ॥ ३२॥

हैमं भूतपते शुक्लं वा शिव ते ।
रूपं यः स्मरति प्राज्ञोऽयं जयति ॥ ३३॥

अभ्रे ये मरुतः शुभ्रे भूभृति ते ।
क्लेशानां दमना ईशान प्रमथाः ॥ ३४॥

दासोऽहं मरुतः पातारो जगतः ।
भूता वा भवतां स्तोता पापहृताम् ॥ ३५॥

स्तूयन्तां सुहृदः सर्वे सर्वविदः ।
ईशानानुचराः सर्वाभीष्टकराः ॥ ३६॥

तृतीयः तनुमध्यावर्गः

हर्ता दुरितानां धर्ता जगतां नः ।
भर्ता गुहमातुः कर्तास्तु शुभस्य ॥ ३७॥

पाता भुवनानां धाता च विधाता ।
नेता प्रमथानां त्राता भवतान्नः ॥ ३८॥

कर्ता भुवनानां भर्ताऽपि च हर्ता ।
ख्यातोऽवतु देवस्तातो मरुतां नः ॥ ३९॥

कर्तुं स्वरतीदं भर्तुं प्रविभाति ।
हर्तुं य उदास्ते तर्तुं प्रणुमस्तम् ॥ ४०॥

कर्तुं भुवनं वाग्भर्तुं भवभाते ।
हर्तुं खलु भद्रा योगामलनिद्रा ॥ ४१॥

कार्यत्रिकमेतत्कर्तुं बहवो नो ।
एकस्य तु कार्यैर्नामानि बहूनि ॥ ४२॥

क्ष्मार्केन्दुपतिभ्यः त्रिभ्यः पुरुषेभ्यः ।
सर्गस्थितिभङ्गा ख्यातिः खलु भाक्ता ॥ ४३॥

तेष्वन्यतमं यत् कार्यत्रिकहेतुम् ।
केचिद्ब्रुवते सा भाक्ता न किमुक्तिः ॥ ४४॥

अध्यक्षपरोऽयं साक्षादिव वादः ।
एका यदहन्ता तस्यापि परस्य ॥ ४५॥

मेयः शिव सर्वो गोलात्मकलोकः ।
सीमारहितोसावेकस्तव नाकः ॥ ४६॥

लक्ष्मीपतिसङ्ख्या यावद्रविलोकम् ।
गौरीपतिरेको राजत्यधिनाकम् ॥ ४७॥

एकैक इनः स्यात् प्रत्यब्जभवाण्डम् ।
सर्वाण्डगमेकं प्राहुः खमखण्डम् ॥ ४८॥

आत्मानमुताहो तातं खचराणाम् ।
आहोस्विदधीशं ध्यायाम सुराणाम् ॥ ४९॥

तं व्योमचराणां जीवं पवमानम् ।
तातं शिवमाहुर्नाथं मघवानम् ॥ ५०॥

यद्यप्यखिलानामात्मा गुरुरीशः ।
उक्तो मरुतां तु प्राथम्यत एषः ॥ ५१ ॥

अभ्रे विचरन्तं भान्तं निनदन्तम् ।
अस्मत्पितरं तं वन्दे भगवन्तम् ॥ ५२ ॥

यान्तं पवमानं भान्तं मघवानम् ।
नाके निनदन्तं गायन्ति शिवं तम् ॥ ५३ ॥

भातो गगनाग्रेर्यातः पवनस्य ।
तारस्य च रूपं नानेकमपापम् ॥ ५४ ॥

चतुर्थो वसुमतीवर्गः

नित्यं स्वरति यो व्याप्याभ्रमखिलम् ।
गायन्ति कवयस्तं तारममलम् ॥ ५५ ॥

ताराह्वयवपुः शम्भोरभयदम् ।
भानोः किरणवद्वैभूतिकमिदम् ॥ ५६ ॥

तं पुष्करगुणं गायन्तु बहवः ।
स त्वग्निरजरो दिव्यः शिवरवः ॥ ५७ ॥

यद्रोदिति वियद्देशेऽनवरतम् ।
भद्रं बुधगणो रुद्रं भणति तम् ॥ ५८ ॥

सङ्कर्षणवशाद्राजत्यलमयम् ।
पानीयमुचितं प्राहुर्हरिहयम् ॥ ५९॥

तारः स गगने न त्वेव मरुताम् ।
सर्वत्र च महान् प्राणो जनिमताम् ॥ ६०॥

तस्यैव गगने प्राणस्य चरतः ।
भङ्गाः पुनरिमे वाताः कुमभितः ॥ ६१॥

रुद्रः स निनदन् राजन्त्स मघवा ।
वातः स विचरन् नित्यं दिवि युवा ॥ ६२॥

एवं गुणवशादेकस्य बहुता ।
तारात्मकवपुर्दृष्ट्या निगदिता ॥ ६३॥

केचित्पशुपतिं शक्रं च पवनम् ।
देवत्रयमिति प्राहुर्गुणवशात् ॥ ६४॥

व्याप्तो दिवि सतश्चिद्वह्निरतुलः ।
नामान्तरवशात्ताराग्निरमलः ॥ ६५॥

आक्रम्य सकलं भान्तं बहुबलम् ।
गायामि विमलं चिद्वह्निमतुलम् ॥ ६६॥

मित्रं मम शिवो बन्धुर्मम शिवः ।
तातो मम शिवो माता मम शिवः ॥ ६७॥

नेता मम शिवस्त्राता मम शिवः ।
राजा मम शिवो दैवं मम शिवः ॥ ६८॥

चक्षुर्मम शिवः श्रोत्रं मम शिवः ।
स्वान्तं मम शिवो बुद्धिर्मम शिवः ॥ ६९॥

वाणी मम शिवः प्राणो मम शिवः ।
आत्मा मम शिवः सर्वं मम शिवः ॥ ७०॥

अन्यप्रमृदितं स्वं देशमवितुम् ।
वीर्यं मम धियः संवर्धय विभो ॥ ७१॥

गायत्रमनघस्तोत्रं गणपतेः ।
एतच्छृणु दयायुक्तः पशुपते ॥ ७२॥

॥ इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनो-
र्गणपतेः कृतिः शिवस्तवराजः समाप्तः ॥

शिवसप्ततिनामस्तोत्रम्

देवानां श्रेष्ठ ईशानो भुवनस्याजरो वसुः ।
स्वधावान्सुहवो बभ्रुर्द्विबर्हा अरुषः कविः ॥ १॥

जलाषभेषजो भूरिभूरिर्दाता भिषक्तमः ।
स्थिरधन्वा क्षयद्वीरो रुद्रो गाथपतिः स्विषुः ॥ २॥

वेधाः सुधन्वा क्षिप्रेषुर्मरुत्वानसुरस्तवाः ।
त्वेषस्तिग्मायुधस्तव्यान्वज्रबाहुस्तवस्तमः ॥ ३॥

उपहत्नुः कल्मलीकी सुषुम्नो गर्तसद्युवा ।
दिवो वराहो वृषभो वंकुः स्विक्वानृदूदरः ॥ ४॥

स्वपिवातश्चेकितानः सुशिप्रः स्वयशाः श्रुतः ।
श्वित्सन्नृष्वः स्ववानेव यावभिः पशुपाः शुचिः ॥ ५॥

सहमानो मेधपतिः प्रचेताः सत्पतिर्बृहन् ।
पुरुरूपः कपर्द्युग्रः सुगन्धिः पुष्टिवर्धनः ॥ ६॥

शुक्रोऽषाहळो यज्ञसाधस्त्र्यम्बको मरुतां पिता ।
मीढ्वान्मीळ्हुष्टमो देवो भुवनस्य पिता शिवः ॥ ७॥

इतीयं सप्ततिर्नाम्नां रुद्रस्य निगमोद्धृता ।
सर्वपापप्रशमनी सर्वाभीष्टप्रदायिनी ॥ ८॥

॥ इति वासिष्ठसङ्कलितं शिवसप्ततिनामस्तोत्रम् ॥

शिवसप्तौ प्रोक्तानां नाम्नां चतुर्थ्यन्तरूपाणि

ॐ देवानां श्रेष्ठाय नमः।
ॐ भुवनस्य ईशानाय नमः।
ॐ अजराय नमः।
ॐ वसवे नमः।
ॐ स्वधावते नमः।
ॐ सुहवाय नमः।
ॐ बभ्रवे नमः।
ॐ द्विबर्हसे नमः।
ॐ अरुषाय नमः।
ॐ कवये नमः।
ॐ जलाषभेषजाय नमः।
ॐ भूरये नमः।
ॐ भूरेर्दात्रे नमः।
ॐ भिषक्तमाय नमः।
ॐ स्थिरधन्वने नमः।
ॐ क्षयद्वीराय नमः।
ॐ रुद्राय नमः।
ॐ गाथपतये नमः।
ॐ स्विषवे नमः।
ॐ वेधसे नमः।
ॐ सुधन्वने नमः।
ॐ क्षिप्रेषवे नमः।
ॐ मरुत्वते नमः।
ॐ असुराय नमः।
ॐ तवसे नमः।
ॐ त्वेषाय नमः।
ॐ तिग्मायुधाय नमः।
ॐ तव्यसे नमः।
ॐ वज्रबाहवे नमः।
ॐ तवस्तमसे नमः।
ॐ उपहत्नवे नमः।
ॐ कल्मलीकिने नमः।
ॐ सुषुम्नाय नमः।
ॐ गर्तसदे नमः।
ॐ यूने नमः।
ॐ दिवो वराहाय नमः।
ॐ वृषभाय नमः।
ॐ वङ्कवे नमः।
ॐ स्विक्वते नमः।
ॐ ऋदूदराय नमः।
ॐ स्वपिवाताय नमः।
ॐ चेकितानाय नमः।
ॐ सुशिप्राय नमः।
ॐ स्वयशसे नमः।
ॐ श्रुताय नमः।
ॐ श्वित्सते नमः।
ॐ नृष्वाय नमः।
ॐ एवयावभिः स्ववते नमः।
ॐ पशुपे नमः।
ॐ शुचये नमः।
ॐ सहमानाय नमः।
ॐ मेधपतये नमः।

ॐ प्रचेतसे नमः।
ॐ सत्पतये नमः ।
ॐ बृहते नमः।
ॐ पुरुरूपाय नमः।
ॐ कपर्दिने नमः।
ॐ उग्राय नमः।
ॐ सुगन्धये नमः।
ॐ पुष्टिवर्धनाय नमः।
ॐ शुक्राय नमः।
ॐ अषाह्ळाय नमः।
ॐ यज्ञसाधाय नमः।
ॐ त्र्यम्बकाय नमः।
ॐ मरुतां पित्रे नमः।
ॐ मीढ्वते नमः।
ॐ मीळ्हुष्टमाय नमः।
ॐ देवाय नमः।
ॐ भुवनस्य पित्रे नमः।
ॐ शिवाय नमः।



Kavyakantha Ganapati Muni

॥ एकोनविंशो गुच्छः ॥

1. तमसामभितो हन्ता चण्डिकाहासवासरः ॥
सतां हृदयराजीवविकासाय प्रकल्पताम् ॥

2. या निद्रा सर्वभूतानां योगनिद्रा रमापतेः ॥
ईश्वरी सा महाकाली महाकालसखीड्यताम् ॥

3. विरिञ्चिना स्तुते मातः कालि त्वं चेन्न मुञ्चसि ॥
मधुकैटभसंहारं माधवः कुरुतां कथम् ॥

4. वासवः काशनीकाशयशोऽलङ्कृतदिङ्मुखः ॥
महोऽतिविक्रमाद्यस्मादासीदाजौ पराङ्मुखः ॥

5. यत्प्रतापेन सन्तप्तो मन्ये बाडबरूपभृत्
भगवाननलोऽद्यापि सिन्धुवासं न मुञ्चति ॥

6. कुर्वतो येन सङ्ग्रामं भीषणं भीतचेतसः ॥
एष एवान्तको नाहमित्यासीदन्तकस्य धीः ॥

7. रणे येनातिरस्कृत्य विसृष्टोऽज्ञातिगौरवात् ॥
चिराय हरिदीशेषु कोणेशः प्राप्तवान्यशः ॥

8. यं नियन्तुमशक्तस्य कुर्वाणमसतीः क्रियाः ॥
नियन्तुरसतामासीत्पाशिनो मलिनं यशः ॥

9. यद्दोर्बलपराभूतो मन्दतामेत्य मारुतः ॥
बभूव क्षणदानेषु रतान्तपरिचारकः ॥

10. निधीन्येन जितो हित्वा राजराजः पलायितः ॥
व्यक्तं बभाण माधुर्यं प्राणानामखिलादपि ॥

11. यस्मिन्नुत्तरपूर्वस्या दिशएकादशाधिपाः ॥
कुण्ठा बभूवुरात्मीयकण्ठी ण्ठोपमितकीर्तयः ॥

12. बालस्येव क्रीडनकैः प्रवीरैर्यस्य खेलतः ॥
दधाति नलिनीबन्धुर्लीलाकन्दुकविभ्रमम् ॥

13. निजशुद्धान्तकान्तानामाननैरेव निर्जितम् ॥
त्न लज्जे यः पुनर्जित्वा शूरमानी सुधाकरम् ॥

14. त्रियामाचरशुद्धान्तभ्रूविलासनिवारणम् ॥
विष्णोस्सुदर्शनं चक्रं यस्य नापश्यदन्तरम् ॥

15. महिषं तं महावीर्यं या सर्वसुरदेहजा ॥
अवधीदसुरं तस्यै कत्यायन्यै नमो नमः ॥

16. मुखं नवासेचनकं ध्यायं ध्यायमगात्मजे ॥
मृगेन्द्रवाहे कालेन मृडस्त्वन्मुखतां गतः ॥

Facsimile of Muni`s Handwriting
(from an older version of Umasahasram)

इन्द्रसहस्रनामस्तोत्रम्

इन्द्रो देवतमोऽनीळः सुपर्णः पूर्णबन्धुरः ।
विश्वस्य दमिता विश्वस्येशानो विश्वचर्षणिः ॥ १॥

विश्वानि चक्रिर्विश्वस्मादुत्तरो विश्वभूर्बृहन् ।
चेकितानो वर्तमानः स्वधयाऽचक्रया परः ॥ २॥

विश्वानरो विश्वरूपो विश्वायुर्विश्वतस्पृथुः ।
विश्वकर्मा विश्वदेवो विश्वतो धीरनिष्कृतः ॥ ३॥

त्रिषुजातस्तिग्मशृङ्गो देवो ब्रध्नोऽरुषश्चरन् ।
रुचानः परमो विद्वान् अरुचो रोचयन्नजः ॥ ४॥

ज्येष्ठो जनानां वृषभो ज्योतिर्ज्येष्ठं सहोमहि ।
अभिक्रतूनां दमिता धर्ता विश्वस्य कर्मणः ॥ ५॥

धर्ता धनानां धातृणां धाता धीरो धियेषितः ।
यज्ञस्य साधनो यज्ञो यज्ञवाहा अपामजः ॥ ६॥

यज्ञं जुषाणो यजतो युक्तग्राव्णोऽवितेषिरः ।
सुवज्रश्च्यवनो योद्धा यशसो यज्ञियो यहुः ॥ ७॥

अवयाता दुर्मतीनां हन्ता पापस्य रक्षसः ।
कृशस्य चोदिता कृत्नुः कृतब्रह्मा धृतव्रतः ॥ ८॥

घृष्णवोजा अविताधीनां धनानां सञ्जिदच्युतः ।
विहन्ता तमसस्त्वष्टा तनूपास्तरुतातुरः ॥ ९॥

त्वेषनृम्णस्त्वेषसंदृक् तुराषाडपराजितः ।
तुग्ग्रावृधोदस्मतमः तुविकूर्मितमस्तुजः ॥ १०॥

वृषप्रभर्मा विश्वानि विद्वानाद र्दिरस्तवाः ।
मन्द्रो मतीनां वृषभो मरुत्वान्मरुतामृषिः ॥ ११॥

महाहस्ती गणपति र्धियं जिन्वो बृहस्पतिः ।
माहिनो मघवा मन्दी मर्कोऽर्को मेधिरो महान् ॥ १२॥

इति प्रथमं नामशतकम्

प्रतिरूपः परोमात्रः पुरुरूपः पुरुष्टुतः ।
पुरुहूतः पुरः स्थाता पुरुमायः पुरन्दरः ॥ १३॥

इति द्वितीयशतकप्रथमाष्टकेन सहाष्टोत्तरं नामशतकम् ।

पुरुप्रशस्तः पुरुकृत् पुरां दर्ता पुरूतमः ।
पुरुगूर्तः पृत्सुजेता पुरुवर्पाः प्रवेपनी ॥ १४॥

पप्रिः प्रचेताः परिभूः पनीयानप्रतिष्कुतः ।
प्रवृद्धः प्रवयाः पाता पूषण्वानन्तरा भरः ॥ १५॥

पुरुशाकः पाञ्चजन्यः पुरुभोजाः पुरूवसुः ।
पिशङ्गरातिः पपुरिः पुरोयोधः पृथुज्रयाः ॥ १६ ॥

प्ररिक्वा प्रदिवः पूर्व्यः पुरोभूः पूर्वजा ऋषिः ।
प्रणेता प्रमतिः पन्यः पूर्वयावा प्रभूवसुः ॥ १७ ॥

प्रयज्युः पावकः पूषा पदवीः पथिकृत्पतिः ।
पुरुत्मा पलितोहेता प्रहेता प्राविता पिता ॥ १८ ॥

पुरुनृम्णः पर्वतेष्ठाः प्राचामन्युः पुरोहितः ।
पुरांभिन्दुरनाधृष्यः पुराजाः पप्रथिन्तमः ॥ १९ ॥

पृतनाषाड् बाहुशर्धी बृहद्रेणुरनिष्टृतः ।
अभिभूतिरयोपाष्टिः बृहद्रेरपिधानवान् ॥ २० ॥

ब्रह्मप्रियो ब्रह्मजूतो ब्रह्मवाहा अरङ्गमः ।
बोधिन्मना अवक्रक्षी बृहद्भानुरमित्रहा ॥ २१ ॥

भूरिकर्मा भरेकृत्नुर्भद्रकृद्भार्वरोभृमिः ।
भरेषु हव्यो भूर्योजाः पुरोहा प्राशुषाट्प्रषाट् ॥ २२ ॥

प्रभङ्गीमहिषो भीमो भूर्यासुतिरशस्तिहा ।
प्रसक्षी विश्पतिर्वीरः परस्पाः शवसस्पतिः ॥ २३ ॥

इति द्वितीयं नामशतकम्

पुरुदत्रः पितृतमः पुरुक्षुर्भूरिगुः पणिः ।
प्रत्वाक्षाणः पुरां दर्मापनस्युरभिमातिहा ॥ २४॥

पृथिव्या वृषभः प्रत्नः प्रमन्दी प्रथमः पृथुः ।
त्यः समुद्रव्यचाः पायुः प्रकेतश्चर्षणीसहः ॥ २५॥

कारुधायाः कविवृधः कनीनः क्रतुमान्क्रतुः ।
क्षपांवस्ता कवितमो गिर्वाहाः कीरिचोदनः ॥ २६॥

क्षपावान्कौशिकः कारी राजाक्षम्यस्य गोपतिः ।
गौर्गोर्दुरो दुरोऽश्वस्य यवस्यदुर आदुरिः ॥ २७॥

चन्द्रबुध्नश्चर्षणिप्राश्चकृत्यश्चोदयन्मतिः ।
चित्रभानुश्चित्रतमश्चम्रीषश्चक्रमासजः ॥ २८॥

तुविशुष्मस्तुविद्युम्नस्तुविजातस्तुवीमघः ।
तुविकूर्मिस्तुविम्रक्षस्तुविशग्मस्तुविप्रतिः ॥ २९॥

तुविनृम्णस्तुविग्रीवस्तुविराधास्तुविक्रतुः ।
तुविमात्रस्तुविग्राभस्तुविदेष्णस्तुविष्वणिः ॥ ३०॥

तूतुजिस्तवसस्तक्वस्तुविग्रिस्तुर्वणिस्त्रदः ।
रथेष्ठस्तरणिस्तुम्रस्त्विषीमाननपच्युतः ॥ ३१॥

तोदस्तरुत्रस्तविषी मुषाणस्तविषस्तुरा ।
तितिर्वा ततुरिस्त्राता भूर्णिस्तूर्णिस्तवस्तरः ॥ ३२॥

यज्ञवृद्धो यज्ञियानां प्रथमो यज्वनो वृधः ।
अमित्रखादोऽनिमिषो विषुणोऽसुन्वतोऽजुरः ॥ ३३ ॥

अक्षितोतिरदाभ्योऽर्यः शिप्रिणीवानगोरुधः ।
आश्रुत्कर्णोऽन्तरिक्षप्रा अमितौजा अरिष्टुतः ॥ ३४ ॥

इति तृतीयं नामशतकम्

अदृष्ट एकराडूर्ध्व ऊर्ध्वसानः सनाद्युवा ।
स्थिरः सूर्यः स्वभूत्योजाः सत्यराधाः सनश्रुतः ॥ ३५ ॥

प्रकल्पः सत्त्वानां केतुरच्युतच्युदुरुव्यचाः ।
शवसी स्वपतिः स्वोजाः शचीवानविदीधयुः ॥ ३६ ॥

सत्यशुष्मः सत्यसत्वा सूनुः सत्यस्य सोमपाः ।
दस्योर्हन्ता दिवो धर्ता राजा दिव्यस्य चेतनः ॥ ३७ ॥

ऋग्मियोऽर्वा रोचमानो रभोदा ऋतपा ऋतः ।
ऋजीषी रणकृद्रेवा नृत्वियो रध्रचोदनः ॥ ३८ ॥

ऋष्वोरायोऽवनीराजा रयिस्थानो रदावसुः ।
ऋभुक्षा अनिमानोऽश्वः सहमानः समुद्रियः ॥ ३९ ॥

ऋणकातिर्गिर्वणस्युः कीजः खिद्वाखजङ्करः ।
ऋजीषो वसुविद्वेन्यो वाजेषु दधृषः कविः ॥ ४० ॥

विरप्शी वीळितो विप्रो विश्ववेदा ऋतावृधः ।
ऋतयुग्धर्मकृद्धेनुर्धनजिद्धामवर्मवाट् ॥ ४१॥

ऋतेजाः सक्षणिः सोम्यः संसृष्टजिद्दभुष्ठिरः ।
ऋतयुः सबलः सद्युर्वज्रवाहा ऋचीषमः ॥ ४२॥

ऋग्मीदधृष्वानृष्वौजाः सुगोपाः स्वयशस्तरः ।
स्वभिष्टिसुम्नः सेहानः सुनीतिः सुकृतः शुचिः ॥ ४३॥

ऋणयाः सहसः सूनुः सुदानुः सगणो वसुः ।
स्तोम्यः समद्वा सत्राहा स्तोमवाहा ऋतीषहः ॥ ४४॥

इति चतुर्थं नामशतकम्

शविष्ठः शवसः पुत्रः शतमन्युः शतक्रतुः ।
शक्रः शिक्षानरः शुष्मी श्रुत्कर्णः श्रवयत्सखा ॥ ४५॥

शतमूतिः शर्धनीतिः शतनीथः शतामघः ।
श्लोकी शिवतमः श्रुत्यं नामबिभ्रदनानतः ॥ ४६॥

शूरः शिप्री सहस्रोतिः शुभ्रः शृङ्गवृषोनपात् ।
शासः शाकी श्रवस्कामः शवसावानहंसनः ॥ ४७॥

सुरूपकृत्नुरीशानः शूशुवानः शचीपतिः ।
सतीनसत्वा सनिता शक्तीवानमितक्रतुः ॥ ४८॥

सहस्रचेताः सुमनाः श्रुत्यः शुद्धः श्रुतामघः ।
सत्रादावा सोमपावा सुक्रतुः श्मश्रुषु श्रितः ॥ ४९॥

चोदप्रवृद्धो विश्वस्य जगतः प्राणतस्पतिः ।
चौत्नः सुप्रकरस्नोना चकमानः सदावृधः ॥ ५०॥

स्वभिष्टिः सत्पतिः सत्यश्चारुर्वीरतमश्चती ।
चित्रश्चिकित्वानाज्ञाता प्रतिमानं सतः सतः ॥ ५१॥

स्थाता सचेताः सदिवः सुदंसाः सुश्रवस्तमः ।
सहोदाः सुश्रुतः सम्राट्सुपारः सुन्वतः सखा ॥ ५२॥

ब्रह्मवाहस्तमो ब्रह्मा विष्णुर्वस्वःपतिर्हरिः ।
रणाय संस्कृतो रुद्रो रणितेशानकृच्छिवः ॥ ५३॥

विप्रजूतो विप्रतमो यह्वो वज्री हिरण्ययः ।
वव्रो वीरतरोवायुर्मातरिश्वा मरुत्सखा ॥ ५४॥

गूर्तश्रवा विश्वगूर्तो वन्दनश्रुद्विचक्षणः ।
वृष्णिर्वसुपतिर्वाजी वृषभो वाजिनी वसुः ॥ ५५॥

इति पञ्चमं नामशतकम्

विग्रो विभीषणो वह्निर्वृद्धायुर्विश्रुतो वृषा ।
वज्रभृद्वृत्रहा वृद्धो विश्ववारो वृतञ्चयः ॥ ५६॥

6

वृषजूतिर्वृषरथो वृषभान्नो वृषक्रतुः ।
वृषकर्मा वृषमणाः सुदक्षः सुन्वतो वृधः ॥ ५७ ॥

अद्रोघवागसुरहा वेधाः सत्राकरोऽजरः ।
अपारः सुहवोऽभीरुरभिभङ्गोऽङ्गिरस्तमः ॥ ५८ ॥

अमर्त्यः स्वायुधोऽशत्रुरप्रतीतोऽभिमातिषाट् ।
अमत्री सूनुरर्चत्र्यः स्मद्दिष्टिरभयङ्करः ॥ ५९ ॥

अभिनेता स्पार्हराधाः सप्तरश्मिरभिष्टिकृत् ।
अनर्वास्वर्जिदिष्कर्ता स्तोतृणामवितोपरः ॥ ६० ॥

अजातशत्रुः सेनानी रुभयाव्युभयङ्करः ।
उरुगायः सत्ययोनिः सहस्वानुर्वरापतिः ॥ ६१ ॥

उग्रो गोपा उग्रबाहुरुग्रधन्वोक्थवर्धनः ।
गाथश्रवा गिरां राजा गम्भीरो गिर्वणस्तमः ॥ ६२ ॥

वज्रहस्तचर्षणीनां वृषभो वज्रदक्षिणः ।
सोमकामः सोमपतिः सोमवृद्धः सुदक्षिणः ॥ ६३ ॥

सुब्रह्मा स्थविरः सूरः सहिष्ठः सप्रथाः सराट् ।
हरिश्मशारुर्हरिवान्हरीणां पतिरस्तृतः ॥ ६४ ॥

हिरण्यबाहुरुर्व्यूतिर्हरिकेशो हिरीमशः ।
हरिशिप्रो हर्यमाणो हरिजातो हरिम्भरः ॥ ६५ ॥

हिरण्यवर्णो हर्यश्वो हरिवर्पा हरिप्रियः ।
हनिष्ठो हर्यक्ष्वो हव्यो हरिष्ठा हरियोजनः ॥ ६६ ॥

इति षष्ठं नामशतकम्

सत्वासुशिप्रः सुक्षत्रः सुवीरः सुतपा ऋषिः ।
गाथान्यो गोत्रभिद्ग्रामं वहमानो गवेषणः ॥ ६७ ॥

जिष्णुस्तस्थुष ईशान ईशानो जगतो नृतुः ।
नर्याणि विद्वान्नृपतिः नेतानृम्णस्य तूतुजिः ॥ ६८ ॥

निमेघमानो नर्यापाः सिन्धूनां पतिरुत्तरः ।
नर्यो नियुत्वान्निचितो नक्षद्दाभोनहुष्टरः ॥ ६९ ॥

नव्यो निधाता नृमणाः सध्रीचीनः सुतेरणः ।
नृतमानो नदनुमान्नवीयान्नृतमोनृजित् ॥ ७० ॥

विचयिष्ठो वज्रबाहुर्वृत्रखादोवलं रुजः ।
जातूभर्मा ज्येष्ठतमो जनभक्षो जनंसहः ॥ ७१ ॥

विश्वाषाड्वंसगोवस्यान्निष्पाडशनिमान्नृषाट् ।
पूर्भित्पुराषाडभिषाट् जगतस्तस्थुषस्पतिः ॥ ७२ ॥

संवृक्समत्सुसन्धाता सुसं दृक्सविताऽरुणः ।
स्वर्यः स्वरोचिः सुत्रामा स्तुषेय्यः सनजाः स्वरिः ॥ ७३ ॥

कृण्वन्नकेतवे केतुं पेशः कृण्वन्नपेशसे ।
वज्रेण हत्वी महिनो मरुत्स्तोत्रो मरुद्गणः ॥ ७४॥

महावीरो महाव्रातो महाय्यः प्रमतिर्मही ।
माता मघोनां मंहिष्ठो मन्युमीर्मन्युमत्तमः ॥ ७५॥

मेषो महीवृन्मन्दानो माहिनावान्महेमतिः ।
म्रक्षोमृळीको मंहिष्ठो म्रक्षकृत्वा महामहः ॥ ७६॥

मदच्युन्मर्डितामद्वा मदानां पतिरातपः ।
सुशस्तिः स्वस्तिदाः स्वर्दृग्राधानामाकरः पतिः ॥ ७७॥

इति सप्तमं नामशतकम्

इषुहस्त इषां दाता वसुदाता विदद्वसुः ।
विभूतिर्व्यानाशिर्वेनो वरीयान् विश्वजिद्विभुः ॥ ७८॥

नृचक्षाः सहुरिः स्वर्वित्सुयज्ञः सुष्ठुतः स्वयुः ।
आपिः पृथिव्या जनिता सूर्यस्य जनिता श्रुतः ॥ ७९॥

स्प ड्विहायाः स्मत्पुरन्धिर्वृषपर्वा वृषन्तमः ।
साधारणः सुखरथः स्वश्वः सत्राजिदद्भुतः ॥ ८०॥

ज्येष्ठराजो जीरदानुर्जग्मिर्वित्वक्षणो वशी ।
विधाता विश्वमा आशुर्मायी वृद्धमहावृधः ॥ ८१॥

वरेण्यो विश्वतूर्वातस्येशानो द्यौर्विचर्षणिः ।
सतीनमन्युर्गोदत्रः सद्योजातोविभञ्जनुः ॥ ८२॥

वितन्तसाय्यो वाजानां विभक्ता वस्व आकरः ।
वीरको वीरयुर्वज्रं बभ्रिर्वीरेण्य आघृणिः ॥ ८३॥

वाजिनेयो वाजसनिर्वाजानां पतिराजिकृत् ।
वास्तोष्पतिर्वर्पणीतिर्विशां राजा वपोदरः ॥ ८४ ॥

विभूतद्युम्न आचक्रिरादारी दोधतो वधः ।
आखण्डलो दस्मवर्चाः सर्वसेनो विमोचनः ॥ ८५॥

वज्रस्य भर्ता वार्याणां पतिर्गोजिद्गवां पतिः ।
विश्वव्यचाः सञ्चकानः सुहार्दो जनिता दिवः ॥ ८६॥

समन्तुनामा पुरुध प्रतीको बृहतः पतिः ।
दीध्यानो दामनो दाता दीर्घश्रवस ऋभ्वसः ॥ ८७॥

दंसनावान्दिवः संम्राड्देवजूतो दिवावसुः ।
दशमो देवता दक्षो दुध्रोद्युम्नी द्युमन्तमः ॥ ८८॥

इत्यष्टमं नामशतकम्

मंहि ष्ठरातिरित्थाधीर्दीद्यानो दधृषिर्दुधिः ।
दुष्टरीतुर्दुश्च्यवनो दिवोमानो दिवोवृषा ॥ ८९॥

दक्षाय्यो दस्युहाधृष्णुः दक्षिणावान् धियावसुः ।
धनस्पृद्धृषितो धाता दयमानो धनञ्जयः ॥ ९० ॥

दिव्यो द्विबर्हाः सन्नार्यः समर्यस्त्राः सिमः सखा ।
द्युक्षः समानो दंसिष्ठो राधसः पतिरध्रिगुः ॥ ९१ ॥

सम्राट् पृथिव्या ओजस्वान् वयोधा ऋतुपा ऋभुः ।
एको राजैधमानद्विडेकवीर उरुज्रयाः ॥ ९२ ॥

लोककृज्जनिताऽश्वानां जोहूत्रो जनिता गवाम् ।
जरिता जनुषां राजा गिर्वणाः सुन्वतोऽविता ॥ ९३ ॥

अत्कं वसानः कृष्टीनां राजोक्थ्यः शिप्रवानुरुः ।
ईड्योदाश्वानिनतमो घोरः सङ्क्रन्दनः स्ववान् ॥ ९४ ॥

जागृविर्जगतो राजा गृत्सो गोविद्धनाघनः ।
जेताऽभिभूरकूपारो दानवानसुरोऽर्णवः ॥ ९५ ॥

धृष्विर्दमूनास्तवसस्तवीयानन्तमोऽवृतः ।
रायोदाता रयिपतिः विपश्चिद्वृत्रहन्तमः ॥ ९६ ॥

अपरीतः षाळपश्चाद् दध्वायुत्कार आरितः ।
वोह्ळावनिष्ठो वृष्ण्यावान्वृषण्वानवृकोऽवतः ॥ ९७ ॥

गर्भोऽसमष्टकाव्योयुगहिशुष्मोदधृष्वणिः ।
प्रत्नः पतिर्वाजदावा ज्योतिः कर्ता गिरां पतिः ॥ ९८ ॥

इति नवमं नामशतकम्

अनवद्यः सम्भृताश्वो वज्रिवादद्रिवान्द्युमान् ।
दस्मो यजत्रो योधीयानकवारिर्यतङ्करः ॥ ९९ ॥

पृदाकुसानुरोजीयान् ब्रह्मणश्चोदिता यमः ।
वन्दनेष्ठाः पुरां भेत्ता बन्धुरेष्ठा बृहद्दिवः ॥ १०० ॥

वरूता मधुनो राजा प्रणेनीः पप्रथी युवा ।
उरुशंसोहवंश्रोता भूरिदावा बृहच्छ्रवाः ॥ १०१ ॥

माता स्तियानां वृषभो महोदाता महावधः ।
सुग्म्यः सुराधाः सत्राषाडोदतीनां नदोधुनिः ॥ १०२ ॥

अकामकर्शनः स्वर्षाः सुमृळीकः सहस्कृतः ।
पास्त्यस्य होता सिन्धूनां वृषाभोजो रथीतमः ॥ १०३ ॥

सखा मुनीनां जनिदाः स्वधावानसमोऽप्रतिः ।
मनस्वानध्वरो मर्यो बृबदुक्थोऽविता भगः ॥ १०४ ॥

अषाह्ळोऽरीह्ळ आदर्ता वीरं कर्ता विशस्पतिः ।
एकः पतिरिनः पुष्टिः सुवीर्यो हरिपाः सुदृक् ॥ १०५ ॥

एको हव्यः सनादारुगोकोवाकस्य सक्षणिः ।
सुवृक्तिरमृतोऽमृक्तः खजकृद्वलदाः शुनः ॥ १०६ ॥

अमत्रो मित्र आकाय्यः सुदामाब्जिन् महोमही ।
रथः सुबाहुरुशना सुनीथो भूरिदाः सुदाः ॥ १०७ ॥

मदस्य राजा सोमस्य पीत्वीज्यायान्दिवः पतिः ।
तविषीवान्घनो युध्मो हवनश्रुत्सहः स्वराट् ॥ १०८॥

॥ इति दशमं नामशतकम् ॥

अत्रेमे भवन्त्युपसंहारश्लोकाः

इदं सहस्रमिन्द्रस्य नाम्नां परमपावनम् ।
ऋग्वेदतो गणपतिः सङ्गृह्य विनिबद्धवान् ॥ १॥

नात्र नाम्नः पौनरुक्त्यं न 'च' कारादि पूरणम् ।
श्लोकमध्ये न चारम्या शतकस्योपसंहृतिः ॥ २॥

नाम्नामेषां छान्दसत्वात्सर्वेषां च स्वरूपतः ।
अवलोक्या यथा छन्दः शब्दशुद्धिर्विचक्षणैः ॥ ३॥

अनेकपदनामानि विनियोज्यानि पूजने ।
चतुर्थ्यन्तप्रयोगेषु व्युत्क्रमाच्च यथान्वयम् ॥ ४॥

अस्य नामसहस्रस्य वेदमूलस्य सेवने ।
पूर्णं फलं तद्विज्ञेयं यत्स्वाध्यायनिषेवणे ॥ ५॥

मन्त्रेभ्यः सम्भृतं सारमेतन्नामसहस्रकम् ।
ऐन्द्रं यो भजते भक्त्या तस्य स्युः सिद्धयो वशे ॥ ६॥

इन्द्रो विजयते देवः सर्वस्य जगतः पतिः ।
वेदमूलं जयत्येतत्तस्य नामसहस्रकम् ॥ ७॥

॥ इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनो-
र्गणपतेः कृतिः इन्द्रसहस्रनामस्तोत्रं सम्पूर्णम् ॥

इन्द्रसहस्रनामावली

इन्द्रसहस्रनामस्तोत्रे प्रोक्तानां नाम्नां चतुर्थ्यन्तरूपाणि

ॐ इन्द्राय नमः। ॐ देवतमाय नमः। ॐ अनीळाय सुपर्णाय नमः। ॐ पूर्णबन्धुराय नमः। ॐ विश्वस्य दमित्रे नमः। ॐ विश्वस्येशानाय नमः। ॐ विश्वचर्षणये नमः। ॐ विश्वानिचक्रये नमः। ॐ विश्वस्मादुत्तराय नमः। ॐ विश्वभूवे नमः। ॐ बृहते नमः। ॐ चेकितानाय नमः। ॐ अचक्रयास्वधयावर्तमानाय नमः। ॐ परस्मै नमः। ॐ विश्वानराय नमः। ॐ विश्वरूपाय नमः। ॐ विश्वायुषे नमः। ॐ विश्वतस्पृथवे नमः। ॐ विश्वकर्मणे नमः। ॐ विश्वदेवाय नमः। ॐ विश्वतो धिये नमः। ॐ अनिष्कृतायः नमः। ॐ त्रिषुजाताय नमः। ॐ तिग्मशृङ्गाय नमः । ॐ देवाय नमः । ॐ ब्रध्नाय नमः। ॐ अरुषाय नमः। ॐ चरते नमः। ॐ रुचानाय नमः। ॐ परमाय नमः। ॐ विदुषे नमः। ॐ अरुचोरोचयते नमः। ॐ अजाय नमः। ॐ ज्येष्ठाय नमः। ॐ जनानां वृषभाय नमः। ॐ ज्योतिषे नमः। ॐ ज्येष्ठाय सहसे नमः। ॐ महिने नमः। ॐ अभिक्रतूनां दमित्रे नमः। ॐ विश्वस्य कर्मणो धर्त्रे नमः। ॐ धनानां धर्त्रे नमः। ॐ धातॄणां धात्रे नमः। ॐ धीराय नमः। ॐ धियेषिताय नमः। ॐ यज्ञस्य साधनाय नमः। ॐ यज्ञाय नमः।

ॐ यज्ञवाहसे नमः। ॐ अपामजाय नमः। ॐ यज्ञं जुषाणाय नमः। ॐ यजताय नमः। ॐ युक्तग्राव्णोऽवित्रे नमः। ॐ इषिराय नमः। ॐ सुवज्राय नमः। ॐ च्यवनाय नमः। ॐ योद्ध्रे नमः। ॐ यशसाय नमः। ॐ यज्ञियाय नमः। ॐ यहवे नमः। ॐ दुर्मर्तानामवयात्रे नमः। ॐ पापस्य रक्षसो हन्त्रे नमः। ॐ कृशस्य चोदित्रे नमः। ॐ कृत्नवे नमः। ॐ कृतब्रह्मणे नमः। ॐ धृतव्रताय नमः। ॐ घृष्ण्वोजसे नमः। ॐ धीनामवित्रे नमः। ॐ धनानां सञ्जिते नमः। ॐ अच्युताय नमः। ॐ तमसो विहन्त्रे नमः। ॐ त्वष्ट्रे नमः। ॐ तनूपे नमः। ॐ तरुत्रे नमः। ॐ तुराय नमः। ॐ त्वेषनृम्णाय नमः। ॐ त्वेषसंदृशे नमः। ॐ तुरासाहे नमः। ॐ अपराजिताय नमः। ॐ तुग्र्या-वृधाय नमः। ॐ दस्मतमाय नमः। ॐ तुविकूर्मितमाय नमः। ॐ तुजाय नमः। ॐ वृषप्रभर्मणे नमः। ॐ विश्वानि विदुषे नमः। आद दिराय नमः। ॐ तवसे नमः। ॐ मन्द्राय नमः। ॐ मतीनां वृषभाय नमः। ॐ मरुत्वते नमः। ॐ मरुतामृषये नमः। ॐ महाहस्तिने नमः। ॐ गणपतये नमः। ॐ धियं जिन्वाय नमः। ॐ बृहस्पतये नमः। ॐ माहिनाय नमः। ॐ मघोने नमः। ॐ मन्दीने नमः। ॐ मर्काय नमः। ॐ अर्काय नमः। ॐ मेधिराय नमः। ॐ महते नमः। ॐ प्रतिरूपाय नमः। ॐ परोमात्राय नमः। ॐ पुरुरूपाय नमः। ॐ पुरुष्टुताय नमः। ॐ पुरुहूताय नमः। ॐ पुरःस्थात्रे नमः। ॐ पुरुमायाय नमः। ॐ पुरन्दराय नमः। ॐ पुरुप्रशस्ताय नमः। ॐ पुरुकृते नमः। ॐ पुरां दर्त्रे नमः। ॐ पुरूतमाय नमः। ॐ पुरुगूर्ताय नमः। ॐ पृत्सुजेत्रे नमः। ॐ पुरुवर्पसे नमः। ॐ प्रवेपनिने नमः। ॐ पप्रये नमः। ॐ प्रचेतसे नमः। ॐ परिभुवे नमः। ॐ पनीयसे नमः। ॐ अप्रतिष्कुताय नमः। ॐ प्रवृद्धाय नमः। ॐ प्रवयसे नमः। ॐ पात्रे नमः। ॐ पूषण्वते नमः। ॐ अन्तराभराय नमः। ॐ पुरुशाकाय नमः। ॐ पाञ्चजन्याय नमः। ॐ पुरुभोजसे नमः। ॐ पुरूवसवे नमः। ॐ पिशङ्गरातये नमः। ॐ पपुरये नमः। ॐ पुरोयोधाय नमः। ॐ पृथुज्रयसे नमः। ॐ प्ररिक्वने नमः। ॐ प्रदिवाय नमः। ॐ पूर्व्याय नमः। ॐ पुरोभुवे नमः। ॐ पूर्वजे ऋषये नमः। ॐ प्रणेत्रे नमः। ॐ प्रमतये नमः। ॐ पन्याय नमः। ॐ पूर्वयाव्ने नमः। ॐ प्रभूवसवे नमः। ॐ प्रयज्यवे नमः। ॐ पावकाय नमः। ॐ पूष्णे नमः।

ॐ पदव्ये नमः। ॐ पथिकृते नमः। ॐ पत्ये नमः। ॐ पुरुत्मते नमः। ॐ पलिताय नमः। ॐ हेत्रे नमः। ॐ प्रहेत्रे नमः। ॐ प्रावित्रे नमः। ॐ पित्रे नमः। ॐ पुरुनृम्णाय नमः। ॐ पर्वतेष्ठे नमः। ॐ प्राचामन्यवे नमः। ॐ पुरोहिताय नमः। ॐ पुरां भिन्दवे नमः। ॐ अनाधृष्याय नमः। ॐ पुराजे नमः। ॐ पप्रथिन्तमाय नमः। ॐ पृतनासाहे नमः। ॐ बाहु-शर्धिने नमः। ॐ बृहद्रेणवे नमः। ॐ अनिष्टृताय नमः। ॐ अभिभूतये नमः। ॐ अयोपाष्टये नमः। ॐ बृहद्रये नमः। ॐ अपिधानवते नमः। ॐ ब्रह्मप्रियाय नमः। ॐ ब्रह्मजूताय नमः। ॐ ब्रह्मवाहसे नमः। ॐ अरङ्गमाय नमः। ॐ बोधिन्मनसे नमः। ॐ अवक्रक्षिणे नमः। ॐ बृहद्भानवे नमः। ॐ अमित्रघ्ने नमः। ॐ भूरिकर्मणे नमः। ॐ भरेकृत्वे नमः। ॐ भद्रकृते नमः। ॐ भार्वराय नमः। ॐ भृमये नमः। ॐ भरेषुहव्याय नमः। ॐ भूर्योजसे नमः। ॐ पुरोघ्ने नमः। ॐ प्राशुसाहे नमः। ॐ प्रसाहे नमः। ॐ प्रभङ्गिने नमः। ॐ महिषाय नमः। ॐ भीमाय नमः। ॐ भूर्यासुतये नमः। ॐ अशस्तिघ्ने नमः। ॐ प्रसक्षिणे नमः। ॐ विश्पतये नमः। ॐ वीराय नमः। ॐ परस्पे नमः। ॐ शवसस्पत्ये नमः। ॐ पुरुदत्राय नमः। ॐ पितृतमाय नमः। ॐ पुरुक्षवे नमः। भूरिगवे नमः। ॐ पणाये नमः। ॐ प्रत्वक्षणाय नमः। ॐ पुरां दर्मणे नमः। ॐ पनस्यवे नमः। ॐ अभिमातिघ्ने नमः। ॐ पृथिव्या वृषभाय नमः। ॐ प्रत्नाय नमः। ॐ प्रमन्दिने नमः। ॐ प्रथमस्मै नमः। ॐ पृथवे नमः। ॐ त्यस्मै नमः। ॐ समुद्रव्यचसे नमः। ॐ पायवे नमः। ॐ प्रकेताय नमः। ॐ चर्षणीसहाय नमः। ॐ कारुधायसे नमः। ॐ कविवृधाय नमः। ॐ कनीनाय नमः। ॐ क्रतुमते नमः। ॐ क्रतवे नमः। ॐ क्षपां वस्त्रे नमः। ॐ कवितमाय नमः। ॐ गिर्वाहसे नमः। ॐ कीरिचोदनाय नमः। ॐ क्षपावते नमः। ॐ कौशिकाय नमः। ॐ कारिणे नमः। ॐ क्षम्यस्य राज्ञे नमः। ॐ गोपतये नमः। ॐ गवे नमः। ॐ गोर्दुराय नमः। ॐ अश्वस्य दुराय नमः। ॐ यवस्य दुराय नमः। ॐ आदुरये नमः। ॐ चन्द्रबुध्नाय नमः। ॐ चर्षणिप्रे नमः। ॐ चर्कृत्याय नमः। ॐ चोदयन्मतये नमः। ॐ चित्रभानवे नमः। ॐ चित्रतमाय नमः। ॐ चम्रीषाय नमः। ॐ चक्रमासजाय नमः। ॐ तुविशुष्माय नमः।

ॐ तुविद्युम्नाय नमः। ॐ तुविजाताय नमः। ॐ तुवीमघाय नमः। ॐ तुविकूर्मये नमः। ॐ तुविम्रक्षाय नमः। ॐ तुविशग्माय नमः। ॐ तुविप्रतये नमः। ॐ तुविनृम्णाय नमः। ॐ तुविग्रीवाय नमः। ॐ तुविराधसे नमः। ॐ तुविक्रतवे नमः। ॐ तुविमात्राय नमः। ॐ तुविग्राभाय नमः। ॐ तुविदेष्णाय नमः। ॐ तुविष्वणये नमः। ॐ तूतुजये नमः। ॐ तवसाय नमः। ॐ तक्वाय नमः। ॐ तुविग्रये नमः। ॐ तुर्वणये नमः। ॐ त्रदाय नमः। ॐ रथेष्ठाय नमः। ॐ तरणये नमः। ॐ तुम्राय नमः। ॐ त्विषीमते नमः। ॐ अनपच्युताय नमः। ॐ तोदाय नमः। ॐ तरुत्राय नमः। ॐ तविषीमुषाणाय नमः। ॐ तविषाय नमः। ॐ तुर्णे नमः। ॐ तितिर्वणे नमः। ॐ ततुरये नमः। ॐ त्रात्रे नमः। ॐ भूर्णये नमः। ॐ तूर्णये नमः। ॐ तवस्तराय नमः। ॐ यज्ञवृद्धाय नमः। ॐ यज्ञियानां प्रथमस्मै नमः। ॐ व्यज्वनो वृधाय नमः। ॐ अमित्रखादाय नमः। ॐ अनिमिषाय नमः। ॐ असुन्वतो विषुणाय नमः। ॐ अजुराय नमः। ॐ अक्षितोतये नमः। ॐ अदाभ्याय नमः। ॐ अर्याय नमः। ॐ शिप्रिणीवते नमः। ॐ अगोरुधाय नमः। ॐ आश्रुत्कर्णाय नमः। ॐ अन्तरिक्षप्रे नमः। ॐ अमितौजसे नमः। ॐ अरिष्टुताय नमः। ॐ अदृष्टाय नमः। ॐ एकराजे नमः। ॐ ऊर्ध्वाय नमः। ॐ ऊर्ध्वसानाय नमः। ॐ सनाद्यूने नमः। ॐ स्थिराय नमः। ॐ सूर्याय नमः। ॐ स्वभूत्योजसे नमः। ॐ सत्यराधसे नमः। ॐ सनश्रुताय नमः। ॐ अकल्पाय नमः। ॐ सत्वनां केतवे नमः। ॐ अच्युतच्युते नमः। ॐ उरुव्यचसे नमः। ॐ शवसिने नमः। ॐ स्वपतये नमः। ॐ स्वौजसे नमः। ॐ शचीवते नमः। ॐ अविदीधयवे नमः। ॐ सत्यशुष्माय नमः। ॐ सत्यसत्वने नमः। ॐ सत्यस्य सूनवे नमः। ॐ सोमपे नमः। ॐ दस्योर्हन्त्रे नमः। ॐ दिवो धर्त्रे नमः। ॐ दिव्यस्य राज्ञे नमः। ॐ चेतनाय नमः। ॐ ऋग्मियाय नमः। ॐ अर्वणे नमः। ॐ रोचमानाय नमः। ॐ रभोदे नमः। ॐ ऋतपे नमः। ॐ ऋताय नमः। ॐ ऋजीषिणे नमः। ॐ रणाकृते नमः। ॐ रेवते नमः। ॐ ऋत्वियाय नमः। ॐ रध्रचोदननाय नमः। ॐ ऋष्वाय नमः। ॐ रायोऽवनये नमः। ॐ राज्ञे नमः। ॐ रयिस्थानाय नमः। ॐ रदावसवे नमः। ॐ ऋभुक्षणे नमः।

ॐ अनिमानाय नमः। ॐ अश्वाय नमः। ॐ सहमानाय नमः। ॐ समुद्रियाय नमः। ॐ ऋणकातये नमः। ॐ गिर्वणस्यवे नमः। ॐ कीजाय नमः। ॐ खिद्वने नमः। ॐ खजङ्कराय नमः। ॐ ऋजीषाय नमः। ॐ वसुविदे नमः। ॐ वेन्याय नमः। ॐ वाजेषुदधृषाय नमः। ॐ कवये नमः। ॐ विरप्शिने नमः। ॐ वीळिताय नमः। ॐ विप्राय नमः। ॐ विश्ववेदसे नमः। ॐ ऋतावृधाय नमः। ॐ ऋतयुजे नमः। ॐ धर्मकृते नमः। ॐ धेनवे नमः। ॐ धनजिते नमः। ॐ धाम्ने नमः। ॐ वर्मणे नमः। ॐ वाहे नमः। ॐ ऋतेजसे नमः। ॐ सक्षणये नमः। ॐ सोम्याय नमः। ॐ संसृष्टजिते नमः। ॐ ऋभुष्ठिराय नमः। ॐ ऋतयवे नमः। ॐ सबलाय नमः। ॐ सह्ववे नमः। ॐ वज्रवाहसे नमः। ॐ ऋचीषमाय नमः। ॐ ऋग्मिने नमः। ॐ दधृष्वते नमः। ॐ ऋष्वौजसे नमः। ॐ सुगोपे नमः। ॐ स्वयशस्तराय नमः। ॐ स्वभिष्टिसुम्नाय नमः। ॐ सेहानाय नमः। ॐ सुनीतये नमः। ॐ सुकृताय नमः। ॐ शुचये नमः। ॐ ऋणये नमः। ॐ सहसः सूनवे नमः। ॐ सुदानवे नमः। ॐ सगणाय नमः। ॐ वसवे नमः। ॐ स्तोम्याय नमः। ॐ समद्वने नमः। ॐ सत्राघ्ने नमः। ॐ स्तोमवाहसे नमः। ॐ ऋतीषहाय नमः। ॐ शविष्ठाय नमः। ॐ शवसः पुत्राय नमः। ॐ शतमन्यवे नमः। ॐ शतक्रतवे नमः। ॐ शक्राय नमः। ॐ शिक्षानराय नमः। ॐ शुष्मिणे नमः। ॐ श्रुत्कर्णाय नमः। ॐ श्रवयत्सख्ये नमः। ॐ शतमूतये नमः। ॐ शर्धनीतये नमः। ॐ शतनीथाय नमः। ॐ शतामघाय नमः। ॐ श्लोकिने नमः। ॐ शिवतमाय नमः। ॐ श्रुत्यं नाम बिभ्रते नमः। ॐ अनानताय नमः। ॐ शूराय नमः। ॐ शिप्रिणे नमः। ॐ सहस्रोतये नमः। ॐ शुभ्राय नमः। ॐ शृ ङ्गवृषोनपाते नमः। ॐ शासाय नमः। ॐ शाकाय नमः। ॐ श्रवस्कामाय नमः। ॐ शवसावते नमः। ॐ अहंसनाय नमः। ॐ सुरूपकृत्नवे नमः। ॐ ईशानाय नमः। ॐ शूशुवानाय नमः। ॐ शचीपतये नमः। ॐ सतीनसत्वने नमः। ॐ सनित्रे नमः। ॐ शक्तीवते नमः। ॐ अमितक्रतवे नमः। ॐ सहस्रचेतसे नमः। ॐ सुमनसे नमः। ॐ श्रुत्याय नमः। ॐ शुद्धाय नमः। ॐ श्रुतामघाय नमः। ॐ सत्रादाव्ने नमः। ॐ सोमपाव्ने नमः। ॐ सुक्रतवे नमः।

ॐ श्मश्रुषुश्रिताय नमः। ॐ चोदप्रवृद्धाय नमः। ॐ विश्वस्य जगतः प्राणतस्पतये नमः। ॐ चौत्नाय नमः। ॐ सुप्रकरत्नाय नमः। ॐ नरे नमः। ॐ चकमानाय नमः। ॐ सदावृधाय नमः। ॐ स्वभिष्टये नमः। ॐ सत्पतये नमः। ॐ सत्याय नमः। ॐ चारवे नमः। ॐ वीरतमाय नमः। ॐ चतिने नमः। ॐ चित्राय नमः। ॐ चिकितुषे नमः। ॐ आज्ञात्रे नमः। ॐ सतःसतःप्रतिमानाय नमः। ॐ स्थात्रे नमः। ॐ सचेतसे नमः। ॐ सदिवाय नमः। ॐ सुदंससे नमः। ॐ सुश्रवस्तमाय नमः। ॐ सहोदे नमः। ॐ सुश्रुताय नमः। ॐ सम्राजे नमः। ॐ सुपाराय नमः। ॐ सुन्वतः सख्ये नमः। ॐ ब्रह्मवाहस्तमाय नमः। ॐ ब्रह्मणे नमः। ॐ विष्णवे नमः। ॐ वस्वःपतये नमः। ॐ हरये नमः। ॐ रणायसंस्कृताय नमः। ॐ रुद्राय नमः। ॐ रणित्रे नमः। ॐ ईशानकृते नमः। ॐ शिवाय नमः। ॐ विप्रजूताय नमः। ॐ विप्रतमाय नमः। ॐ यह्वाय नमः। ॐ वज्रिणे नमः। ॐ हिरण्याय नमः। ॐ वव्राय नमः। ॐ वीरतराय नमः। ॐ वायवे नमः। ॐ मातरिश्वने नमः। ॐ मरुत्सख्ये नमः। ॐ गूर्तश्रवसे नमः। ॐ विश्वगूर्ताय नमः। ॐ वन्दनश्रुते नमः। ॐ विचक्षणाय नमः। ॐ वृष्णये नमः। ॐ वसुपतये नमः। ॐ वाजिने नमः। ॐ वृषभाय नमः। ॐ वाजिनीवसवे नमः। ॐ विग्राय नमः। ॐ विभीषणाय नमः। ॐ वह्नये नमः। ॐ वृद्धायवे नमः। ॐ विश्रुताय नमः। ॐ वृष्णे नमः। ॐ वज्रभृते नमः। ॐ वृत्रघ्ने नमः। ॐ वृद्धाय नमः। ॐ विश्ववाराय नमः। ॐ वृतञ्चयाय नमः। ॐ वृषजूतये नमः। ॐ वृषरथाय नमः। ॐ वृषभान्नाय नमः। ॐ वृषक्रतवे नमः। ॐ वृषकर्मणे नमः। ॐ वृषमणसे नमः। ॐ सुदक्षाय नमः। ॐ सुन्वतो वृधाय नमः। ॐ अद्रोघवाचे नमः। ॐ असुरघ्ने नमः। ॐ वेधसे नमः। ॐ सत्राकराय नमः। ॐ अजराय नमः। ॐ अपाराय नमः। ॐ सुहवाय नमः। ॐ अभीरवे नमः। ॐ अभिभङ्गाय नमः। ॐ अङ्गिरस्तमाय नमः। ॐ अमर्त्याय नमः। ॐ स्वायुधाय नमः। ॐ अशत्रवे नमः। ॐ अप्रतीताय नमः। ॐ अभिमातिसाहे नमः। ॐ अमत्रिणे नमः। ॐ सूनवे नमः। ॐ अर्चत्र्याय नमः। ॐ स्मद्दिष्टये नमः। ॐ अभयङ्कराय नमः। ॐ अभिनेत्रे नमः। ॐ स्पार्हराधसे नमः। ॐ सप्तरश्मये नमः। ॐ अभिष्टिकृते नमः।

ॐ अनर्वणे नमः। ॐ स्वर्जिते नमः। ॐ इष्कर्त्रे नमः । ॐ स्तोतॄणामवित्रे नमः। ॐ अपराय नमः। ॐ अजातशत्रवे नमः। ॐ सेनान्ये नमः। ॐ उभयाविने नमः। ॐ उभयङ्कराय नमः। ॐ उरुगायाय नमः। ॐ सत्ययोनये नमः। ॐ सहस्वते नमः। ॐ उर्वरापतये नमः। ॐ उग्राय नमः। ॐ गोपे नमः। ॐ उग्रबाहवे नमः। ॐ उग्रधन्वने नमः। ॐ उक्थ-वर्धनाय नमः। ॐ गाथश्रवसे नमः। ॐ गिरां राज्ञे नमः। ॐ गम्भीराय नमः। ॐ गिर्वणस्तमाय नमः। ॐ वज्रहस्ताय नमः। ॐ चर्षणीनां वृषभाय नमः। ॐ वज्रदक्षिणाय नमः। ॐ सोमकामाय नमः। ॐ सोमपतये नमः। ॐ सोमवृद्धाय नमः। ॐ सुदक्षिणाय नमः। ॐ सुब्रह्मणे नमः। ॐ स्थविराय नमः। ॐ सूराय नमः। ॐ सहिष्ठाय नमः। ॐ सप्रथसे नमः। ॐ तस्मै नमः। ॐ राज्ञे नमः। ॐ हरिश्मशारवे नमः। ॐ हरिवते नमः। ॐ हरीणां पत्ये नमः। ॐ अस्तृताय नमः। ॐ हिरण्यबाहवे नमः। ॐ उर्व्यूतये नमः। ॐ हरिकेशाय नमः। ॐ हिरीमशाय नमः। ॐ हरिशिप्राय नमः। ॐ हर्यमाणाय नमः। ॐ हरिजाताय नमः। ॐ हरिम्भराय नमः। ॐ हिरण्यवर्णाय नमः। ॐ हर्यश्वाय नमः। ॐ हरिवर्पसे नमः। ॐ हरिप्रियाय नमः। ॐ हनिष्ठाय नमः। ॐ हर्यताय नमः। ॐ हव्याय नमः। ॐ हरिष्ठे नमः। ॐ हरियोजनाय नमः। ॐ सत्वने नमः। ॐ सुशिप्राय नमः। ॐ सुक्षत्राय नमः। ॐ सुवीराय नमः। ॐ सुतपे नमः। ॐ ऋषये नमः। ॐ गाथान्याय नमः। ॐ गोत्रभिदे नमः। ॐ ग्रामं वहमानाय नमः। ॐ गवेषणाय नमः। ॐ जिष्णवे नमः। ॐ तस्थुष ईशानाय नमः। ॐ जगत ईशानाय नमः। ॐ नृतवे नमः। ॐ नर्याणि विदुषे नमः। ॐ नृपतये नमः। ॐ नेत्रे नमः। ॐ नृम्णस्य तूतुजये नमः। ॐ निमेघमानाय नमः। ॐ नर्यापसे नमः। ॐ सिन्धूनां पत्ये नमः। ॐ उत्तरस्मै नमः। ॐ नर्याय नमः। ॐ नियुत्वते नमः। ॐ निचिताय नमः। ॐ नक्षद्दाभाय नमः। ॐ नहुष्टराय नमः। ॐ नव्याय नमः। ॐ निधात्रे नमः। ॐ नृमणसे नमः। ॐ सध्रीचीनाय नमः। ॐ सुतेरणाय नमः। ॐ नृतमनाय नमः। ॐ नदनुमते नमः। ॐ नवीयसे नमः। ॐ नृतमाय नमः। ॐ नृजिते नमः। ॐ विचयिष्ठाय नमः। ॐ वज्रबाहवे नमः। ॐ वृत्रखादाय नमः। ॐ वलं रुजाय नमः।

ॐ जातूभर्मणे नमः। ॐ ज्येष्ठतमाय नमः। ॐ जनभक्षाय नमः। ॐ जनं सहाय नमः। ॐ विश्वसाहे नमः। ॐ वंसगाय नमः। ॐ वस्यसे नमः। ॐ निष्पाशे नमः। ॐ अशनिमते नमः। ॐ नृसाहे नमः। ॐ पूर्भिदे नमः । ॐ पुरासाहे नमः। ॐ अभिसाहे नमः। ॐ जगतस्तस्थुषः पतये नमः। ॐ समत्सुसंवृजे नमः। ॐ सन्धात्रे नमः। ॐ सुसं दृशे नमः। ॐ सवित्रे नमः। ॐ अरुणाय नमः। ॐ स्वर्याय नमः। ॐ स्वरोचिषे नमः। ॐ सुत्राम्णे नमः। ॐ स्तुषेय्याय नमः। ॐ सनजे नमः। ॐ स्वरये नमः। ॐ अकेतवे केतुं कृण्वते नमः। ॐ अपेशसे पेशः कृण्वते नमः। ॐ वज्रेण हत्विने नमः। ॐ महिनाय नमः। ॐ मरुत्स्तोत्राय नमः। ॐ मरुद्गणाय नमः। ॐ महावीराय नमः। ॐ महाव्राताय नमः। ॐ महाय्याय नमः। ॐ मह्यैप्रमतये नमः। ॐ मात्रे नमः। ॐ मघोनां मंहिष्ठाय नमः। ॐ मन्युम्ये नमः। ॐ मन्युमत्तमाय नमः। ॐ मेषाय नमः। ॐ महीवृते नमः। ॐ मन्दानाय नमः। ॐ माहिनावते नमः। ॐ महेमतये नमः। ॐ म्रक्षाय नमः। ॐ मृळीकाय नमः। ॐ मंहिष्ठाय नमः। ॐ म्रक्षकृत्वने नमः। ॐ महामहाय नमः। ॐ मदच्युते नमः। ॐ मर्डित्रे नमः। ॐ मद्वने नमः। ॐ मदानां पत्ये नमः। ॐ आतपाय नमः। ॐ सुशस्तये नमः। ॐ स्वस्तिघ्ने नमः। ॐ स्वर्दृशे नमः। ॐ राधानां पत्ये नमः। ॐ आकराय नमः। ॐ इषुहस्ताय नमः। ॐ इषां दात्रे नमः। ॐ वसुदात्रे नमः। ॐ विदद्वसवे नमः। ॐ विभूतये नमः। ॐ व्यानशये नमः। ॐ वेनाय नमः। ॐ वरीयसे नमः। ॐ विश्वजिते नमः। ॐ विभवे नमः। ॐ नृचक्षसे नमः। ॐ सहुरये नमः। ॐ स्वर्विदे नमः। ॐ सुयज्ञाय नमः। ॐ सुष्टुताय नमः। ॐ स्वयवे नमः। ॐ आपये नमः। ॐ पृथिव्या जनित्रे नमः। ॐ सूर्यस्य जनित्रे नमः। ॐ श्रुताय नमः। ॐ स्पशे नमः। ॐ विहायसे नमः। ॐ स्मत्पुरन्धये नमः। ॐ वृषपर्वणे नमः। ॐ वृषन्तमाय नमः। ॐ साधारणाय नमः। ॐ सुखरथाय नमः। ॐ स्वश्वाय नमः। ॐ सत्राजिते नमः। ॐ अद्भुताय नमः। ॐ ज्येष्ठराजाय नमः। ॐ जीरदानवे नमः। ॐ जग्मये नमः। ॐ वित्वक्षणाय नमः। ॐ वशिने नमः। ॐ विधात्रे नमः। ॐ विश्वमे नमः। ॐ आशवे नमः। ॐ मायिने नमः। ॐ वृद्धमहसे नमः। ॐ वृधाय नमः। ॐ वरेण्याय

नमः। ॐ विश्वतुरे नमः। ॐ वातस्येशानाय नमः। ॐ दिवे नमः। ॐ विचर्षणये नमः। ॐ सतीनमन्यवे नमः। ॐ गोदत्राय नमः। ॐ सद्यो जाताय नमः। ॐ विभञ्जनवे नमः। ॐ वितन्तसाय्याय नमः। ॐ वाजानां विभक्त्रे नमः। ॐ वस्व आकराय नमः। ॐ वीरकाय नमः। ॐ वीरयवे नमः। ॐ वज्रं बभ्रये नमः। ॐ वीरेण्याय नमः। ॐ आघृणये नमः। ॐ वाजिनेयाय नमः। ॐ वाजसनये नमः। ॐ वाजानां पत्ये नमः। ॐ आजिकृते नमः। ॐ वास्तोष्पतये नमः। ॐ वर्पणीतये नमः। ॐ विशां राज्ञे नमः। ॐ वपोदराय नमः। ॐ विभूतद्युम्नाय नमः। ॐ आचक्रये नमः। ॐ आदारिणे नमः। ॐ दोधतो वधाय नमः। ॐ आखण्डलाय नमः। ॐ दस्मवर्चसे नमः। ॐ सर्वसेनाय नमः। ॐ विमोचनाय नमः। ॐ वज्रस्य भर्त्रे नमः। ॐ वार्याणां पत्ये नमः। ॐ गोजिते नमः। ॐ गवां पत्ये नमः। ॐ विश्वव्यचसे नमः। ॐ स ञ्चकानाय नमः। ॐ सुहार्दाय नमः। ॐ दिवो जनित्रे नमः। ॐ समन्तुनाम्ने नमः। ॐ पुरुधप्रतीकाय नमः। ॐ बृहतः पत्ये नमः। ॐ दीध्यानाय नमः। ॐ दामनाय नमः। ॐ दात्रे नमः। ॐ दीर्घश्रवसाय नमः। ॐ ऋभ्वसाय नमः। ॐ दंसनावते नमः। ॐ दिवः संम्राजे नमः। ॐ देवजूताय नमः। ॐ दिवावसवे नमः। ॐ दशमाय नमः। ॐ देवतायै नमः। ॐ दक्षाय नमः। ॐ दुध्राय नमः। ॐ द्युम्निने नमः। ॐ द्युमन्तमाय नमः। ॐ मंहि ष्ठरातये नमः। ॐ इत्थाधीये नमः। ॐ दीद्यानाय नमः। ॐ दधृषाय नमः। ॐ दुधये नमः। ॐ दुष्टरीतवे नमः। ॐ दुश्च्यवनाय नमः। ॐ दिवोमानाय नमः। ॐ दिवोवृष्णे नमः। ॐ दक्षय्याय नमः। ॐ दस्युघ्ने नमः। ॐ धृष्णवे नमः। ॐ दक्षिणावते नमः। ॐ धियावसवे नमः। ॐ धनस्पृहे नमः। ॐ धृषिताय नमः। ॐ धात्रे नमः। ॐ दयमानाय नमः। ॐ धनञ्जयाय नमः। ॐ दिव्याय नमः। ॐ द्विबर्हसे नमः। ॐ सते नमः। ॐ आर्याय नमः। ॐ समर्याय नमः। ॐ त्रे नमः। ॐ सिमाय नमः। ॐ सख्ये नमः। ॐ द्युक्षाय नमः। ॐ समानाय नमः। ॐ दंसिष्ठाय नमः। ॐ राधसः पत्ये नमः। ॐ अद्रिगवे नमः। ॐ पृथिव्याः सम्राजे नमः। ॐ ओजस्वते नमः। ॐ वयोधे नमः। ॐ ऋतपे नमः। ॐ ऋभवे नमः। ॐ एकस्मै राज्ञे नमः। ॐ एधमानद्विषे नमः। ॐ एकवीराय नमः।

ॐ उरुज्रयसे नमः। ॐ लोककृते नमः। ॐ अश्वानां जनित्रे नमः। ॐ जोहूत्राय नमः। ॐ गवां जनित्रे नमः। ॐ जरित्रे नमः। ॐ जनुषां राज्ञे नमः। ॐ गिर्वणसे नमः। ॐ सुन्वतोऽवित्रे नमः। ॐ अत्कं वसानाय नमः। ॐ कृष्टीनां राज्ञे नमः। ॐ उक्थ्याय नमः। ॐ शिप्रवते नमः। ॐ उरवे नमः। ॐ ईड्याय नमः। ॐ दाशुषे नमः। ॐ इनतमाय नमः। ॐ घोराय नमः। ॐ सङ्क्रन्दनाय नमः। ॐ स्ववते नमः। ॐ जागृवये नमः। ॐ जगतो राज्ञे नमः। ॐ गृत्साय नमः। ॐ गोविदे नमः। ॐ धनाघनाय नमः। ॐ जेत्रे नमः। ॐ अभिभूवे नमः। ॐ अकूपाराय नमः। ॐ दानवते नमः। ॐ असुराय नमः। ॐ अर्णवाय नमः। ॐ धृष्वये नमः। ॐ दमूनसे नमः। ॐ तवसस्तवीयसे नमः। ॐ अन्तमाय नमः। ॐ अवृताय नमः। ॐ रायो दात्रे नमः। ॐ रयिपतये नमः। ॐ विपश्चिते नमः। ॐ वृत्रहन्तमाय नमः। ॐ अपरीताय नमः। ॐ साहे नमः। ॐ अपश्चाद्दध्वने नमः। ॐ युत्काराय नमः। ॐ आरिताय नमः। ॐ वोढ्रे नमः। ॐ वनिष्ठाय नमः। ॐ वृष्ण्यावते नमः। ॐ वृषण्वते नमः। ॐ अवृकाय नमः। ॐ अवताय नमः। ॐ गर्भाय नमः। ॐ असमष्टकाव्याय नमः। ॐ युजे नमः। ॐ अहिशुष्माय नमः। ॐ दधृष्वणये नमः। ॐ प्रत्नायपत्ये नमः। ॐ वाजदाव्ने नमः। ॐ ज्योतिःकर्त्रे नमः। ॐ गिरां पत्ये नमः। ॐ अनवद्याय नमः। ॐ सम्भृताश्वाय नमः। ॐ वज्रिवते नमः। ॐ अद्रिमते नमः। ॐ द्युमते नमः। ॐ दस्माय नमः। ॐ यजत्राय नमः। ॐ योधीयसे नमः। ॐ अकवारये नमः। ॐ यतङ्कराय नमः। ॐ पृदाकुसानवे नमः। ॐ ओजीयसे नमः। ॐ ब्रह्मणश्चोदित्रे नमः। ॐ यमाय नमः। ॐ वन्दनेष्ठे नमः। ॐ पुरां भेत्रे नमः। ॐ बन्धुरेष्ठे नमः। ॐ बृहद्दिवाय नमः। ॐ वरूत्रे नमः। ॐ मधुनो राज्ञे नमः। ॐ प्रणेन्ये नमः। ॐ पप्रथिने नमः। ॐ यूने नमः। ॐ उरुशंसाय नमः। ॐ हवं श्रोत्रे नमः। ॐ भूरिदाव्ने नमः। ॐ बृहच्छ्रवसे नमः। ॐ मात्रे नमः। ॐ स्तियानां वृषभाय नमः। ॐ महोदात्रे नमः। ॐ महावधाय नमः। ॐ सुग्म्याय नमः। ॐ सुराधसे नमः। ॐ सत्रासाहे नमः। ॐ ओदतीनां नदाय नमः। ॐ धुनाय नमः। ॐ अकामकर्शनाय नमः। ॐ स्वर्षसे नमः। ॐ सुमृळीकाय नमः। ॐ सहस्कृताय नमः। ॐ पास्त्यस्य होत्रे नमः।

ॐ सिन्धूनां वृष्णे नमः। ॐ भोजाय नमः। ॐ रथीतमाय नमः। ॐ मुनीनां सच्ये नमः। ॐ जनिदे नमः। ॐ स्वधावते नमः। ॐ असमाय नमः। ॐ अप्रतये नमः। ॐ मनस्वते नमः। ॐ अध्वराय नमः। ॐ मर्याय नमः। ॐ बृबदुक्थाय नमः। ॐ अवित्रे नमः। ॐ भगाय नमः। ॐ अषाह्ळाय नमः। ॐ अरीह्ळाय नमः। ॐ आदर्त्रे नमः। ॐ वीरं कर्त्रे नमः। ॐ विशस्पतये नमः। ॐ एकस्मै पत्ये नमः। ॐ इनाय नमः। ॐ पुष्टये नमः। ॐ सुवीर्याय नमः। ॐ हरिपे नमः। ॐ सुदृशे नमः। ॐ एकस्मै हव्याय नमः। ॐ सनाते नमः। ॐ आरुजे नमः। ॐ ओकाय नमः। ॐ वाकस्य सक्षणये नमः। ॐ सुवृक्तये नमः। ॐ अमृताय नमः। ॐ अमृक्ताय नमः। ॐ खजकृते नमः। ॐ बलदे नमः। ॐ शुनाय नमः। ॐ अमत्राय नमः। ॐ मित्राय नमः। ॐ आकाय्याय नमः। ॐ सुदाम्ने नमः। ॐ अब्जिते नमः। ॐ महसे नमः। ॐ महिने नमः। ॐ रथाय नमः। ॐ सुबाहवे नमः। ॐ उशनसे नमः। ॐ सुनीथाय नमः। ॐ भूरिदे नमः। ॐ सुदासे नमः। ॐ मदस्य राज्ञे नमः। ॐ सोमस्य पीत्विने नमः। ॐ ज्यायसे नमः। ॐ दिवः पतये नमः। ॐ तविषीवते नमः। ॐ घनाय नमः। ॐ युध्माय नमः। ॐ हवनश्रुते नमः। ॐ सहसे नमः। ॐ स्वराजे नमः।

॥ इति इन्द्रसहस्त्रनामावली ॥

इन्द्रसहस्रे प्रथमं शतकम्

प्रथमः प्रारम्भस्तबकः - गायत्रः

मघवते शचीहृदयहारिणे ।
भगवते नमः कुलिशधारिणे ॥ १॥

जयति वृत्रजिज्जयति वज्रवान् ।
जयति विष्टपत्रितयराज्यवान् ॥ २॥

बहु शतेक्षणं भुवनसाक्षिणम् ।
हृदय तं परं स्मर पुरन्दरम् ॥ ३॥

त्रिदशपार्थिवं हृदय वासवम् ।
त्रिजगदन्तरं स्मर निरन्तरम् ॥ ४॥

परिजनो भवाम्ययि महेन्द्र ते ।
परिगृहाण मां सुमनसां पते ॥ ५॥

प्रतिवदेर्न मे वरद दासताम् ।
तव कृपाश्रिते मयि विवर्धताम् ॥ ६॥

अभृतितुम्बुरुप्रभृतिगीत ते ।
स्तुतिविधौ मदं मतिरुपेति मे ॥ ७॥

तव कृपाकरस्तवविधौ रमे ।
अव महेन्द्र मामव कुलं च मे ॥ ८॥

अजर वाक् पतत्वियमयि त्वयि ।
अवतरत्वदस्तव महो मयि ॥ ९॥

ऋतविलोकने वितनुताद्बलम् ।
ऋतपते महो मम गिरामलम् ॥ १०॥

कथयतां मनः कथमगोचरम् ।
नयतु ते महो वरद मे गिरम् ॥ ११॥

जयति कस्य वागमलदर्शना ।
भवति देवताकरुणया विना ॥ १२॥

तव गुणादिकं भुवननाथ मे ।
स्फुरतु दाहरे सरसिजे हरे ॥ १३॥

सकलदर्शिनीमतुलसारया ।
मम गुहां कुरु त्वमृतधारया ॥ १४॥

जयतु शक्रगा जयतु भास्वती ।
जयतु सत्यदृङ् मम सरस्वती ॥ १५॥

अभिमताप्तये विफलतामिता ।
हरिहयाखिला पुरुषकारिता ॥ १६॥

अहमथ स्तवे ततमनोद्रवे ।
अवतरामि भोस्तव दिवो विभो ॥ १७॥

मुखरयन् दिशो नुतिरवैर्नवैः ।
प्रजनयन् रसं दिवि मनोद्रवैः ॥ १८॥

समवलम्बते तव पदाम्बुजम् ।
अयमये वृषन्नव नवा निजम् ॥ १९॥

लसदलङ्कृतिं बहुगुणान्विताम् ।
रसवतीमतिश्रमविवर्धिताम् ॥ २०॥

गिरमिमामहं त्रिदशभूपते ।
गुणवते सुतामिव ददामि ते ॥ २१॥

भव निषेवितो मम सुभाषया ।
पतिरिव प्रियो रुचिरयोषया ॥ २२॥

स्तुतिरसौ लसद् बहु दयारसम् ।
विबुधभूपतेर्विशतु मानसम् ॥ २३॥

परमपावने स्वविषयावने ।
हरिनुतिर्बलं दिशतु नः फलम् ॥ २४॥

नरमनोरमाः कविप्रतेरिमाः ।
सुरपतिस्तुतेरतिसुखं मुखम् ॥ २५॥

द्वितीयः स्वरूपस्तबकः - त्रैष्टुभः

देवं महेन्द्रं पदबन्धुपाप-
विध्वंसनं वज्रधरं नमामि ।
लोकान्तरं लोकमयं च यस्य
लोकातिगं च प्रविभाति रूपम् ॥ २६॥

आत्मैव लोकः सकलो महीया-
नात्मैव लोकान्तरतामुपैति ।
आत्मैव लोकस्य परः परस्ता-
दात्मैव लोकाधिपतिर्महेन्द्रः ॥ २७॥

प्राक् सर्गतो निष्कल एक आसीत्
सत्पूर्णबोधाकृतिरादिदेवः ।
सप्राज्यशक्तिर्भुवनं ससर्ज
सृष्टस्य चाभूज्जगतोऽन्तरात्मा ॥ २८॥

यो भाति शुद्धो जगतः परस्तात्
यश्चान्तरात्मा जगतोऽखिलस्य ।
बाह्यालयाकाशवदेकरूपा-
वेतौ कवीनां वचनेषु भिन्नौ ॥ २९॥

लोकातिगं ब्रह्म वदन्ति शुद्धं
लोकान्तरं चालकमिन्द्रमाहुः ।
ज्ञेयोऽयमेकस्य परीक्षकाणां
दृष्टिप्रभेदादभिधानभेदः ॥ ३०॥

ब्रह्मागुणं गम्यतमं चकास्ति
त्रैलोक्यमिन्द्रः सगुणः प्रशास्ति ।
पूर्वस्य रूपं भवति त्रिपाद-
मन्यस्य विश्वेन सहैकपादम् ॥ ३१॥

यश्चागुणो यः सगुणश्च देवो
भावः स केषामपि पण्डितानाम् ।
मोदः सदा पूर्णरसोऽपरेषां
बोधः परेषां विदुषां मतेन ॥ ३२॥

भावः स नो चेदसतो मतिः का
बोधो न चेत् कीदृगिवास्य सत्ता ।
भावः प्रबोधश्च न चेद्वदन्तु
मोदो भवेदेष कथं सखायः ॥ ३३॥

पाषाणसत्तेव विनैव बोधं
तस्यापि सत्तेति न साधुवादः ।
पाषाणसत्ताऽपि विहाय बोधं
केनानुभूता सुधियो भणन्तु ॥ ३४॥

शुक्तौ यथा वा रजतस्य बोधो
बोधोऽप्यसंत्सम्भवतीति वादी ।
सत्येव तद्देशगतामसत्तां
बोधे समारोपयतीतरस्य ॥ ३५॥

मोदस्य भासो न विनाऽनुभूतिं
बोधं विना कस्य कुतोऽनुभूतिः ।

बोधः प्रपूर्णश्च सुखो निसर्गात्
तद्योगनिद्रानुभवे प्रसिद्धम् ॥ ३६॥

वस्तुस्वरूपं परमः प्रकाशो
बोधः स एव प्रमदः स एव ।
भावः स एवानुभवैकगम्यः
स्वर्भूमिपालश्च स एव नम्यः ॥ ३७॥

सूक्ष्मो विराजन्नखिलस्य राजा
शब्दायते सूक्ष्ममयं प्रकाशः ।
तस्मिन्नखण्डे परमानुभूतिः
काचित् प्रपूर्णा लसति प्रकाशे ॥ ३८॥

सत्ता विभा नादपरा न काचित्
चित्तिश्च शब्दादितरा न कापि ।
मोदश्च नाखण्डनिजानुभूतेः
अन्या न काचिद्यदि चिन्तयामः ॥ ३९॥

स्थूलाः प्रकाशश्च रसश्च शब्दः
स्थूलप्रपञ्चे पृथगत्र भान्तु ।
वस्त्वेकमेव त्रितयं तदेतत्
सूक्ष्मत्वकाले यदि चिन्तयामः ॥ ४०॥

शुद्धस्वरूपे न रसान्तराणां
ज्ञानान्तराणां च भवेत्प्रवेशः ।
विश्रान्तरे सर्वरसानुभूतिः
सर्वज्ञता च प्रगुणे विभातः ॥ ४१॥

एको रसः सर्वरसानुभूतौ
सर्वज्ञतायामभिदा च वित्तिः ।
नित्यात्मनिष्ठेष्वपि सम्प्रहृष्टे
तत् किं द्वयं विश्वपतावसाध्यम् ॥ ४२॥

भावेन स प्राणिति नानिलेन
बुद्ध्या विजानात्यखिलानि नाक्षैः ।
सम्मोदते पूर्णतया न भोगैः
ईष्टे स्वशक्त्या न चमूबलेन ॥ ४३॥

तस्य स्वराजः सहजं चतुष्कं
सत्तामतिर्व्यापकता च शक्तिः
एकं परस्तादविभक्तमेतत्
दृष्टिप्रभेदाद्भुवनेऽत्र भक्तम् ॥ ४४॥

सत्ता च सन्वाङ्मयमुद्गतं चेद्-
वित्तिश्च वेत्ता यदि काप्यहन्ता ।
मोदश्च मोदी यदि भोग्यमन्यत्
शक्तिश्च शक्तो यदि कार्यजालम् ॥ ४५॥

भोक्ता दिवः पक्तृतमः पृथिव्या
आकाशदेशेन महाशरीरी ।
शक्तेरधीशः शमनोऽसुराणां
गृह्णातु मे वागुपहारमिन्द्रः ॥ ४६॥

सूर्यस्य भासा प्रतपन्नभस्तो
ज्वालाभिरग्नेः प्रदहन् पृथिव्याम् ।

विद्युत्प्रतापेन पचन्त्समन्तात्
गृह्णातु मे वागुपहारमिन्द्रः ॥ ४७ ॥

राज्याय तन्वन्भुवनेषु शास्त्रं
वज्रं दधानो ज्वलदुग्रमस्त्रम् ।
स्वाभाविकः सर्वजगन्नृपालो
गृह्णातु मे वागुपहारमिन्द्रः ॥ ४८ ॥

इन्द्रस्य दृष्टिः सरतादितो नः
तप्तानानाथानभिलक्ष्य दीनान् ।
नीचैः शयाते परिभूयमानौ
देशश्च वंशश्च समेषु येषाम् ॥ ४९ ॥

एताः कवीनामधिपस्य पूताः
त्रातारमात्मानमशेषजन्तोः ।
नाथं सुराणां नयनं मुनीनाम्
इन्द्रं भजन्तां हरिमिन्द्रवज्राः ॥ ५० ॥

तृतीयो दैवस्तबकः - गायत्रः

वज्रप्रहरणं विश्वस्य शरणम् ।
गायामि सगणं तद्ब्रह्म सगुणम् ॥ ५१ ॥

त्रैलोक्यपृथिवीसिंहासनपतिः ।
विश्वम्भरमतिर्दैवं मम वृषा ॥ ५२ ॥

वन्दारुजनता मन्दारविटपी ।
बृन्दारकपतिर्दैवं मम वृषा ॥ ५३॥

सर्वोत्तमशची कान्तासहचरः ।
विश्वादिरसिको दैवं मम वृषा ॥ ५४॥

वृद्धोपि युवकः सिद्धोऽपि रसिकः ।
लोकादिपुरुषो दैवं मम वृषा ॥ ५५॥

नित्योऽपि लसितो लीलार्थवपुषा ।
भीमोऽपि रुचिरो दैवं मम वृषा ॥ ५६॥

लोकारिदितिजप्रध्वंसनविधौ ।
निर्णिद्रकुलिशो दैवं मम वृषा ॥ ५७॥

सर्वस्य जगतो धाने च नयने ।
त्राणे च निरतो दैवं मम वृषा ॥ ५८॥

शास्त्राणि विदधल्लोकस्य चलने ।
नित्यांश्च नियमान् दैवं मम वृषा ॥ ५९॥

अन्तर्बहिरपि व्याप्तो जगदिदम् ।
पारे च विलसन् दैवं मम वृषा ॥ ६०॥

पारे स विगुणो लोकेऽत्र सगुणः ।
दुर्ज्ञेयमहिमा दैवं मम वृषा ॥ ६१॥

यस्यार्धमखिलं व्याप्तस्य भुवनम् ।
स प्राज्यविभवो दैवं मम वृषा ॥ ६२॥

क्रान्त्वा जगदिदं सर्वं स्थिरचरम् ।
एकः परिपचन् दैवं मम वृषा ॥ ६३॥

नित्यं च भुवनव्यापाररसिकः ।
नित्यं च विचरन् दैवं मम वृषा ॥ ६४॥

कर्ता च जगतां धर्ता दमयिता ।
कल्याणचरितो दैवं मम वृषा ॥ ६५॥

आत्मा च जनको राजा च जगताम् ।
इन्द्रो मुनिनुतो दैवं मम वृषा ॥ ६६॥

दीप्तो दिवि रविर्विद्युत्सुरपथे ।
वह्निः कुवलये दैवं मम वृषा ॥ ६७॥

तारः सकलविज्ज्योतिश्च विततम् ।
प्राणश्च परमो दैवं मम वृषा ॥ ६८॥

सूक्ष्मो विषयिणि स्थूलश्च विषये ।
सर्वत्र विततो दैवं मम वृषा ॥ ६९॥

साक्षी निरशनः पक्षी नृतनुषु ।
अक्षीणविभवो दैवं मम वृषा ॥ ७०॥

अग्रे सितकरो मध्ये दिनकरः ।
मूले स दहनो दैवं मम वृषा ॥ ७१॥

वीरेऽपि गुहावास्येव सततम् ।
पूर्णोऽपि विविधो दैवं मम वृषा ॥ ७२॥

हर्षप्रदमजो वर्षत्वकलुषम् ।
भव्यं मयि महो दिव्यं च स वृषा ॥ ७३॥

देयाद्विविषदां धात्री पतिरलम् ।
स्वं देशमवितुं मह्यं मतिबलम् ॥ ७४॥

प्रीत्या वसुमती वृत्तानि मघवा ।
एतानि शृणुताद्देयादुत न वा ॥ ७५॥

चतुर्थः करुणास्तबकः - जागतः

प्रदुष्टजनता मदोद्धतिहृते
विनम्रजनता गुणोन्नतिकृते ।
अशेषजगतो नृपाय वशिने
कृपाजलधये नमः कुलिशिने ॥ ७६॥

व्रतैर्न विविधैर्न पूजनशतै-
र्न योगविधिभिर्न शुद्धचरितैः ।
न शक्रतपसा न यज्ञविधिना
नरस्य महिमा कृपां तव विना ॥ ७७॥

ऋतज्ञकृतिभिः सदापि विनुता
रजोविरहितप्रजासु वितता ।
सुधामपि महः किरन्त्यजर ते
न तेषु विनता कृपा विजयते ॥ ७८॥

न कोऽपि मनसो गुणः सुजनपा
महेन्द्रमनसो झरी तव कृपा ।
भवन्तमयि तद्विभो रुचिनिधिं
भणन्ति विबुधाः कृपाजलनिधिम् ॥ ७९॥

अनुग्रहकृते सदाप्यभिमुखी
विभो तव विभा कृपानतसखी ।
रसार्द्रशिरसं सुपक्वमनसं
पुनाति विमदं नरं भुवि विदम् ॥ ८०॥

अतीव सरला प्रकाशबहुला
धुताखिलमलाकृताजरकला ।
पदाहतभया तवाक्षरदया
विनम्रवदने सरत्विह जने ॥ ८१॥

गृणत्सदवनप्रकारनिपुणा
मुनिस्तुतगुणा महावितरणा ।
विचित्रकरणा तवेन्द्रकरुणा
स्तवेन मुखरे सरत्विह नरे ॥ ८२॥

अरुद्धगमना विशालनयना
विशुद्धपतना विचित्रचलना ।

तपस्विजनपा तवेश्वरकृपा
हृदा विकसिते सरत्विह नते ॥ ८३॥

तव स्मरणतो विशुद्धमनसि
प्रभो सुमनसां वितीर्णशिरसि ।
कृपारसझरी विपापसख ते
पतत्वयि मयि स्वभावविनते ॥ ८४॥

चिरादविजयं सदापि सभयं
विकुण्ठितशयं विलोक्य विषयम् ।
विषण्णमिह मां वृषन्नरुणया
त्वमावृणु दिवो विभो करुणया ॥ ८५॥

सतां मतिमतां यदिन्द्रनयनं
यदुग्रविधया द्विषां प्रदमनम् ।
सदापि हृदये स्थितिर्यदचला
नरस्य सकला क्रिया यदमला ॥ ८६॥

अकुण्ठितगतिर्यदच्छधिषणा
समस्तविषयावगाहनगुणा ।
तदेतदखिलं महद्विलसितं
तवैव करुणाझरस्य फलितम् ॥ ८७॥

न पश्यति तपो न पश्यति गुणं
न पश्यति शुभक्रियां च निपुणम् ।
न पश्यति कृतं यथाविधि मखं
न पश्यति रमाविलासि च मुखम् ॥ ८८॥

न पश्यति गिरां विलासमतुलं
न पश्यति महत्कुलं च विमलम् ।
कवाटरहिते गृहे प्रवहति
श्रियामधिपते कृपेन्द्र महति ॥ ८९॥

अहङ्कृतिमहाकवाटरहितं
मनो मम गृहं महेन्द्रविहितम् ।
अनन्तविभवा निरन्तरजया
न वा प्रवहताज्जवात्तव दया ॥ ९०॥

अहङ्कृतिविकृत्ययो विरचितं
तमस्ततमहागुहास्थलगतम् ।
कवाटकमिदं हृदो विघटितं
तवास्त्वविहतं कृपाङ्करगतम् ॥ ९१॥

असावपि मनस्यपारयशसा
तनौ च परितस्ततेन महसा ।
इमं सुरपतेर्विशोध्य निपुणा
नरं भुविसुरं करोतु करुणा ॥ ९२॥

स्मरत्सु विकसत्स्वमोघचलितं
विलक्षणतमप्रभावकलितम् ।
इतोऽस्तु सुरराट्कृपाविलसितं
मनोऽभिलषितं ममास्तु फलितम् ॥ ९३॥

अतीव दृढतां वितीर्य मनसे
प्रकाशबहुलं बलं च वचसे ।

ध्रुवस्मृतिमिमां विधाय च धियं
प्रभो दिशतु ते दया मम जयम् ॥९४॥

ध्रुवस्मृतिधरे मयि स्तुतिकरे
पदाब्जसुहृदि प्रकाशितहृदि ।
जगत्त्रयधरः शचीसहचरः
प्रपूर्णभरणां करोतु करुणाम् ॥९५॥

ममाभिलषितं प्रसिध्यतु न वा
मनः शममितं प्रतृप्यतु न वा ।
जहामि न बहु प्रकृष्टकरणं
दयाजलनिधेस्तवेन्द्र चरणम् ॥९६॥

प्रसिद्ध्यति न चेत्तदिन्द्र विगुणं
प्रतृप्यति न चेत्तदक्षमगुणम् ।
नमत्सु न दया नते धुतभया
क्रियेत हसनं कदापि न मया ॥९७॥

स्वकीयहृदयं समर्पयति ते
नतः कविरयं सुपर्वनृपते ।
महस्तव विशत्विदं च भवनं
चरत्यनुदिनं यदिन्द्र भुवनम् ॥९८॥

मनुं तव दिवो महीश जपतां
स्तवं तव सतां सहाय पठताम् ।
कृपेन्द्र तव नः प्रमादरहितां
स्वदेशमवितुं ददातु पटुताम् ॥९९॥

कृपाझरगतिप्रभावमतुलं
वदन्नुपहरन् हृदेव कमलम् ।
जलोद्धतगतिस्तवस्त्रिजगतः
प्रशासितुरसौ भवत्वभिमतः ॥ १०० ॥

॥ इति इन्द्रसहस्रे प्रथमं शतकं समाप्तम् ॥

इन्द्रसहस्रे कटाक्षस्तबकः

तं दशशताक्षं शीतलकटाक्षम् ।
नौमि धुतपाशं वज्रधरमीशम् ॥ १॥

उग्रमपि दक्षं भासुरकटाक्षम् ।
वीर्यधुतवृत्रं नौम्यदितिपुत्रम् ॥ २॥

आर्तजनपक्षं रक्षककटाक्षम् ।
प्राणिगणतातं नौमि पुरुहूतम् ॥ ३॥

देवमसदृक्षं पावनकटाक्षम् ।
नौमि बहुमायं वासवममेयम् ॥ ४॥

तं पुरुषमीडे स्तुत्यगणलक्षम् ।
स्वर्भुवनराज्ञी मोहनकटाक्षम् ॥ ५॥

यत्र तव दृष्टिर्वज्रधर हृद्या ।
नव्ययुगकर्त्री तत्र वरविद्या ॥ ६॥

तत्र वरलक्ष्मीः सन्ततमशून्या ।
तत्र सुगुणानां सम्पदपि मान्या ॥ ७॥

तत्र बलमुग्रं शत्रुमदहारि ।
तत्र नयवित्त्वं विश्वहितकारि ॥ ८॥

यं तव बलारे पावयति दृष्टिः ।
तत्र नरवर्ये सर्वशुभवृष्टिः ॥ ९॥

यत्र तव पूर्णा दृष्टिरतिभद्रा ।
भेदशतबुद्धिस्तस्य न दरिद्रा ॥१०॥

किं नु सुकृतादी किं दुरितखादी ।
शक्र तव रक्षःसूदनकटाक्षः ॥११॥

भक्तिरसिकानां पापततिखादी ।
सोऽयमितरेषां पक्वसुकृतादी ॥१२॥

पापततिखादी यत्र स कृपावान् ।
तस्य हृदि बोधः सर्वसमतावान् ॥१३॥

तस्य जगदर्थे सर्वमपि कार्यम् ।
अद्भुतमपारं दिव्यमपि वीर्यम् ॥१४॥

पक्वसुकृतादी यत्र सविचित्रः ।
तस्य खलु भोगः काममतिमात्रः ॥१५॥

ये गिरिशनाम्ना ये च हरिनाम्ना ।
ये गणपनाम्ना ये च रविनाम्ना ॥१६॥

शक्तिरिति नाम्ना ये बहुलधाम्ना ।
ये च मतिमन्तो यह्व इति नाम्ना ॥१७॥

त्वामयि भजन्ते भक्त्यतिशयेन ।
सर्वसुररूपं भूरि विभवेन ॥ १८॥

तेष्वपि दिवो भूनाथ तव दक्षाः ।
भक्तजनरक्षा दीक्षितकटाक्षाः ॥ १९॥

त्वत्पदमजानन्नप्यज पवित्रम् ।
मङ्गलगुणस्ते दृक्पतनपात्रम् ॥ २०॥

दृष्टिवशतस्ते प्रेष्ठफलधारा ।
संश्रितकुलेष्वप्यप्रतिमसारा ॥ २१॥

पावनकटाक्षैः संशमय पापम् ।
शीतलकटाक्षैः शक्र मम तापम् ॥ २२॥

मङ्गलकटाक्षैः साधय ममेष्टम् ।
किं च विबुधानां नाथ हर कष्टम् ॥ २३॥

भासुरकटाक्षैर्भासयतु मह्यम् ।
नाकनरनाथो ज्योतिरतिगुह्यम् ॥ २४॥

॥ इति इन्द्रसहस्रे कटाक्षस्तबकः समाप्तः ॥

इन्द्रविंशतिः

प्रथमो वर्गः

अखिलनायकं मखभुजां वरम् ।
अरिविदारणं हरिहयं भजे ॥ १॥

मधुमुचामृचां परिचयी वृषा ।
रसकिरां गिरां भवतु लोकिता ॥ २॥

अमरराज मे त्रिमलवारणे ।
भजनमेव ते भवतु भेषजम् ॥ ३॥

प्रतिभये गदे प्रतिभटे पटौ ।
वरद तारणं तव निषेवणम् ॥ ४॥

अयमिहाश्रितो भयहरेन्द्र ते ।
मधुरपद्यभृन्नधुरि खिद्यतु ॥ ५॥

द्वितीयो वर्गः

वृत्रमयि भृन्दन्नुत्सृजसि नीरम् ।
उत्सवसमेतो गर्जसि गभीरम् ॥ ६॥

उग्रतरनादं दीप्ततरभासम् ।
अप्सु विहरन्तं देवविभुमीडे ॥ ७॥

वज्रधरकीली भाति भुवि पाता ।
भूरि बलशाली त्वं नभसि नेता ॥ ८॥

मन्थनत आसीदेष इह यज्ञे ।
घर्षणविशेषाद्व्योमनि स जज्ञे ॥ ९॥

भूरिमहिमाढ्यं सन्मुनिभिरीड्यम् ।
त्रातसुरचक्रं सन्नमतशक्रम् ॥ १०॥

तृतीयो वर्गः

असुरधिपिण्डं तटिदधिभूतम् ।
अयममराणां पतिरधिदैवम् ॥ ११॥

जगदयमेतत्प्रभवति भर्तुम् ।
जगदरिदर्याक्षयमपि कर्तुम् ॥ १२॥

अयमधिनाथो भवति बलस्य ।
अत उचितोऽस्य प्रभुरखिलस्य ॥ १३॥

नरसुरदैत्यान्वितमपि नूनम् ।
बलविभवेऽस्मात्त्रिभुवनमूनम् ॥ १४॥

अयमतिमत्तैः करिभिरजय्यम् ।
घटयति सिंहं मृगशिशुजय्यम् ॥ १५॥

चतुर्थो वर्गः

राकाशशिकीर्तिं पाकासुरशत्रुम् ।
आकाशमहीशं शोकापहमीडे ॥ १६॥

निर्जित्य समस्तान् भावानपि जिष्णो ।
सम्राड् भुवनानां आसीः प्रभविष्णो ॥ १७॥

जानामि मरुत्वन् गानाय यशस्ते ।
ध्यानाय न रूपं ज्ञानाय न तत्त्वम् ॥ १८॥

लोके स्थितिभाजां यत्ते घनमूर्तिः ।
धात्री निखिलानां सेयं तव कीर्तिः ॥ १९॥

तुष्टिं बहुवित्तां स्वाराडनियत्ताम् ।
आनन्दितचित्तां भक्तस्य विधत्ताम् ॥ २०॥

॥ इन्द्रविंशतिः समाप्ता ॥

इन्द्रसप्तकम्

यदि निर्विबन्धपदवी महागुहा
यदि तत्र मूलशुचिशक्तिनिर्झरी ।
यदि देवराजकरुणोन्मुखं मनो
न किमप्यसाध्यमिह देहधारिणाम् ॥ १॥

नरलोकदुर्विदबलस्थलाकृते-
र्मरुतां नृपस्य कथमुच्यतां कथा ।
बहुवारमार्यसमितिष्वितः
करुणैव केवलममुष्य याच्यते ॥ २॥

त्वयि हेलयेतरमतानुयायिभि-
र्दुरितं यदिन्द्र मम पूर्वजैश्चितम् ।
पतयालु मे शिरसि पादसेविनो
विनिवारयस्व फलमस्य दारुणम् ॥ ३॥

कविता निरङ्कुशतया प्रवर्तते
मम लोकवृत्तपरिकीर्तनेषु या ।
गुणवर्णनाय तव सा समुद्यता
मघवन् प्रपश्यति दिशं न कामपि ॥ ४॥

महिमानमिन्द्र तव भाषितुं वयं
प्रभवाम नैव वरदास्तु सा कथा ।
करुणा कयानुविधया तवार्थ्यताम्
इयमप्यरण्यपदवीव दुर्विदा ॥ ५॥

चरणानतानखिलदेवयूथपान्
करुणावलोकनिकरेण लालयन् ।
वरुणालयादपि गभीर एति मे
शरणार्थिनः स्मृतिपथं दिवस्पतिः ॥ ६॥

विदधातु भद्रमपवारयत्वघं
वितनोतु सम्पदपि श्रियां धियाम् ।
अखिलस्य भूसुरकुलोद्भवस्य स
प्रभुरम्बरस्य मरुतां पतिर्वृषा ॥ ७॥

॥ इन्द्रसप्तकं समाप्तम् ॥

श्रीपवनाष्टकम्

पूर्वचतुष्कम्

प्राणं प्रपञ्चस्य समीरमीडे
नभः समन्तादपि गाहमानम् ।
स एष मे स स्तुतिमस्तु वाचं
पितेव कन्यां परिरभ्य हृष्टः ॥ १॥

विश्वोपकाराय विभोर्निदेशा-
दहर्निशं गन्धवह प्रयासि ।
श्रान्तोऽसि मन्ये पिब मे वचांसि
सुधां जनस्तक्रमिवाध्वखिन्नः ॥ २॥

कन्यामिवास्मभ्यमुदारशीलां
मनोरमां सम्प्रददौ गिरं यः ।
तां वायवे सम्प्रति दर्शयामो
विवर्धितां साधु विभूषितां च ॥ ३॥

सत्यं दुकूलं परिदेहि वाणि
विधाय दूरे वितथं कुचेलम् ।
मात्वज्जुगुप्सां गगनस्य नाथः
कार्षीन्निजं पार्श्वमुपागतायाः ॥ ४॥

उत्तरचतुष्कम्

विश्वप्रियमेकं प्राणं पवन त्वाम् ।
न स्तौति सचेताः को नाम शरीरी ॥ ५॥

खेलत्खगवर्गं तारासुमचित्रम् ।
उद्यानमिदं ते खं वात विशालम् ॥ ६॥

ब्रह्माहुरयि त्वां मिथ्यात्वयि नेदम् ।
मुक्ता भवता चेत्सेयं गतिदीक्षा ॥ ७॥

वृत्तीः परिभूय श्वभ्रे विचरन्तम् ।
पश्यन्ननिल त्वां पश्येदमृतं ना ॥ ८॥

॥ पवनाष्टकं समाप्तम् ॥

श्रीनृसिंहपञ्चरत्नम्

घटिकाचलमालयमादधता
शरणागतरक्षणमाचरता ।
करुणाकलितेन जगत्पतिना
न विना मम याति मुदं हृदयम् ॥ १॥

वसतिं कुरुषे घटिकाद्रिवरं
हृदयं च मदीयमदस्सदय ।
नरसिंह विहाय विभो कपटं
वद कुत्र मनो भवतो रमते ॥ २॥

घटिकाचलवासिनमीशमजं
सततं स्मरतां क्व सतामशुभम् ।
यदि कोऽपि भवेदशुभस्य लवो
रुचिराशिरुदेष्यति पाशि दिशि ॥ ३॥

बहवोऽवतरा विलसन्तु मधुं
द्विषतो निजविग्रहतोऽप्यधिकम् ।
घटिकागिरिराड्वसतौ नृहरौ
करुणावति मे रमते हृदयम् ॥ ४॥

चरणागतान्परमसात्त्विकानृषीन्
करुणावलोकनिकरेण लालयन् ।

घटिकाद्रिसीमनि नृसिंहविग्रहो
जगतां पतिर्वसति वासवार्चितः ॥५॥

॥ श्रीनृसिंहपञ्चरत्नं समाप्तम् ॥

श्रीयोगाञ्जनेयपञ्चरत्नम्

नरसिंहपदाम्भोजभ्रमरायितमानसम् ।
योगयुक्तं हनूमन्तं घटिकाद्रिगतं भजे ॥ १॥

एष हत्वा निशाटानां कोटीर्वीरवरः पुरा ।
अधुना दृश्यते योगी नरसिंहपदान्तिके ॥ २॥

सत्यं वद महावीर कुत्र ते रमते मनः ।
नृवेषे वा हरौ किंस्विन्नृसिंहतनुधारिणि ॥ ३॥

विचिन्तयन्निवाभेदं श्रीरामनरसिंहयोः ।
योगयुक्तो मरुत्सूनुः घटिकाद्रौ प्रदृश्यते ॥ ४॥

यस्मिन्मनः पथं याते न जनस्य विपत्पुनः ।
तं भजे मरुतः पुत्रं योगिनं वीरकुञ्जरम् ॥ ५॥

॥ श्रीयोगाञ्जनेयपञ्चरत्नं समाप्तम्॥

श्रीतारकरामनामस्तुतिः

दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ १॥

निर्गुण निष्कल नित्यनिरञ्जन निर्गतमत्सर गम्यविभो ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ २॥

संसारेऽस्मिन् निर्गतसारे पाहि विपारे दशवदनारे ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ ३॥



सर्वसमत्वं सर्वहितत्वं सत्सङ्गत्वं देहि विभो मे ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ ४॥

जननक्लेशं मरणक्लेशं नाशय गमनागमनक्लेशम् ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ ५॥

को मे पुत्रः का मे जाया माया सेयं पाहि विभो माम् ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ ६॥

सनकसनन्दनसंस्तुतचरितं जानीते त्वां गोगुणरहितम् ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ ७॥

नास्ति वपुस्ते नास्ति तवाख्या नास्ति च कर्म स्वस्तिद विष्णो ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ ८॥

माया कल्पितमिदमखिलं ते रूपं कर्म च नाम च विविधम् ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ ९॥

नाम तु रामेत्यमलमिदं ते तारकं ऋषयः परिभाषन्ते ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ १०॥

चतुरास्यस्त्वं चक्रधरस्त्वं परमेशस्त्वं परमात्मा त्वम् ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ ११॥

तत्त्वसमूहादुपरि लसन्तं पुरुषं साङ्ख्याः प्रवदन्ति त्वाम् ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे॥ १२॥

दशशतपत्रे दशमुखशत्रो योगविदस्त्वामालोकन्ते ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ १३॥

जैमिनिमुख्याः कर्मफलं त्वां देव वदन्तो नन्दन्ति स्म ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ १४॥

वेदान्ते ये निष्ठितमतयः ते प्राहुस्त्वामेकमभेदम् ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ १५॥

गणपतिकविना रचितं स्तोत्रं ललितं प्रीत्यै भवतो भूयात् ।
दशरथनन्दन दशरथनन्दन दशरथनन्दन दाशरथे ॥ १६॥

॥ श्रीतारकरामनामस्तुतिः समाप्ता ॥

श्रीकृष्णाक्षरमालिका

कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ १॥

अव्यय माधव अन्तविवर्जित अब्धिसुताप्रिय कान्त हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २॥

आशरनाशन आदिविवर्जित आत्मज्ञानद नाथ हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३॥

इन्द्रमुखामरबृन्दसमर्चितपादसरोरुहयुग्म हरे।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४॥

ईश्वरसन्नुत ईतिभयापह राक्षसनाशनदक्ष हरे।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ५॥

उन्नतमानस उच्चपदप्रद उज्ज्वलविग्रह देव हरे।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ६॥

ऊर्जोनाशितशात्रवसञ्चय जलधरगर्जितकण्ठ हरे।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ७॥

ऋषिजनसन्नुत दिव्यकथामृत भव्यगुणोज्ज्वल चित्तहरे।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ८॥

ॠकारप्रिय ऋक्षगणेश्वरवन्दितपादपयोज हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ९॥

ऌतकसमर्चित काङ्क्षितदायक कुक्षिगताखिललोकहरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ १०॥

ॡवल्लोकाचारसमीरित रूपविवर्जित नित्य हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ११॥

एकमनोमुनिमानसगोचर गोकुलपालक वेषहरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ १२॥

ऐरावतकरसन्निभदोर्बल निर्जितदानवसैन्यहरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ १३॥

ओङ्काराम्बुज वनकलहंसक कलिमलनाशन नामहरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ १४॥

औन्नत्याश्रय संश्रितपालक पाकनिबर्हणसहजहरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ १५॥

अङ्गदसेवित भङ्गविवर्जित सङ्गविवर्जित सेव्य हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ १६॥

अस्तगिरिस्थितभास्करलोहितचरणसरोजतलाढ च हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ १७॥

कमलावल्लभ कमलविलोचन कमलविभाहरपाद हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ १८॥

खरमुखदानवसैनिकखण्डन खेचरकीर्तित कीर्तिहरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ १९॥

गणपतिसेवित गुणगणसागर वरगतिनिर्जित नागहरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २०॥

घटिकापर्वतवासि नृकेसरि वेषविनाशितदोषहरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २१॥

ङः प्रत्येकं न यथा वाक्ये नाथ तथा ते चित्ते क्रोधः ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २२॥

चपलाभासुरमेघनिभप्रभ कमलाभासुरवक्ष हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २३॥

छलयुतदूरचलाचललोचन गोपवधूहृदयेश हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २४॥

जगतीवल्लभरूपपरात्पर सर्वजगज्जनपूज्य हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २५॥

झङ्कारध्वनिकारिमधुवृतमञ्जुलकेशकलापहरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २६॥

ञाक्षरयुतजाधात्वर्थे परिनिष्ठित नैष्ठिकगम्य हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २७॥

टङ्कारध्वनिकारिधनुर्धरशातशराहतदैत्य हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २८॥

ठमिति मनुं वा समिति मनुं वा जपतां सिद्धिद नाथ हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ २९॥

डमरुकरेश्वरपूजितनिर्जितरावणदानव राम हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३०॥

ढक्कावाद्यप्रिय भयवारण विनयविवर्जितदूर हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३१॥

णटधात्वर्थे पण्डितमण्डितसकलावयवोद्भासि हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३२॥

तत्त्वमसीति व्याहृतिवाच्यप्राच्यधिनायकपूज्य हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३३॥

थूत्कारानिलवेगनभोगतसप्तसमुद्रवराह हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३४॥

दयितालिङ्गितवक्षोभासुर भूसुरपूजितपाद हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३५॥

धरणीतनयाजीवितनायक वालिनिबर्हण राम हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३६॥

नारायण माधव केशव गोपालक हे गोविन्द हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३७॥

परमेश्वर वरपक्षिकुलेश्वरवाहन मोहनरूप हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३८॥

फालविलोचन पङ्कजसम्भव कीर्तितसद्गुणजाल हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ३९॥

बलरिपुपूजित बलजितदानव बलदेवानुज बाल हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४०॥

भवभयनाशन भक्तजनप्रिय भूभरनाशनकारि हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४१॥

मायामोहितसकलजगज्जनमारिचासुरमथन हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४२॥

यमुनातटिनीवरतटविहरण यक्षगणेश्वरवन्द्य हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४३॥

रामरमेश्वर रावणमर्दन रतिललनाधव तात हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४४॥

लक्ष्मणसेवित मङ्गलक्षणलक्षित शिक्षितदुष्ट हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४५॥

वालिविनाशन वारिधिबन्धन वनचरसेवितपाद हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४६॥

शङ्करकीर्त्तित निजनामामृतशत्रुनिबर्हणबाणहरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४७॥

षड्गुणमण्डित षड्दोषापह दोषाचरकुलकाल हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४८॥

सदय सदाशिवपूजितपादुक हृदयविराजित दयित हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ४९॥

हस्तचतुष्टयभासुरनन्दक शङ्खगदारथचरण हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ५०॥

ळुबुळुबुनिःस्वनमज्जितमन्दरपर्वतधारणकूर्म हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ५१॥

क्षयितनिशाटक्षान्तिगुणाढ्य क्षेत्रज्ञात्मक देव हरे ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ५२॥

गणपतिपण्डितरचितं स्तोत्रं कृष्णस्येदं जयतु धरण्याम् ।
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ५३॥

कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥
कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण जनार्दन कृष्ण हरे ॥ ५४॥

॥ इति कृष्णाक्षरामाला समाप्ता ॥

रामगीता

निर्गुण निष्कल नित्य निरञ्जन निर्गतमत्सर गम्य दयालो ।
संसारेऽस्मिन्निर्गतसारे पाहि विपारे दशवदनारे ॥ १॥

कोऽयं पुत्रः केयं जाया माया सेयं मर्दय रागम् ।
सर्वसमत्वं सर्वहितत्वं सत्सङ्गित्वं देहि विभो मे ॥ २॥

विश्वारम्भं विष्णोर्नाम्नामस्तु सहस्रं सकलस्तुत्यम् ।
नाम तु ''रामे'' त्यमलमिदं ते तारकमृषयः परिभाषन्ते ॥ ३॥

सीताकामिन्निह भीतानां चरणं शरणं तव यातानाम् ।
जननक्लेशं मरणक्लेशं नाशय गमनागमनक्लेशम् ॥ ४॥

चतुरास्यस्त्वञ्चक्रधरस्त्वं प्रमथेशस्त्वं परमात्मा त्वम् ।
सनकप्रभृतिस्तुतगुणमेतद् व्यूहचतुष्कं बहुकीर्ते ते ॥ ५॥

नास्ति वपुस्ते नास्ति तवाख्या नास्ति च कर्म स्वस्तिद विष्णो ।
मायाकल्पितमिदमखिलं ते रूपं कर्म च नाम च विविधम्॥ ६॥

तत्त्वसमूहादुपरि लसन्तं पुरुषं साङ्ख्याः प्रवदन्ति त्वाम् ।
दशशतपत्रे दशमुखशत्रो योगविदस्त्वामालोकन्ते ॥ ७॥

जैमिनिमुख्याः कर्मश्रौतं देवपते ते वैभवमाहुः ।
वेदान्ते ये निष्ठितमतयः ते प्राहुस्त्वामेकमभेदम् ॥ ८॥

तव च ममापि च भेदाभावं दूरदृशांपर कथयति वाणी ।
मम तु तयाऽभूद्दशमज्ञानं दशवदनारे दशमस्यैव ॥ ९॥

॥ इति श्रीरामगीता समाप्त। ॥

गीतमाला

प्रथमम् अग्निगीतम्

वाचमधितिष्ठज्ज्योतिरपि भौमम् ।
किञ्चिदपि दैवं गेयमविरामम् ॥ १॥

स क्रतुषु होता विप्रमुखवासी ।
अत्ति च स हव्यं वेदितलभासी ॥ २॥

पावक वसुस्त्वं ज्वालशतमाली ।
कश्चिदसि रुद्रः शास्त्रशतशाली ॥ ३॥

पावक यदास्ये भासि मनुजानाम् ।
ते तदिह राज्यं बिभ्रति पशूनाम् ॥ ४॥

अस्मि तव दास्ये सञ्चर मदास्ये ।
सत्सदसि मोहं यामि न यथाऽहम् ॥ ५॥

नास्ति शरणं मे कोऽप्यवनिपृष्ठे ।
अग्निमवनार्थी देवमुपतिष्ठे ॥ ६॥

अस्ति करमाली कोऽपि दिवि राजा ।
एष ननु कीली भाति भुवि राजा ॥ ७॥

आह्वयति भानुं प्रातरशनाय ।
त्वामनल यज्वा सायमशनाय ॥ ८ ॥

एकममृत त्वां प्रातरपि सायम् ।
श्रोतुमयि वाणीराह्वयति सोऽयम् ॥ ९ ॥

दीप्ततरकील त्वं भजसि हव्यम् ।
नेतरयि वाचां स्तोत्रमपि भव्यम् ॥ १० ॥

अस्मि न समर्थो यज्ञमयि कर्तुम् ।
स्तोत्रमवलम्बे शर्म तव भर्तुम् ॥ ११ ॥

पार्थिवविभूतिस्त्वं पचनकारी ।
वैद्युतविभूतिर्वाक्पटलधारी ॥ १२ ॥

त्वं पचनकारी भास्युदरभाण्डे ।
वाक्पटलधारी देव कुलकुण्डे ॥ १३ ॥

भास्युदरभाण्डे भासि कुलकुण्डे ।
किं च हृदि जीवो भास्यनल पिण्डे ॥ १४ ॥

स्वस्य हृदि रूपं त्वामनल लोके ।
भामि विमलोऽयं धाम्नि गतभीके ॥ १५ ॥

त्वां तमहमर्थं यः स्मरति नित्यम् ।
पावक विशोकः पश्यति स सत्यम् ॥ १६ ॥

यत् स्फुरणमन्तः स्वस्य धुतपापम् ।
ध्येयमिदमग्रे देव तव रूपम् ॥ १७॥

देव भवसि त्वं वह्निरिह लोके ।
सर्वद समन्ताद्विद्युदसि नाके ॥ १८॥

अत्र जननी ते भूमिरतिपूता ।
द्यौरनल देवी तत्र तव माता ॥ १९॥

अत्र वसवस्ते वायुसख हस्ते ।
वाचमनुभद्रास्तत्र तव रुद्राः ॥ २०॥

अत्र हृदि राजन् राजसि नराणाम् ।
तत्र वरदान्तः खेलसि सुराणाम् ॥ २१॥

अत्र जगदीश त्वं ज्वलननामा ।
तत्र मघवा त्वं निःसदृशधामा ॥ २२॥

द्वावनलशक्रौ पामरजनानाम् ।
स द्वितनुरेकः पण्डितजनानाम् ॥ २३॥

भानुरपि देवो लोकसुहृदेषः ।
व्यापक कृशानो कोऽपि तव वेषः ॥ २४॥

देहि भगवन्मे सम्पदमुदाराम् ।
बुद्धिमपि वह्ने त्रातरतिधीराम् ॥ २५॥

देव वरदाग्रे त्वं भव ममास्त्रम् ।
बोधय च मह्यं सर्वमपि शास्त्रम् ॥ २६॥

सुप्रभ धिया त्वां व्याप्तमखिलानि ।
नौमि सकलानि क्षेमद जयानि ॥ २७॥

गाणपतमग्रेः सर्वजनहृद्यम् ।
भातु भयहारि च्छन्द इदमाद्यम् ॥ २८॥

द्वितीयं गणपतिगीतम्

भद्रतरमूर्तिं भद्रतमकीर्तिम् ।
रुद्रतनयं तं गायत महान्तम् ॥ १॥

ज्योतिरिह सूक्ष्मज्वालमतिदीप्तम् ।
भाति कुलकुण्डे योगिमनुजाप्तम् ॥ २॥

तन्नमत वाचो दैवतमुदारम् ।
सङ्कटशतानां यातुमिह पारम् ॥ ३॥

तं गणपतिं यो विस्मरति लोके ।
सन्ततमभाग्यो मज्जति स शोके ॥ ४॥

दम्पतिविहारः शीतशशिखण्डे ।
नन्दननिवासो दीप्तकुलकुण्डे ॥ ५॥

मित्र कुरु भक्तिं विश्वयुवराजे ।
देहि हृदमुष्मै योगिनुतिभाजे ॥ ६॥

अत्र सशरीरे मूलशिखिरूपी ।
योगविमुखो ना विन्दति न पापी ॥ ७॥

ध्यायति सदान्तर्योऽग्रभुजमेतम् ।
तं भजति देवी सिद्धिरतिपूतम् ॥ ८॥

तस्य वरभासा सन्द्रवति शीर्षम् ।
यस्य परितप्तं विन्दति सहर्षम् ॥ ९॥

योगविद आहुः शीर्षरसधाराम् ।
सिद्धिशतहेतुंताममृतसाराम् ॥ १०॥

पीठमधिरूढं मूलसरसीजम् ।
सर्वभुवनानां नौमि युवराजम् ॥ ११॥

काचन रुचिस्ते भर्गसुत पूता ।
मङ्गलसुषुम्नामार्गचरमाता ॥ १२॥

भाग्यमखिलानां देव तव हस्ते ।
भूरि महिमानं वर्णयतु कस्ते ॥ १३॥

हस्तिवदनो ना स त्वमधिदैवम् ।
सङ्कटहरार्यैः सङ्गदितमेवम् ॥ १४॥

त्वत्पदसरोजे यस्य हृदि भक्तिः ।
काऽपि शिवसूनो तद्वचसि शक्तिः ॥ १५ ॥

त्वं खलु मघोनो धूतसुजनार्तिः ।
अत्र भुवि काचित्कार्यकरमूर्तिः ॥ १६ ॥

त्वां भजति गाढप्रीतिरतिशस्ता ।
सिद्धिरिति लक्ष्मीस्तामरसहस्ता ॥ १७ ॥

सश्रियमुदारां श्रीहृदयहारी ।
संवितरतान्मे सर्वबलधारी ॥ १८ ॥

शीतनगजायाः सूनुरतिहृद्याम् ।
भूरिकरुणो मे पूरयतु विद्याम् ॥ १९ ॥

वारणमुखो मे वारयतु कष्टम् ।
सर्वमपि देयाच्छर्वसुत इष्टम् ॥ २० ॥

मां चरणभाजं पापहरनामा ।
पालयतु शम्भोः सूनुरतिधामा ॥ २१ ॥

निर्जितजराधिं निर्दलितरोगम् ।
दन्तिवदनो मे वर्धयतु योगम् ॥ २२ ॥

सुक्षमतमं मे क ष्टहिमभानो ।
प्राणबलमग्र्यं देहि हरसूनो ॥ २३ ॥

वाचि मम दिव्यां धेहि निजधाटीम् ।
सिद्धिमजितास्यै देहि वरचेटीम् ॥ २४॥

हस्तिमुख याचे गाढरसभक्त्या ।
आविश विभो मां दिव्यनिजशक्त्या ॥ २५॥

देहि निजतेजः किङ्करजनाय ।
ईश्वर गणानां भारतहिताय ॥ २६॥

सर्वद जनोऽयं वाञ्छति न मुक्तिम् ।
देशकुशलाय प्रार्थयति शक्तिम् ॥ २७॥

गाणपतमेतद्गीतमतिशुद्धम् ।
भातु भयहारि च्छन्दसि निबद्धम् ॥ २८॥

तृतीयम् इन्द्रगीतम्

धर्ता सुकृतानां हर्ता दुरितानाम् ।
भर्ता नभसो मे कर्तास्तु शुभानाम् ॥ १॥

ख्याताऽमितवीर्यो धूताखिलवैरी ।
नेता विबुधानां त्राता भवतान्मे ॥ २॥

विक्रम्य विधुन्वन्वक्रांत्समरेषु ।
चक्रायुधमित्रः शक्रः शरणं नः ॥ ३॥

शक्रः शुभवित्तां लक्ष्मीमनियत्ताम् ।
आनन्दितचित्तां मह्यं भुवि धत्ताम् ॥ ४॥

नाकं त्वमरक्षः पाकं युधि जित्वा ।
वृत्रं च विधूयामित्रं पविपाणे ॥ ५॥

एतानि विकुर्वन् भूतानि स पाकः ।
शुभ्रे विफलोऽभूदभ्रे तव जिष्णो ॥ ६॥

पाकः प्रभुरेव प्राणांश्च विकर्तुम् ।
यद्यम्बरनाथ त्वं न प्रतिकर्तुम् ॥ ७॥

न त्वं यदि रोद्धा वृत्रः परिभूय ।
प्रज्ञामयि विश्वं दद्यात्तिमिराय ॥ ८॥

प्रज्ञामुषसं तां ज्ञं चाजितसूर्यम् ।
यद्रक्षसि वृत्रात्तत्ते सुरकार्यम् ॥ ९॥

सम्मोहनशक्तिर्वृत्रस्य तु निद्रा ।
सम्बोधनशक्तिर्विद्युत्तव भद्रा ॥ १०॥

नादान्तविभास्यं वेदान्तरहस्यम् ।
मोदान्तरयोधं भेदान्तकमीडे ॥ ११॥

खे वायुमनन्तं रुद्रं निनदन्तम् ।
भान्तं मघवन्तं वन्दे भगवन्तम् ॥ १२॥

तारं मदनारिं प्राणं पवमानम् ।
देवं मघवानं ध्यायाम्यतिमानम् ॥ १३॥

वीर्ये सकलं त्वद्देवेश्वर नूनम् ।
देवासुरमर्त्यैर्युक्तं जगदूनम् ॥ १४॥

निर्जित्य समस्तान् भावानपि जिष्णो ।
सम्राड् भुवनानामासीः प्रभविष्णो ॥ १५॥

नाभेत्स्य इमं चेद् वृत्रं दिवि वीरम् ।
नामोक्ष्यदघारे मेघो भुवि नीरम् ॥ १६॥

गोपायसि विश्वं शश्वद्बहुरीतीः ।
स्वर्नाथ विधुन्वन् वृत्रस्य विभूतीः ॥ १७॥

चत्वारि वपूंषि प्राहूर्मुनयस्ते ।
येषां जगदेतद्देवाधिप हस्ते ॥ १८॥

रूपाणि विभो ते भूयांसि ततानि ।
दिङ्मात्रतयाद्यैश्वत्वार्युदितानि ॥ १९॥

सर्वस्य च कर्ता सर्वस्य च धर्ता ।
प्राणः पुरुहूतः को नाम स गीतः ॥ २०॥

सूत्रं विदुरेके सुश्लोकमनन्तम् ।
केचिद्विधिमाहुः कं तं भगवन्तम् ॥ २१॥

विश्वस्य निदानं विश्वातिगमानम् ।
एतं विदुरन्ये वायुं पवमानम् ॥ २२॥

सर्वस्य च नेत्री सर्वैरपि मान्या ।
गीर्वाणपते ते कालस्तनुरन्या ॥ २३॥

रुद्रं विदुरेके नेतर्बहुलीलम् ।
प्राहुर्यममन्ये कायं तव कालम् ॥ २४॥

कालोऽयमनादिः सूर्यादपि पूर्वः ।
भाक्तो जनिवादस्तस्याजर सर्वः ॥ २५॥

सद्व्यापकशक्तिं प्राणं कथयन्ति ।
व्यक्तेतरशब्दं कालं गणयन्ति ॥ २६॥

व्यक्तेतरशब्दान्नैव प्रणवोऽन्यः ।
तस्येन्द्र तवाङ्के विश्राम्यति धन्यः ॥ २७॥

सच्छक्तिरभाणि प्राणः परमस्य ।
चिच्छक्तिरगादि प्राज्ञैः प्रणवोऽस्य ॥ २८॥

सर्वत्र विसारि ज्योतिस्तटिदाख्यम् ।
देवेन्द्र शरीरं गीतं तव मुख्यम् ॥ २९॥

प्राणं प्रणवं च ज्योतिश्च विसारि ।
देवं नयदेकं वन्दे भवधारि ॥ ३०॥

एकः स तिसृणामस्थूलतनूनाम् ।
राजत्यभिमानी राजा भुवनानाम् ॥ ३१॥

दृश्यस्य परस्ताद्ब्रह्मागुणमस्ति ।
इन्द्राभिधया तत् दृश्येऽत्र चकास्ति ॥ ३२॥

बन्धुर्भुवनानां सूर्यस्ततकीर्तिः ।
राजन्नमराणां तुर्या तव मूर्तिः ॥ ३३॥

देव प्रतिबिम्बीभूय प्रतिसूर्यम् ।
विश्वस्य महेन्द्र त्वं पश्यसि कार्यम् ॥ ३४॥

नो केवलमर्के पिण्डेषु च तातः ।
अन्तः प्रतिबिम्बीभूतः पुरुहूतः ॥ ३५॥

पिण्डे प्रतिबिम्बीभूतं पुरुहूतम ।
वैश्वानरमाहुर्लोकत्रयततातम् ॥ ३६॥

नान्यानि किल त्वद्रूपाण्यखिलानि ।
मायिन् विभवं ते किं वा कथयामि ॥ ३७॥

पाहि त्रिदशानामीशान कृशान्नः ।
भूयात्तव देव स्तोता बहुलान्नः ॥ ३८॥

सर्वं भवताऽहं पक्षेण जयानि ।
ईशो भुवि लोके नाकेश भवानि ॥ ३९॥

आविश्य विभो मां कर्तुं भुवि कार्यम् ।
सम्प्रेषय किञ्चिद्दिव्यं तव वीर्यम् ॥ ४० ॥

धाता भुवनानां नेता त्रिदशानाम् ।
आविश्य विभुर्मामाभातु सुकर्मा ॥ ४१ ॥

इन्द्रं प्रभजन्तामेतास्तनुमध्याः ।
नाथं गुणवत्यो यद्वत्तनुमध्याः ॥ ४२ ॥

चतुर्थं वायुगीतम्

दिष्टात्पतितोऽहं मन्दे नरवृन्दे ।
त्राणाय समीरं तं सम्प्रति वन्दे ॥ १ ॥

तारासुमचित्रं खेलत्खगजालम् ।
उद्यानमिदं ते खं वात विशालम् ॥ २ ॥

देवोऽसि बलस्य प्राणोऽस्यखिलस्य ।
ब्रूयादतिमानं कस्ते महिमानम् ॥ ३ ॥

भक्त्या तव पुण्यं तुल्यं क्व नु गण्यम् ।
तद्वक्ति चरित्रं रैक्वस्य पवित्रम् ॥ ४ ॥

मेयः स च नाकः स्वल्पो नरलोकः ।
76. meṣo mahīvṛnmandāno māhināvānmahematiḥ
mrakṣomṛlīko maṁhiṣṭho mrakṣakṛtvā mahāmahaḥ.

77. madacyunmarḍitāmadvā madānāṁ patirātapaḥ
suśastiḥ svastidāḥ svardṛgrādhānāmākaraḥ patiḥ.

iti saptamaṁ nāmaśatakam

78. iṣuhasta iṣāṁ dātā vasudātā vidadvasuḥ
vibhūtirvyānāśirveno varīyān viśvajidvibhuḥ.

79. nṛcakṣāḥ sahuriḥ svarvitsuyajñaḥ suṣṭhutaḥ svayuḥ
āpiḥ pṛthivyāḥ janitā sūryasya janitā śrutaḥ.

80. spaḍvihāyāḥ smatpurandhirvṛṣaparvā vṛṣantamaḥ
sādhāraṇaḥ sukharathaḥ svaśvaḥ satrājidadbhutaḥ.

81. jyeṣṭharājo jīradānurjagmirvitvakṣaṇo vaśī
vidhātā viśvamā āśurmāyī vṛddhamahāvṛdhaḥ.

82. vareṇyo viśvatūrvātasyeśāno dyaurvicarṣaṇiḥ
satīnamanyurgodatraḥ sadyojātovibhañjanuḥ.

83. vitantasāyyo vājānāṁ vibhaktā vasva ākaraḥ
vīrako vīrayurvajraṁ babhirvīreṇya āghṛṇiḥ.

84. vājineyo vājasanirvājānāṁ patirājikṛt
vāstoṣpatirvarpaṇītirviśāṁ rājā vapodaraḥ.

85. vibhūtadyumna ācakrirādārī dodhato vadhaḥ
ākhaṇḍalo dasmavarcāḥ sarvaseno vimocanaḥ.

86. vajrasya bhartā vāryāṇāṁ patirgojidgavāṁ patiḥ
viśvavyacāḥ sañcakānaḥ suhārdo janitā divaḥ.

87. samantunāmā purudha pratīko bṛhataḥ patiḥ
dīdhyāno dāmano dātā dīrghaśravasa ṛbhvasaḥ.

88. daṁsanāvāndivaḥ saṁmrāḍdevajūto divāvasuḥ
daśamo devatā dakṣo dudhrodyumnī dyumantamaḥ.

ityaṣṭamaṁ nāmaśatakam

89. maṁhiṣṭharātiritthādhīrdīdyāno dadhṛṣirdudhiḥ
duṣṭarīturduścyavano divomāno divovṛṣā.

90. dakṣāyyo dasyuhādhṛṣṇuḥ dakṣiṇāvān dhiyāvasuḥ
dhanaspṛddhṛṣito dhātā dayamāno dhanañjayaḥ.

91. divyo dvibarhāḥ sannāryaḥ samaryastrāḥ simaḥ sakhā
dyukṣaḥ samāno daṁsiṣṭho rādhasaḥ patiradhriguḥ.

92. samrāṭ pṛthivyā ojasvān vayodhā ṛtupā ṛbhuḥ
eko rājaidhamānadviḍekavīra urujrayāḥ.

93. lokakṛjjanitā'śvānāṁ johūtro janitā gavām
jaritā januṣāṁ rājā girvaṇāḥ sunvato'vitā.

94. atkaṁ vasānaḥ kṛṣṭīnāṁ rājokthyaḥ śipravānuraḥ
īḍyodāśvāninatamo ghoraḥ saṅkrandanaḥ svavān.

95. jāgṛvirjagato rājā gṛtso goviddhanāghanaḥ
jetā'bhibhūrakūpāro dānavānasuro'rṇavaḥ.

96. dhṛṣvīrdamūnāstavasastavīyānantamo'vṛtaḥ
rāyodātā rayipatiḥ vipaścidvṛtrahantamaḥ.

97. aparītaḥ ṣālapaścād dadhvāyutkāra āritaḥ
vohlāvaniṣṭho vṛṣṇyāvānvṛṣaṇavānavṛko'vataḥ.

98. garbho'samaṣṭakāvyoyugahiśuṣmodadhṛṣvaṇiḥ
pratnaḥ patirvājadāvā jyotiḥ kartā girāṁ patiḥ.

iti navamaṁ nāmaśatakam

99. anavadyaḥ sambhṛtāśvo vajrivādadrivāndyumān
dasmo yajatro yodhīyānakavāriryataṅkaraḥ.

100. pṛdakusānurojīyān brahmaṇaścoditā yamaḥ
vandaneṣṭhā purāṁ bhettā bandhureṣṭhā bṛhaddivaḥ.

101. varūtā madhuno rājā praṇenīḥ paprathī yuvā
uruśaṁsohavaṁśrotā bhūridāvā bṛhacchravāḥ.

102. mātāstiyānāṁ vṛṣabho mahodātā mahāvadhaḥ
sugmyaḥ surādhāḥ satrāṣāḍodatīnāṁ nadodhuniḥ.

103. akāmakarśanaḥ svarṣāḥ sumṛlīkaḥ sahaskṛtaḥ
pāstyasya hotā sindhūnāṁ vṛṣābhojo rathītamaḥ.

104. sakhā munīnāṁ janidāḥ svadhāvānasamo'pratiḥ
manasvānadharo maryo bṛbaduktho'vitā bhagaḥ.

105. aṣāhlo'rīhla ādartā vīraṁ kartā viśaspatiḥ
ekaḥ patirinaḥ puṣṭiḥ suvīryo haripāḥ sudṛk.

106. eko havyaḥ sanādārugokovākasya sakṣaṇiḥ
suvṛktiramṛto'mṛktaḥ khajakṛdbaladaḥ śunaḥ.

107. amatro mitra akāyyaḥ sudāmābjin mahomahī
rathaḥ subāhuruśanā sunītho bhūridāḥ sudāḥ.

108. madasya rājā somasya pītvī jyāyāndivaḥ patiḥ
taviṣīvānghano yudhmo havanaśrutsahaḥ svarāṭ.

iti daśamaṁ nāmaśatakam

atreme bhavantyupasaṁhāraślokāḥ

1. idaṁ sahasramindrasya nāmnāṁ paramapāvanam
ṛgvedato gaṇapatiḥ saṅgṛhya vinibaddhavān.

2. nātra nāmnaḥ paunaruktyaṁ na ca kārādi pūraṇam
ślokamadhye na cāramyā śatakasyopasaṁhṛtiḥ.

3. nāmāmeṣāṁ chāndasatvātsarveṣāṁ ca svarūpataḥ
avalokyā yathā chandaḥ śabdaśuddhirvicakṣaṇaiḥ.

4. anekapadanāmāni viniyojyāni pūjane
caturthyantaprayogeṣu vyutkramācca yathānvayam.

5. asya nāmasahasrasya vedamūlasya sevane
pūrṇam phalaṁ tadvijñeyaṁ yatsvādhyāyaniṣevaṇe.

6. mantrebhyaḥ sambhṛtaṁ sārametannāmasahasrakam
aindraṁ yo bhajate bhaktyā tasya syuḥ siddhayo vaśe.

7. indro vijayate devaḥ sarvasya jagataḥ patiḥ
vedamūlaṁ jayatyetattasya nāmasahasrakam.



iti śrībhagavanmaharṣiramaṇāntevāsino vāsiṣṭhasya
narasiṁhasūnoḥ gaṇapateḥ kṛtiḥ indrasahasranāmastotraṁ
sampūrṇam

16

indrasahasranāmastotre proktānāṁ nāmnāṁ caturthyantarūpāṇi

om indrāya namaḥ
om devatamāya namaḥ
om anīlāya suparṇāya namaḥ
om pūrṇabandhurāya namaḥ
om viśvasya damitre namaḥ
om viśvasyeśānāya namaḥ
om viśvacarṣiṇaye namaḥ
om viśvāni cakraye namaḥ
om viśvasmāduttarāya namaḥ
om viśvabhuve namaḥ
om bṛhate namaḥ
om cekitānāya namaḥ
om acakrayā svadhayā vartamānāya namaḥ
om parasmai namaḥ
om viśvānarāya namaḥ
om viśvarūpāya namaḥ
om viśvāyuṣe namaḥ
om viśvataspṛthave namaḥ
om viśvakarmaṇe namaḥ
om viśvadevāya namaḥ
om viśvato dhīye namaḥ
om aniṣkṛtāya namaḥ
om triṣujātāya namaḥ
om tigmaśṛṅgāya namaḥ
om devāya namaḥ
om bradhnāya namaḥ
om aruṣāya namaḥ
om carate namaḥ
om rucānāya namaḥ
om paramāya namaḥ
om viduṣe namaḥ
om aruco rocayate namaḥ
om ajāya namaḥ
om jyeṣṭhāya namaḥ
om janānāṁ vṛṣabhāya namaḥ
om jyotiṣe namaḥ
om jyeṣṭhāya sahase namaḥ
oṁ mahine namaḥ
om abhikratūnāṁ damitre namaḥ
om viśvasya karmaṇo dhartre namaḥ
om dhanānāṁ dhartre namaḥ
om dhātṝṇāṁ dhātre namaḥ
om dhīrāya namaḥ
om dhiyeṣitāya namaḥ
om yajñasya sādhanāya namaḥ
om yajñāya namaḥ
om yajñavāhase namaḥ
om apāmajāya namaḥ
om yajña juṣāṇāya namaḥ
om yajatāya namaḥ
om yuktagrāvṇo' vitre namaḥ
om iṣirāya namaḥ
om suvajrāya namaḥ
om cyavanāya namaḥ

om yoddhre namaḥ
om yaśasāya namaḥ
om yajñiyāya namaḥ
om yahave namaḥ
om durmatīnāmavayātre namaḥ
om pāpasya rakṣasohantre namaḥ
om kṛśasya coditre namaḥ
om kṛtnave namaḥ
om kṛtabrahmaṇe namaḥ
om dhṛtavratāya namaḥ
om dhṛṣṇvojase namaḥ
om dhīnāmavitre namaḥ
om dhanānāṁ sañjite namaḥ
om acyutāya namaḥ
om tamasovihantre namaḥ
om tvaṣṭre namaḥ
om tanūpe namaḥ
om tarutre namaḥ
om turāya namaḥ
om tveṣanṛmṇaya namaḥ
om tveṣasaṁdṛśe namaḥ
om turāṣāhe namaḥ
om aparājitāya namaḥ
om tugryāvṛdhāya namaḥ
om dasmatamāya namaḥ
om tuvikūrmitamāya namaḥ
om tujāya namaḥ
om vṛṣaprabharmaṇe namaḥ
om viśvāni viduṣe namaḥ
om adardirāya namaḥ
om tavase namaḥ
om mandrāya namaḥ
om matīnāṁ vṛṣabhāya namaḥ
om marutvate namaḥ
om marutāmṛṣaye namaḥ
om mahāhastine namaḥ
om ganapataye namaḥ
om dhiyaṁ jinvāya namaḥ
om bṛhaspataye namaḥ
om māhināya namaḥ
om maghone namaḥ
m mandine namaḥ
om markāya
om arkāya namaḥ
om medhirāya namaḥ
om mahate namaḥ
om pratirūpāya namaḥ
om paromātrāya namaḥ
om pururūpāya namaḥ
om puruṣṭutāya namaḥ
om puruhūtāya namaḥ
om puraḥ sthātre namaḥ
om purumāyāya namaḥ
om purandarāya namaḥ
om purupraśastāya namaḥ
om purukṛte namaḥ
om purāṁ dartre namaḥ
om purutamāya namaḥ
om purugūrtāya namaḥ
om pṛtsujetre namaḥ
om puruvarpase namaḥ
om pravepanine namaḥ
om papraye namaḥ
om pacetase namaḥ
om paribhuve namaḥ
om panīyase namaḥ

om apratiṣkutāya namaḥ
om pravṛddhāya namaḥ
om pravayase namaḥ
om pātre namaḥ
om pūṣanvate namaḥ
om antarābharāya namaḥ
om puruśākāya namaḥ
om pāñcajanyāya namaḥ
om purubhojase namaḥ
om purūvasuave namaḥ
om piśaṅgarātaye namaḥ
om papuraye namaḥ
om puroyodhāya namaḥ
om pṛthujrayase namaḥ
om prarikvane namaḥ
om pradivāya namaḥ
om pūrvyāya namaḥ
om purobhuve namaḥ
om pūrvaje ṛṣaye namaḥ
om praṇetre namaḥ
om pramataye namaḥ
om panyāya namaḥ
om pūrvayāvne namaḥ
om prabhūvasave namaḥ
om prayajyave namaḥ
om pāvakāya namaḥ
om pūṣṇe namaḥ
om padavye namaḥ
om prathikṛte namaḥ
om patye namaḥ
om purutmate namaḥ
om palitāya namaḥ
om hetre namaḥ
om prahetre namaḥ
om prāvitre namaḥ
om pitre namaḥ
om purunṛmṇāya namaḥ
om parvateṣṭhe namaḥ
om prācāmanyave namaḥ
om purohitāya namaḥ
om purāṁ bhindave namaḥ
om anādhṛṣyāya namaḥ
om purāje namaḥ
om paprathintamāya namaḥ
om pṛtanāṣāhe namaḥ
om bāhuśardhine namaḥ
om bṛhadreṇave namaḥ
om aniṣṭṛtāya namaḥ
om abhibhūtaye namaḥ
om ayopāṣṭaye namaḥ
om bṛhadraye namaḥ
om apidhānavate namaḥ
om brahmapriyāya namaḥ
om brahmajūtāya namaḥ
om brahmavāhase namaḥ
om araṅgamāya namaḥ
om bodhinmanase namaḥ
om avakrakṣiṇe namaḥ
om bṛhadbhānave namaḥ
om amitraghe namaḥ
om bhūrikarmaṇe namaḥ
om bharekṛtnave namaḥ
om bhadrakṛte namaḥ
om bhārvarāya namaḥ
om bhṛmahe namaḥ
om bhareṣu havyāya namaḥ

om bhūryojase namaḥ
om purodhne namaḥ
om prāśuṣā namaḥ
om praṣāhe namaḥ
om prabhaṅgīne namaḥ
om mahiṣāya namaḥ
om bhīmāya namaḥ
om bhūryāsutaye namaḥ
om aśastighne namaḥ
om prasakṣīṇe namaḥ
om viśpataye namaḥ
om vīrāya namaḥ
om paraspe namaḥ
om śavasaspatye namaḥ
om purudatrāya namaḥ
om pitṛtamāya namaḥ
om purukṣave namaḥ
om bhūrigave namaḥ
om paṇaye namaḥ
om pratvakṣaṇā namaḥ
om purāṁ darmṇe namaḥ
om panasyave namaḥ
om abhimātighne namaḥ
om pṛthivyā vṛṣabhāya namaḥ
om pratnāya namaḥ
om pramandīne namaḥ
om prathamasmai namaḥ
om pṛthave namaḥ
om tyasmai namaḥ
om samudravyacase namaḥ
om pāyave namaḥ
om praketaya namaḥ
om carṣaṇīsahāya namaḥ

om kārudhāyase namaḥ
om kavivṛdhāya namaḥ
om kanīnāya namaḥ
om kratumate namaḥ
om kratave namaḥ
om kṣapāṁvastre namaḥ
om kavitamāya namaḥ
om girvāhase namaḥ
om kīricodanāya namaḥ
om kṣapāvate namaḥ
om kauśikāya namaḥ
om kārīṇe namaḥ
om kṣamyasya rājñe namaḥ
om gopataye namaḥ
om gave namaḥ
om gordurāya namaḥ
om aśvasya durāya namaḥ
om yavasya durāya namaḥ
om āduraye namaḥ
om candrabudhnāya namaḥ
om carṣaṇipre namaḥ
om cakṛtyāya namaḥ
om codayanmataye namaḥ
om citrabhānave namaḥ
om citratamāya namaḥ
om camrīṣāya namaḥ
om cakramāsajāya namaḥ
om tuviśuṣmāya namaḥ
om tuvidyumnāya namaḥ
om tuvijātāya namaḥ
om tuvīmaghāya namaḥ
om tuvikūrmaye namaḥ
om tuvimrakṣāya namaḥ

om tuviśagmāya namaḥ
om tuviprataye namaḥ
om tuvinṛmṇāya namaḥ
om tuvigrīvāya namaḥ
om tuvirādhase namaḥ
om tuvikratave namaḥ
om tuvimātrāya namaḥ
om tuvigrābhāya namaḥ
om tuvideṣṇāya namaḥ
om tuviṣvaṇaye namaḥ
om tūtujaye namaḥ
om tavasāya namaḥ
om takvāya namaḥ
om tuvigraye namaḥ
om turvaṇaye namaḥ
om tradāya namaḥ
om ratheṣṭhāya namaḥ
om taraṇaye namaḥ
om tumrāya namaḥ
om tvaṣīmate namaḥ
om anapacyutāya namaḥ
om todāya namaḥ
om tarutrāya namaḥ
om taviṣī muṣāṇāya namaḥ
om taviṣāya namaḥ
om turṇe namaḥ
om titirvaṇe namaḥ
om taturaye namaḥ
om trātre namaḥ
om bhūrṇaye namaḥ
om tūrṇaye namaḥ
om tavastarāya namaḥ
om yajñavṛddhāya namaḥ
om yajñiyānāṁ prathamasmai namaḥ
om vyajvano vṛdhāya namaḥ
om amitrakhādāya namaḥ
om animiṣāya namaḥ
om asunvato viṣṇāya namaḥ
om ajurāya namaḥ
om akṣitotaye namaḥ
om adābhyāya namaḥ
om aryāya namaḥ
om śipriṇīvate namaḥ
om agorudhāya namaḥ
om aśrutkarṇāya namaḥ
om antarikṣapre namaḥ
om amitaujase namaḥ
om ariṣṭutāya namaḥ
om adṛṣṭāya namaḥ
om ekarāje namaḥ
om ūrdhvāya namaḥ
om ūrdhvasānāya namaḥ
om sanādyūne namaḥ
om sthirāya namaḥ
om sūryāya namaḥ
om svabhūtyojase namaḥ
om satyarādhase namaḥ
om sanaśrutāya namaḥ
om akalpāya namaḥ
om satvānāṁ ketave namaḥ
om acyutacyute namaḥ
om uruvyacase namaḥ
om śavasine namaḥ
om svapataye namaḥ
om svojase namaḥ

om śacīvate namaḥ
om avidīdhayave namaḥ
om satyaśuṣmāya namaḥ
om satyasatvane namaḥ
om satyasya sūnave namaḥ
om somape namaḥ
om dasyorhantre namaḥ
om divo dhartre namaḥ
om divyasya rājñe namaḥ
om cetanāya namaḥ
om ṛgmiyāya namaḥ
om arvaṇe namaḥ
om rocamānāya namaḥ
om rabhode namaḥ
om ṛtape namaḥ
om ṛtāya namaḥ
om ṛjīṣiṇe namaḥ
om raṇakṛte namaḥ
om revate namaḥ
om ṛtviyāya namaḥ
om radhracodanāya namaḥ
om ṛṣvāya namaḥ
om rāyo'vanaye namaḥ
om rājñe namaḥ
om rayisthānāya namaḥ
om radāvasave namaḥ
om ṛbhukṣṇe namaḥ
om animānāya namaḥ
om aśvāya namaḥ
om sahamānāya namaḥ
om samudriyāya namaḥ
om ṛṇakātaye namaḥ
om girvaṇasyave namaḥ
om kījāya namaḥ
om svidvane namaḥ
om khajaṅkarāya namaḥ
om ṛjīṣāya namaḥ
om vasuvide namaḥ
om venyāya namaḥ
om vājeṣudadhṛṣāya namaḥ
om kavaye namaḥ
om virapśine namaḥ
om vīlitāya namaḥ
om viprāya namaḥ
om viśvavedase namaḥ
om ṛtāvṛdhāya namaḥ
om ṛtayuje namaḥ
om dharmakṛte namaḥ
om dhenave namaḥ
om dhanajite namaḥ
om dhāmne namaḥ
om varmaṇe namaḥ
om vāhe namaḥ
om ṛtejase namaḥ
om sakṣaṇaye namaḥ
om somyāya namaḥ
om saṁsṛṣṭajite namaḥ
om ṛbhuṣṭhirāya namaḥ
om ṛtayave namaḥ
om sabalāya namaḥ
om sahyave namaḥ
om vajravāhase namaḥ
om ṛcīṣāmāya namaḥ
om ṛgmīne namaḥ
om adhṛṣvate namaḥ
om ṛsvaujase namaḥ

om sugope namaḥ
om svayaśastarāya namaḥ
om svabhiṣṭisumnāya namaḥ
om sehānāya namaḥ
om sunītaye namaḥ
om sukṛtāya namaḥ
om śucaye namaḥ
om ṛṇaye namaḥ
om sahasaḥ sūnave namaḥ
om sudānave namaḥ
om sagaṇāya namaḥ
om vasave namaḥ
om stomyāya namaḥ
om samadvane namaḥ
om satrāghne namaḥ
om stomavāhase namaḥ
om ṛtīṣahāya namaḥ
om śaviṣṭhāya namaḥ
om śavasaḥ putrāya namaḥ
om śatamanyave namaḥ
om śatakratave namaḥ
om śakrāya namaḥ
om śikṣānarāya namaḥ
om śuṣmiṇe namaḥ
om śrutkarṇāya namaḥ
om śravayatsakhye namaḥ
om śatamūtaye namaḥ
om śardhanītaye namaḥ
om śatanīthāya namaḥ
om śatāmaghāya namaḥ
om ślokine namaḥ
om śivatamāya namaḥ
om śrutyaṁ nāmabibhrate namaḥ
om anānatāya namaḥ
om śūrāya namaḥ
om śipriṇe namaḥ
om sahasrotaye namaḥ
om śubhrāya namaḥ
om śṛṅgavṛṣonapāte namaḥ
om śāsāya namaḥ
om śākāya namaḥ
om śravaskāmāya namaḥ
om śavasāvate namaḥ
om ahaṁsanāya namaḥ
om surūpakṛtnave namaḥ
om īśānāya namaḥ
om sūsuvānāya namaḥ
om śacīpataye namaḥ
om satīnasatvane namaḥ
om sanitre namaḥ
om śaktīvate namaḥ
om amitakratave namaḥ
om sahasracetase namaḥ
om sumanase namaḥ
om śrutyāya namaḥ
om śuddhāya namaḥ
om śrutāmaghāya namaḥ
om satrādāvne namaḥ
om somapāvne namaḥ
om sukratave namaḥ
om śmaśruṣu śritāya namaḥ
om codapravṛddhāya namaḥ
om viśvasya jagataḥ prāṇatas-
pataye namaḥ
om cautnāya namaḥ
om suprakaratnāya namaḥ

om narekaratnāya namaḥ
om cakamānāya namaḥ
om sadāvṛdhāya namaḥ
om svabhiṣṭaye namaḥ
om satpataye namaḥ
om satyāya namaḥ
om cārave namaḥ
om vīratamāya namaḥ
om catine namaḥ
om citrāya namaḥ
om cikituṣe namaḥ
om ājñātre namaḥ
om sataḥ sataḥ pratimanāya namaḥ
om sthātre namaḥ
om sacetase namaḥ
om sadivāya namaḥ
om sudaṁsase namaḥ
om suśravastamāya namaḥ
om sahode namaḥ
om suśrutāya namaḥ
om samrāje namaḥ
om supārāya namaḥ
om sunvataḥ sakhe namaḥ
om brahmavāhastamāya namaḥ
om brahmṇe namaḥ
om viṣṇave namaḥ
om vasvaḥ pataye namaḥ
om harave namaḥ
om raṇāya saṁskṛtāya namaḥ
om rudrāya namaḥ
om raṇitre namaḥ
om īśānakṛte namaḥ
om śivāya namaḥ
om viprajūtāya namaḥ
om vipratamāya namaḥ
om yahvāya namaḥ
om vajriṇe namaḥ
om hiraṇyāya namaḥ
om vavrāya namaḥ
om vīratarāya namaḥ
om vāyave namaḥ
om mātariśvane namaḥ
om marutsakhye namaḥ
om gūrtaśravase namaḥ
om viśvagūrtāya namaḥ
om vandanaśrute namaḥ
om vicakṣaṇāya namaḥ
om vṛṣṇayeāya namaḥ
om vasupataye namaḥ
om vājine namaḥ
om vṛṣabhāya namaḥ
om vājinī vasave namaḥ
om vigrāya namaḥ
om vibhīṣaṇāya namaḥ
om vahnaye namaḥ
om vṛddhāyave namaḥ
om viśrutāya namaḥ
om vṛṣṇe namaḥ
om vajrabhṛte namaḥ
om vṛtraghne namaḥ
om vṛddhāya namaḥ
om viśvavārāya namaḥ
om vṛtañcayāya namaḥ
om vṛṣajūtye namaḥ
om vṛṣarathāya namaḥ

om vṛṣabhānnāya namaḥ
om vṛṣakratave namaḥ
om vṛṣakarmā namaḥ
om vṛṣamaṇase namaḥ
om sudakṣāya namaḥ
om sunvato vṛdhāya namaḥ
om adroghavāce namaḥ
om asuraghne namaḥ
om vedhase namaḥ
om satrākāya namaḥ
om ajarāya namaḥ
om apārāya namaḥ
om suhavāya namaḥ
om bhīrurave namaḥ
om abhibhaṅgāya namaḥ
om aṅgirastamāya namaḥ
om amartyāya namaḥ
om svāyudhāya namaḥ
om aśatrave namaḥ
om apratītāya namaḥ
om abhimātiṣāḍe namaḥ
om amatrīṇe namaḥ
om sūnave namaḥ
om arcatryāya namaḥ
om smaddiṣṭaye namaḥ
om abhayaṅkarāya namaḥ
om abhinetre namaḥ
om spārharādhase namaḥ
om saptaraśmaye namaḥ
om abhiṣṭikṛte namaḥ
om anarvāṇe namaḥ
om svarjite namaḥ
om iṣkartre namaḥ
om stotṝṇāmavitre namaḥ
om aparāya namaḥ
om ajātaśatrave namaḥ
om senānye namaḥ
om ubhayāvine namaḥ
om ubhayaṅkarāya namaḥ
om urugāyāya namaḥ
om satyayonaye namaḥ
om sahasvate namaḥ
om urvarāpataye namaḥ
om ugrāya namaḥ
om gope namaḥ
om ugrabāhave namaḥ
om ugradhanvane namaḥ
om ukthavadhanāya namaḥ
om gāthaśravase namaḥ
om giraṁ rājñe namaḥ
om gambhīrāya namaḥ
om girvaṇastamāya namaḥ
om vajrahastāya namaḥ
om carṣaṇīnāṁ vṛṣabhāya namaḥ
om vajradakṣiṇāya namaḥ
om somakāmāya namaḥ
om somapataye namaḥ
om somavṛddhāya namaḥ
om sudakṣiṇāya namaḥ
om subrahmaṇe namaḥ
om sthavirāya namaḥ
om sūrāya namaḥ
om sahiṣṭhāya namaḥ
om saprathase namaḥ
om tasmai namaḥ
om rājñe namaḥ

om hariśmaśārave namaḥ
om harivate namaḥ
om harīṇāṁ patye namaḥ
om astṛtāya namaḥ
om hiraṇyabāhave namaḥ
om urvyūtaye namaḥ
om harikeśāya namaḥ
om hirīmaśāya namaḥ
om hariśiprāya namaḥ
om haryamāṇāya namaḥ
om harijātāya namaḥ
om harimbharāya namaḥ
om hiraṇyavarṇāya namaḥ
om haryṛvāya namaḥ
om harivarpase namaḥ
om haripriyāya namaḥ
om haniṣṭhāya namaḥ
om haryatāya namaḥ
om havyāya namaḥ
om hariṣṭhe namaḥ
om hariyojanāya namaḥ
om satvane namaḥ
om suśiprāya namaḥ
om sukṣatrāya namaḥ
om suvīrāya namaḥ
om sutape namaḥ
om ṛṣaye namaḥ
om gāthānyāya namaḥ
om gotrabhide namaḥ
om grāmaṁ vahamānāya namaḥ
om gaveṣaṇāya namaḥ
om jiṣṇave namaḥ
om stasthuṣa īśānāya namaḥ
om jagata īśānāya namaḥ
om nṛtave namaḥ
om naryāṇi viduṣe namaḥ
om nṛpataye namaḥ
om nettre namaḥ
om nṛmṇasya tūtujaye namaḥ
om nimeghamānāye namaḥ
om naryāpase namaḥ
om sindhūnāṁ patye namaḥ
om uttarasmai namaḥ
om naryāya namaḥ
om niyutvate namaḥ
om nicitāya namaḥ
om nakṣaddabhāya namaḥ
om nahuṣṭarāya namaḥ
om navyāya namaḥ
om nidhātre namaḥ
om nṛmaṇase namaḥ
om sadhrīcīnāya namaḥ
om suteraṇāya namaḥ
om nṛtamānāya namaḥ
om nadanumate namaḥ
om navīyase namaḥ
om nṛtamāya namaḥ
om nṛjite namaḥ
om vicayiṣṭhāya namaḥ
om vajrabāhave namaḥ
om vṛtrakhādāya namaḥ
om valaṁ rujāya namaḥ
om jātūbharmaṇe namaḥ
om jyeṣṭhatamāya namaḥ
om janabhakṣāya namaḥ
om janaṁ sahāya namaḥ

om viśvāṣāhe namaḥ
om vaṁsagāya namaḥ
om vasyase namaḥ
om niṣpāśe namaḥ
om aśanimate namaḥ
om nṛṣāhe namaḥ
om pūrbhide namaḥ
om purāṣāhe namaḥ
om abhhiṣāhe namaḥ
om jagatastasthuṣaspataye namaḥ
om samatsu saṁvṛje namaḥ
om samdhatre namaḥ
om susandṛśe namaḥ
om savitre namaḥ
om aruṇāya namaḥ
om svaryāya namaḥ
om svarociṣe namaḥ
om sutrāmṇe namaḥ
om stuṣeyyāya namaḥ
om sanaje namaḥ
om svaraye namaḥ
om aketave ketuṁ kṛṇvate namaḥ
om apeśase peśaḥ kṛṇvate namaḥ
om vajreṇa hatvine namaḥ
om mahināya namaḥ
om marutstotrāya namaḥ
om marudgaṇāya namaḥ
om mahāvīrāya namaḥ
om mahāvrātāya namaḥ
om mahāyyāya namaḥ
om mahyaipramataye namaḥ
om matre namaḥ
om maghonāṁ maṁhiṣṭhāya namaḥ
om manyumye namaḥ
om manyumattamāya namaḥ
om meṣāya namaḥ
om mahīvṛte namaḥ
om mandānāya namaḥ
om māhināvate namaḥ
om mahemataye namaḥ
om mrakṣāya namaḥ
om mṛlīkāya namaḥ
om maṁhiṣṭhāya namaḥ
om mrakṣakṛtvane namaḥ
om mahāmahāya namaḥ
om madacyute namaḥ
om marḍitre namaḥ
om madvane namaḥ
om madānāṁ patye namaḥ
om ātapāya namaḥ
om suśastaye namaḥ
om svastidhne namaḥ
om svardṛśe namaḥ
om rādhānāṁ patye namaḥ
om ākarāya namaḥ
om iṣuhastāya namaḥ
om iṣāṁ dātre namaḥ
om vasudātre namaḥ
om vidadvasave namaḥ
om vibhūtaye namaḥ
om naśaye namaḥ
om venāya namaḥ

om varīyase namaḥ
om viśvajite namaḥ
om vibhave namaḥ
om nṛcakṣse namaḥ
om sahuraye namaḥ
om svarvide namaḥ
om suyajñāya namaḥ
om suṣṭhutāya namaḥ
om svayave namaḥ
om āpaye namaḥ
om pṛthivyājanitre namaḥ
om sūryasya janitre namaḥ
om śrutāya namaḥ
om spaśe namaḥ
om vihāyase namaḥ
om smatpurandhaye namaḥ
om vṛṣaparvaṇe namaḥ
om vṛṣantamāya namaḥ
om sādhāraṇāya namaḥ
om sukharathāya namaḥ
om svaśvāya namaḥ
om satrājite namaḥ
om adbhutāya namaḥ
om jyeṣṭarājāya namaḥ
om jīradānave namaḥ
om jagmaye namaḥ
om vitvakṣaṇāya namaḥ
om vaśīne namaḥ
om vidhātre namaḥ
om viśvame namaḥ
om āśave namaḥ
om māyīne namaḥ
om vṛddhamahase namaḥ
om vṛdhāya namaḥ
om vareṇyāya namaḥ
om viśvatūre namaḥ
om vātasyeśānāya namaḥ
om dive namaḥ
om vicarṣaṇaye namaḥ
om satīnamanyave namaḥ
om godatrāya namaḥ
om sadyojātāya namaḥ
om vibhañjanave namaḥ
om vitantasāyyāya namaḥ
om vājānāṁ vibhaktre namaḥ
om vasva ākarāya namaḥ
om vīrayave namaḥ·
om vajraṁ babhraye namaḥ
om vīreṇyāya namaḥ
om āghṛṇaye namaḥ
om vājineyāya namaḥ
om vājasanaye namaḥ
om vājānāṁ patye namaḥ
om ājikṛte namaḥ
om vāstoṣpataye namaḥ
om varpaṇītaye namaḥ
om viśāṁ rājñe namaḥ
om vapodarāya namaḥ
om vibhūtadyumnāya namaḥ
om ācakraye namaḥ
om ādāriṇe namaḥ
om dodhato vadhāya namaḥ
om ākhaṇḍalāya namaḥ
om dasmavarcase namaḥ
om sarvasenāya namaḥ
om vimocanāya namaḥ

om vajrasya bhartre namaḥ
om vāryāṇāṁ patye namaḥ
om gojite namaḥ
om gavāṁ patye namaḥ
om viśvavyacase namaḥ
om sañcakānāya namaḥ
om suhārdāya namaḥ
om divo janitre namaḥ
om samantunāmne namaḥ
om purudha pratīkāya namaḥ
om bṛhataḥ patye namaḥ
om dīdhyānāya namaḥ
om dāmanāya namaḥ
om dātre namaḥ
om dīrghaśrakvasāya namaḥ
om ṛbhvasāya namaḥ
om daṁsanavate namaḥ
om divaḥ saṁmrāje namaḥ
om devajūtāya namaḥ
om divāvasave namaḥ
om daśamāya namaḥ
om devatāyai namaḥ
om dakṣāya namaḥ
om dudhrāya namaḥ
om dyumnīne namaḥ
om dyumantamāya namaḥ
om maṁhiṣṭharātaye namaḥ
om itthādhīye namaḥ
om dīdyānāya namaḥ
om dadhṛṣāya namaḥ
om dudhaye namaḥ
om duṣṭarītave namaḥ
om duścyavanāya namaḥ
om divomānāya namaḥ
om divovṛṣṇe namaḥ
om dakṣāyyāya namaḥ
om dasyudhne namaḥ
om dhṛṣṇave namaḥ
om dakṣiṇāvate namaḥ
om dhiyāvasave namaḥ
om dhanaspṛhe namaḥ
om dhṛṣitāya namaḥ
om dhātre namaḥ
om dayamānāya namaḥ
om dhanañjayāya namaḥ
om divyāya namaḥ
om dvibarhase namaḥ
om sate namaḥ
om āryāya namaḥ
om samaryāya namaḥ
om tre namaḥ
om simāya namaḥ
om sakhye namaḥ
om dyukṣāya namaḥ
om samānāya namaḥ
om daṁsiṣṭhāya namaḥ
om rādhasaḥ patye namaḥ
om adhrigave namaḥ
om pṛthivyāḥ samrāje namaḥ
om ojasvate namaḥ
om vayodhe namaḥ
om ṛtupe namaḥ
om ṛbhave namaḥ
om ekasmai rājñe namaḥ
om edhamānadviṣe namaḥ
om ekavīrāya namaḥ

om urujrayase namaḥ
om lokakṛte namaḥ
om aśvānāṁ janitre namaḥ
om johūtrāya namaḥ
om gavām janitre namaḥ
om jaritre namaḥ
om januṣāṁ rājñe namaḥ
om girvaṇase namaḥ
om sunvato vitre namaḥ
om atkaṁ vasānāya namaḥ
om kṛṣṭīnāṁ rājñe namaḥ
om ukthyāya namaḥ
om śipravate namaḥ
om urave namaḥ
om īḍyāya namaḥ
om dāśuṣe namaḥ
om inatamāya namaḥ
om ghorāya namaḥ
om saṅkrandanāya namaḥ
om svavate namaḥ
om jāgṛvaye namaḥ
om jagato rājñe namaḥ
om gṛtsāya namaḥ
om govide namaḥ
om dhanāghanāya namaḥ
om jetre namaḥ
om abhibhūve namaḥ
om akūpārāya namaḥ
om dānavate namaḥ
om asurāya namaḥ
om arṇavāya namaḥ
om dhṛṣvaye namaḥ
om damūnase namaḥ
om tavasas tavīyase namaḥ
om nantamāya namaḥ
om avṛtāya namaḥ
om rāyo dātre namaḥ
om rayipataye namaḥ
om vipaścite namaḥ
om vṛtrahantamāya namaḥ
om aparītāya namaḥ
om sahe namaḥ
om apascāddadhvane namaḥ
om yutkarāya namaḥ
om aritāya namaḥ
om vodre namaḥ
om vaniṣṭhāya namaḥ
om vṛṣṇyāvate namaḥ
om vṛṣaṇvate namaḥ
om avṛkāya namaḥ
om vatāya namaḥ
om garbhāya namaḥ
om samaṣṭakāvyāya namaḥ
om yuje namaḥ
om ahiśuṣmāya namaḥ
om dadhṛṣvaṇaye namaḥ
om pratnāya patye namaḥ
om vājadāvne namaḥ
om jyotiḥ kartre namaḥ
om girāṁ patye namaḥ
om anavadyāya namaḥ
om sambhṛtāśvāya namaḥ
om vajrivate namaḥ
om adrimate namaḥ
om dyumate namaḥ
om dasmāya namaḥ

om yajatrāya namaḥ
om yodhīyase namaḥ
om akavāraye namaḥ
om yataṅkarāya namaḥ
om pṛdakusānave namaḥ
om ojīyase namaḥ
om brahmaṇaścoditre namaḥ
om yamāya namaḥ
om vandaneṣṭhe namaḥ
om purāṁ bhettre namaḥ
om bandhureṣṭhe namaḥ
om bṛhaddivāya namaḥ
om varūtre namaḥ
om madhuno rājñe namaḥ
om praṇenye namaḥ
om paprathine namaḥ
om yune namaḥ
om uruśaṁsāya namaḥ
om havaṁśrotre namaḥ
om bhūridāvne namaḥ
om bṛhacchravase namaḥ
om mātre namaḥ
om stiyānāṁ vṛṣabhāya namaḥ
om mahodātre namaḥ
om mahāvadhāya namaḥ
om sugmyāya namaḥ
om surādhase namaḥ
om satrāṣāhe namaḥ
om odatīnāṁ nadāya namaḥ
om dhunāya namaḥ
om akāmakarśanāya namaḥ
om svarṣase namaḥ
om sumṛlīkāya namaḥ
om sahaskṛtāya namaḥ
om pāstyasya hotre namaḥ
om sindhūnāṁ vṛṣṇe namaḥ
om bhojāya namaḥ
om rathītamāya namaḥ
om munīnāṁ sacye namaḥ
om janide namaḥ
om svadhāvate namaḥ
om asamāya namaḥ
om aprataye namaḥ
om manasvate namaḥ
om adharāya namaḥ
om maryāya namaḥ
om bṛbadukthāya namaḥ
om avitre namaḥ
om bhagāya namaḥ
om aṣāhlāya namaḥ
om arīhlāya namaḥ
om ādartre namaḥ
om vīraṁ kartre namaḥ
om viśaspataye namaḥ
om ekasmai patye namaḥ
om ināya namaḥ
om puṣṭaye namaḥ
om suvīryāya namaḥ
om haripe namaḥ
om sudṛśe namaḥ
om ekasmai havyāya namaḥ
om sanāte namaḥ
om āruje namaḥ
om okāya namaḥ
om vākasya sakṣaṇaye namaḥ
om suvṛktaye namaḥ

om amṛtāya namaḥ
om amṛktāya namaḥ
om khajakṛte namaḥ
om balade namaḥ
om śunāya namaḥ
om amatrāya namaḥ
om mitrāya namaḥ
om akāyyāya namaḥ
om sudāmne namaḥ
om abjine namaḥ
om mahase namaḥ
om mahine namaḥ
om rathāya namaḥ
om subāhave namaḥ
om uśanse namaḥ
om sunīthāya namaḥ
om bhūride namaḥ
om sudāse namaḥ
om madasya rājñe namaḥ
om somasya pītvine namaḥ
om jyāyase namaḥ
om divaḥ pataye namaḥ
om taviṣīvate namaḥ
om ghanāya namaḥ
om yudhmāya namaḥ
om havanaśrute namaḥ
om sahase namaḥ
om svarāje namaḥ

iti indrasahasranāmāvalī

indrasahasre prathamaṁ śatakam

prathamaḥ prārambhastabakaḥ gāyatraḥ

1. maghavate śacīhṛdayahāriṇe
bhagavate namaḥ kuliśadhāriṇe.

2. jayati vṛtrajijjayati vajravān
jayati viṣṭapatritayarājyavān.

3. bahu śatekṣaṇaṁ bhuvanasākṣiṇam
hṛdaya taṁ paraṁ smara purandaram.

4. tridaśapārthivaṁ hṛdaya vāsavam
trijagadantaraṁ smara nirantaram.

5. parijano bhavāmyayi mahendra te
parigṛhāṇa māṁ sumanasāṁ pate.

6. prativaderna me varada dāsatām
tava kṛpāśrite mayi vivardhatām.

7. abhṛtitumburuprabhṛtigīta te
stutividhau madaṁ matirupeti me.

8. tava kṛpākarastavavidhau rame
ava mahendra māmava kulaṁ ca me.

9. ajara vāk patatviyamayi tvayi
avataratvadastava maho mayi.

10. ṛtavilokane vitanutādbalam
ṛtapate maho mama girāmalam.

11. kathayatāṁ manaḥ kathamagocaram
nayatu te maho varada me giram.

12. jayati kasya vāgamaladarśanā
bhavati devatākaruṇayā vinā.

13. tava guṇādikaṁ bhuvananātha me
sphuratu dāhare sarasije hare.

14. sakaladarśinīmatulasārayā
mama guhāṁ kuru tvamṛtadhārayā.

15. jayatu śakragā jayatu bhāsvatī
jayatu satyadṛṅ mama sarasvatī.

16. abhimatāptaye viphalatāmitā
harihayākhilā puruṣakāritā.

17. ahamathastave tatamanodrave
avatarāmi bhostava divo vibho.

18. mukharayan diśo nutiravairnavaiḥ
prajanayan rasaṁ divi manodravaiḥ.

19. samavalambate tava padāmbujam
ayamaye vṛṣannava navā nijam.

20. lasadalaṅkṛtiṁ bahuguṇānvitām
rasavatīmatiśramavivardhitām.

21. girimimāmahaṁ tridaśabhūpate
guṇavate sutāmiva dadāmi te.

22. bhava niṣevito mama subhāṣayā
patiriva priyo rucirayoṣayā.

23. stutirasau lasad bahu dayārasam
vibudhabhūpaterviśatu mānasam.

24. paramapāvane svaviṣayāvane
harinutirbalaṁ diśatu naḥ phalam.

25. naramanoramāḥ kavipaterimāḥ
surapatistuteratisukhaṁ mukham.

dvitīyaḥ svarūpastabakaḥ traiṣṭubhaḥ

26. devaṁ mahendraṁ padabandhupāpa-
vidhvaṁsanaṁ vajradharaṁ namāmi
lokāntaraṁ lokamayaṁ ca yasya
lokātigaṁ ca pravibhāti rūpam.

27. ātmaiva lokaḥ sakalo mahīyā-
nātmaiva lokāntaratāmupaiti
ātmaiva lokasya paraḥ parastād-
ātmaiva lokādhipatirmahendraḥ.

28. prāk sargato niṣkala eka āsīt
satpūrṇabodhākṛtirādidevaḥ
saprājyaśaktirbhuvanaṁ sasarja
sṛṣṭasya cābhūjjagato'ntarātmā.

29. yo bhāti śuddho jagataḥ parastāt
yaścāntarātmā jagato'khilasya
bāhyālayākāśavadekarūpā-
vetau kavīnāṁ vacaneṣu bhinnau.

30. lokātigaṁ brahma vadanti śuddhaṁ
lokāntaraṁ cālakamindramāhuḥ
jñeyo'yamekasya parīkṣakāṇāṁ
dṛṣṭiprabhedādabhidhānabhedaḥ.

31. brahmāguṇaṁ gamyatamaṁ cakāsti
trailokyamindraḥ saguṇaḥ praśāsti
pūrvasya rūpaṁ bhavati tripāda-
manyasya viśvena sahaikapādam.

32. yaścāguṇo yaḥ saguṇaśca devo
bhāvaḥ sa keṣāmapi paṇḍitānām
modaḥ sadā pūrṇaraso'pareṣāṁ
bodhaḥ pareṣāṁ viduṣāṁ matena.

33. bhāvaḥ sa no cedasato matiḥ kā
bodho na cet kīdṛgivāsya sattā
bhāvaḥ prabodhaśca na cedvadantu
modo bhavedeṣa kathaṁ sakhāyaḥ.

34. pāṣāṇasatteva vinaiva bodhaṁ
tasyāpi satteti na sādhuvādaḥ
pāṣāṇasattā'pi vihāya bodhaṁ
kenānubhūtā sudhiyo bhaṇantu.

35. śuktau yathā vā rajatasya bodho
bodho'pyasaṁtsambhavatīti vādī

satyeva taddeśagatāmasattāṁ
bodho samāropayatītarasya.

36. modasya bhāso na vinā'nubhūtiṁ
bodhaṁ vinā kasya kuto'nubhūtiḥ
bodhaḥ prapūrṇaśca sukho nisargāt
tadyoganidrānubhave prasiddham.

37. vastusvarūpaṁ paramaḥ prakāśo
bodhaḥ sa eva pramadaḥ sa eva
bhāvaḥ sa evānubhavaikagamyaḥ
svarbhūmipālaśca sa eva namyaḥ.

38. sūkṣmo virājannakhilasya rājā
śabdāyate sūkṣmamayaṁ prakāśaḥ
tasminnakhaṇḍe paramānubhūtiḥ
kācit prapūrṇā lasati prakāśe.

39. sattā vibhā nādaparā na kācit
cittiśca śabdāditarā na kāpi
modaśca nākhaṇḍanijānubhūteḥ
anyā na kācidyadi cintayāmaḥ.

40. sthūlāḥ prakāśaśca rasaśca śabdaḥ
sthūlaprapañce pṛthagatra bhāntu
vastvekameva tritayaṁ tadetat
sūkṣmatvakāle yadi cintayāmaḥ.

41. śuddhasvarūpe na rasāntarāṇāṁ
jñānāntarāṇāṁ ca bhavetpraveśaḥ
viśvāntare sarvarasānubhūtiḥ
sarvajñatā ca praguṇe vibhātaḥ.

42. eko rasaḥ sarvarasānubhūtau
sarvajñatāyāmabhidā ca vittiḥ
nityātmaniṣṭheṣvapi sampradṛṣṭe
tat kiṁ dvayaṁ viśvapatāvasādhyam.

43. bhāvena sa prāṇiti nānilena
buddhyā vijānātyakhilāni nākṣaiḥ
sammodate pūrṇatayā na bhogaiḥ
īṣṭe svaśaktyā na camūbalena.

44. tasya svarājaḥ sahajaṁ catuṣkaṁ
sattāmatirvyāpakatā ca śaktiḥ
ekaṁ parastādavibhaktametat
dṛṣṭiprabhedādbhuvane'tra bhaktam.

45. sattā ca sanvāṅmayamudgataṁ ced-
vittiśca vettā yadi kāpyahantā
modaśca modī yadi bhogyamanyat
śaktiśca śakto yadi kāryajālam.

46. bhoktā divaḥ paktṛtamaḥ pṛthivyā
ākāśadeśena mahāśarīrī
śakteradhīśaḥ śamano'surāṇāṁ
gṛhṇātu me vāgupahāramindraḥ.

47. sūryasya bhāsā pratapannabhasto
jvālābhiragneḥ pradahan pṛthivyām
vidyutpratāpena pacantsamantāt
gṛhṇātu me vāgupahāramindraḥ.

48. rājyāya tanvanbhuvaneṣu śāstraṁ
vajraṁ dadhāno jvaladugramastram

svābhāvikaḥ sarvajagannṛpālo
gṛhṇātu me vāgupahāramindraḥ.

49. indrasya dṛṣṭiḥ saratādito naḥ
taptānanāthānabhilakṣya dīnān
nīcaiḥ śayāte paribhūyamānau
deśaśca vaṁśaśca sameṣu yeṣām.

50. etāḥ kavīnāmadhipasya pūtāḥ
trātāramātmānamaśeṣajantoḥ
nāthaṁ surāṇāṁ nayanaṁ munīnām
indraṁ bhajantāṁ harimindravajrāḥ.

tṛtīyo daivastabakaḥ gāyatraḥ

51. vajrapraharaṇaṁ viśvasya śaraṇam
gāyāmi sagaṇaṁ tadbrahma saguṇam.

52. trailokyapṛthivīsiṁhāsanapatiḥ
viśvambharamatirdaivaṁ mama vṛṣā.

53. vandārujanatā mandāraviṭapī
bṛndārakapatirdaivaṁ mama vṛṣā.

54. sarvottamaśacī kāntāsahacaraḥ
viśvādirasiko daivaṁ mama vṛṣā.

55. vṛddhopi yuvakaḥ siddho'pi rasikaḥ
lokādipuruṣo daivaṁ mama vṛṣā.

56. nityo'pi lasito līlārthavapuṣā
bhīmo'pi ruciro daivaṁ mama vṛṣā.

57. lokāriditijapradhvaṁsanavidhau
nirṇidrakuliśo daivaṁ mama vṛṣā.

58. sarvasya jagato dhāne ca nayane
trāṇe ca nirato daivaṁ mama vṛṣā.

59. śāstrāṇi vidadhallokasya calane
nityāṁśca niyamān daivaṁ mama vṛṣā.

60. antarbahirapi vyāpto jagadidam
pāre ca vilasan daivaṁ mama vṛṣā.

61. pāre sa viguṇo loke'tra saguṇaḥ
durjñeyamahimā daivaṁ mama vṛṣā.

62. yasyārdhamakhilaṁ vyāptasya bhuvanam
sa prājyavibhavo daivaṁ mama vṛṣā.

63. krāntvā jagadidaṁ sarvaṁ sthiracaram
ekaḥ paripacan daivaṁ mama vṛṣā.

64. nityaṁ ca bhuvanavyāpārarasikaḥ
nityaṁ ca vicaran daivaṁ mama vṛṣā.

65. kartā ca jagatāṁ dhartā damayitā
kalyāṇacarito daivaṁ mama vṛṣā.

66. ātmā ca janako rājā ca jagatām
indro muninuto daivaṁ mama vṛṣā.

67. dīpto divi ravirvidyutsurapathe
vahniḥ kuvalaye daivaṁ mama vṛṣā.

68. tāraḥ sakalavijjyotiśca vitatam
prāṇaśca paramo daivaṁ mama vṛṣā.

69. sūkṣmo viṣayiṇi sthūlaśca viṣaye
sarvatra vitato daivaṁ mama vṛṣā.

70. sākṣī niraśanaḥ pakṣī nṛtanuṣu
akṣīṇavibhavo daivaṁ mama vṛṣā.

71. agre sitakaro madhye dinakaraḥ
mūle sa dahano daivaṁ mama vṛṣā.

72. vīreḍapi guhāvāsyeva satatam
pūrṇo'pi vividho daivaṁ mama vṛṣā.

73. harṣapradamajo varṣatvakaluṣam
bhavyaṁ mayi maho divyaṁ sa ca vṛṣā.

74. deyāddiviṣadāṁ dhātri patiralam
svaṁ deśamavituṁ mahyaṁ matibalam.

75. prītyā vasumatī vṛttāni maghavā
etāni śṛṇuyāddeyāduta na vā.

caturthaḥ karuṇāstabakaḥ - jāgataḥ

76. praduṣṭajanatā madoddhatihṛte
vinamrajanatā guṇonnatikṛte
aśeṣajagato nṛpāya vaśine
kṛpājaladhaye namaḥ kuliśine.

77. vrataimna vividhaimna pūjanaśatair-
na yogavidhibhimna śuddhacaritaiḥ
na śakratapasā na yajñavidhinā
narasya mahimā kṛpāṁ tava vinā.

78. ṛtajñakṛtibhiḥ sadāpi vinutā
rajovirahitaprajāsu vitatā
sudhāmapi mahaḥ kirantyajara te
na teṣu vinatā kṛpā vijayate.

79. na ko'pi manaso guṇaḥ sujanapā
mahendramanaso jharī tava kṛpā
bhavantamayi tadvibho rucinidhiṁ
bhaṇanti vibudhāḥ kṛpājalanidhim.

80. anugrahakṛte sadāpyabhimukhī
vibho tava vibhā kṛpānarasakhī
rasārdraśirasaṁ supakvamanasaṁ
punāti vimadaṁ naraṁ bhuvi vidam.

81. atīva saralā prakāśabahulā
dhutākhilamalākṛtājarakalā
padāhatabhayā tavākṣaradayā
vinamravadane saratviha jane.

82. gṛṇatsadavanaprakāranipuṇā
munistutaguṇā mahāvitaraṇā
vicitrakaraṇā tavendrakaruṇā
stavena mukhare saratviha nare.

83. aruddhagamanā viśālanayanā
viśuddhapatanā vicitracalanā

tapasvijanapā taveśvarakṛpā
hṛdā vikasite saratviha nate.

84. tava smaraṇato viśuddhamanasi
prabho sumanasāṁ vitīrṇaśirasi
kṛpārasajharī vipāpasakha te
patatvayi mayi svabhāvavinate.

85. cirādavijayaṁ sadāpi sabhayaṁ
vikuṇṭhitaśayaṁ vilokya viṣayam
viṣaṇṇamiha māṁ vṛṣannaruṇayā
tvamāvṛṇu divo vibho karuṇayā.

86. satāṁ matimatāṁ yadindra nayanaṁ
yadugravidhayā dviṣāṁ pradamanam
sadāpi hṛdaye sthitiryadacalā
narasya sakalā kriyā yadamalā.

87. akuṇṭhitagatiryadacchadhiṣaṇā
samastaviṣayāvagāhanaguṇā
tadetadakhilaṁ mahadvilasitaṁ
tavaiva karuṇājharasya phalitam.

88. na paśyati tapo na paśyati guṇaṁ
na paśyati śubhakriyāṁ ca nipuṇam
na paśyati kṛtaṁ yathāvidhi makhaṁ
na paśyati ramāvilāsi ca mukham.

89. na paśyati girāṁ vilāsamatulaṁ
na paśyati mahatkulaṁ ca vimalam
kavāṭarahite gṛhe pravahati
śriyāmadhipate kṛpendra mahati.

90. ahaṅkṛtimahākavāṭarahitaṁ
mano mama gṛhaṁ mahendravihitam
anantavibhavā nirantarajayā
na vā pravahatājjavāttava dayā.

91. ahaṅkṛtivikṛtyayo viracitaṁ
tamastatamahāguhāsthalagatam
kavāṭakamidaṁ hṛdo vighaṭitaṁ
tavāstvavihitaṁ kṛpājharagatam.

92. asāvapi manasyapārayaśasā
tanau ca paritastatena mahasā
imaṁ surapaterviśodhya nipuṇā
naraṁ bhuvisuraṁ karotu karuṇā.

93. smaratsu vikasatsvamoghacalitaṁ
vilakṣaṇatamaprabhāvakalitam
ito'stu surarāṭkṛpāvialsitaṁ
mano'bhilaṣitaṁ mamāstu phalitam.

94. atīva dṛḍhatāṁ vitīrya manase
prakāśabahule balaṁ ca vacase
dhruvasmrtimimāṁ vidhāya ca dhiyaṁ
prabho diśatu te dayā mama jayam.

95. dhruvasmṛtidhare mayi stutikare
padābjasuhṛdi prakāśitahṛdi
jagattrayadharaḥ śacīsahacaraḥ
prapūrṇabharaṇāṁ karotu karuṇām.

96. mamābhilaṣitaṁ prasidhyatu na vā
manaḥ śamamitaṁ pratṛpyatu na vā

jahāmi na bahu prakṛṣṭakaraṇaṁ
dayājalanidhestavendra caraṇam.

97. prasidhyati na cettadindraviguṇaṁ
pratṛpyati na cettadakṣamaguṇam
namatsu na dayā nate dhutabhayā
kriyeta hasanaṁ kadāpi na mayā.

98. svakīyahṛdayaṁ samarpayati te
nataḥ kavirayaṁ suparvanṛpate
mahastava viśatvidaṁ ca bhavanaṁ
caratyanudinaṁ yadindra bhuvanam.

99. manuṁ tava divo mahīśa japatāṁ
stavaṁ tava satāṁ sahāya paṭhatāṁ
kṛpendra tava naḥ pramadārahitāṁ
svadeśamavituṁ dadātu paṭutām.

100. kṛpājharagatiprabhāvamatulaṁ
vadannupaharan hṛdeva kamalam
jaloddhatagatistavastrijagataḥ
praśāsiturasau bhavatvabhimataḥ.

iti indrasahasre prathamaṁ śatakaṁ samāptam.

indrasahasre kaṭākṣastabakaḥ

1. taṁ daśaśatākṣaṁ śītalakaṭākṣam
naumi dhutapāśaṁ vajradharamīśam.

2. ugramapi dakṣaṁ bhāsurakaṭākṣam
vīryadhutavṛtraṁ naumyaditiputram.

3. ārtajanapakṣaṁ rakṣakakaṭākṣam
prāṇigaṇatātaṁ naumi puruhūtam.

4. devamasadṛkṣaṁ pāvanakaṭākṣam
naumi bahumāyaṁ vāsavamameyam.

5. taṁ puruṣamīḍe stutyagaṇalakṣam
svarbhuvanarājñī mohanakaṭākṣam.

6. yatra tava dṛṣṭirvajradhara hṛdyā
navyayugakartrī tatra varavidyā.

7. tatra varalakṣmīḥ santatamaśūnyā
tatra suguṇānāṁ sampadapi mānyā.

8. tatra balamugraṁ śatrumadahāri
tatra nayavittvaṁ viśvahitakāri.

9. yaṁ tava balāre pāvayati dṛṣṭiḥ
tatra naravarye sarvaśubhavṛṣṭiḥ.

10. yatra tava pūrṇā dṛṣṭiratibhadrā
bhedaśatabuddhistasya na daridrā.

11. kiṁ nu sukṛtādī kiṁ duritakhādī
śakra tava rakṣaḥsūdanakaṭākṣaḥ.

12. bhaktirasikānāṁ pāpatatikhādī
so'yamitareṣāṁ pakvasukṛtādī.

13. pāpatatikhādī yatra sa kṛpāvān
tasya hṛdi bodhaḥ sarvasamatāvān.

14. tasya jagadarthe sarvamapi kāryam
adbhutamapāraṁ divyamapi vīryam.

15. pakvasukṛtādi yatra savicitraḥ
tasya khalu bhogaḥ kāmamatimātraḥ.

16. ye giriśanāmnā ye ca harināmnā
ye gaṇapanāmnā ye ca ravināmnā.

17. śaktiritināmnā ye bahuladhāmnā
ye ca matimanto yahva iti nāmnā.

18. tvāmayi bhajante bhaktyatiśayena
sarvasurarūpaṁ bhūri vibhavena.

19. teṣvapi divo bhūnātha tava dakṣāḥ
bhaktajanarakṣā dīkṣitakaṭākṣāḥ.

20. tvatpadamajānannapyaja pavitram
maṅgalaguṇaste dṛkpatanapātram.

21. dṛṣṭivaśataste preṣṭhaphaladhārā
saṁśritakuleṣvapyapratimasārā.

22. pāvanakaṭākṣaiḥ saṁśamaya pāpam
    śītalakaṭākṣaiḥ śakra mama tāpam.

23. maṅgalakaṭākṣaiḥ sādhaya mameṣṭam
    kiṁ ca vibudhānāṁ nātha hara kaṣṭam.

24. bhāsurakaṭākṣairbhāsayatu mahyam
    nākanaranātho jyotiratiguhyam.

iti indrasahasre kaṭākṣastabakaḥ samāptaḥ

indravimśatiḥ

prathamo vargaḥ

1. akhilanāyakaṁ makhabhujāṁ varam
   arividāraṇaṁ harihayaṁ bhaje.

2. madhumucāmṛcāṁ paricayī vṛṣā
   rasakirāṁ girāṁ bhavatu lokitā.

3. amararāja me trimalavāraṇe
   bhajanameva te bhavatu bheṣajam.

4. pratibhaye gade pratibhaṭe paṭau
   varada tāraṇaṁ tava niṣevaṇam.

5. ayamihāśrito bhayaharendra te
   madhurapadyabhṛnnadhuri khidyatu.

dvitīyo vargaḥ

6. vṛtramayi bhṛndannutrjasi nīram
   utsavasameto garjasi gabhīram.

7. ugrataranādaṁ dīptatarabhāsam
   apsu viharantaṁ devavibhumīḍe.

8. vajradharakīlī bhāti bhuvi pātā
   bhūri balaśālī tvaṁ nabhasi netā.

9. manthanata āsīdeṣa iha yajñe
ghar̥ṣaṇaviśeṣādvyomani sa jajñe.

10. bhūrimahimāḍhyaṁ sanmunibhirīḍyam
trātasuracakraṁ sannamataśakram.

tr̥tīyo vargaḥ

11. asuradhipiṇḍaṁ taṭidadhibhūtam
ayamamarāṇāṁ patiradhidaivam.

12. jagadayametatprabhavati bhartum
jagadaridaryākṣayamapi kartum.

13. ayamadhināṭho bhavati balasya
ata ucito'sya prabhurakhilasya.

14. narasuradaityānvitamapi nūnam
balavibhave'smāttribhuvanamūnam.

15. ayamatimattaih karibhirajayyam
ghaṭayati siṁhaṁ mr̥gaśiśujayyam.

caturtho vargaḥ

16. rākāśaśikīrti pākāsuraśatrum
ākāśamahīśaṁ śokāpahamīḍe.

17. nirjitya samastāt bhāvānapi jiṣṇo
samrāḍ bhuvanānāṁ āsīḥ prabhaviṣṇo.

18. jānāmi maruttvan gānāya yaśaste
dhyānāya na rūpaṁ jñānāya na tattvam.

19. loke sthitibhājāṁ yatte ghanamūrtiḥ
dhātrī nikhilānāṁ seyaṁ tava kīrtiḥ.

20. tuṣṭiṁ bahuvittāṁ svārāḍaniyattām
ānanditacittāṁ bhaktasya vidhattām.

indraviṁśatiḥ samāptā

indrasaptakam

1. yadi nirvibandhapadavī mahāguhā
yadi tatra mūlaśuciśaktinirjharī
yadi devarājakaruṇonmukhaṁ mano
na kimapyasādhyamiha dehadhāriṇām.

2. naralokadurvidabalasthalākṛter-
marutāṁ nṛpasya kathamucyatāṁ kathā
bahuvāramāryasamitiṣvitaḥ
karuṇaiva kevalamamuṣya yācyate.

3. tvayi helayetaramatānuyāyibhir-
duritaṁ yadindra mama pūrvajaiścitam
parayālu me śirasi pādasevino
vinivārayasva phalamasya dāruṇam.

4. kavitā niraṅkuśatayā pravartate
mama lokavṛttaparikīrtaneṣu yā
guṇavarṇanāya tava sā samudyatā
maghavan prapaśyati diśaṁ na kāmapi.

5. mahimānamindra tava bhāṣituṁ vayaṁ
prabhavāma naiva varadāstu sā kathā
karuṇā kayānuvidhayā tavārthyatām
iyamapyaraṇyapadavīva durvidā.

6. caraṇānatānakhiladevayūthapān
karuṇāvalokanikareṇa lālayan
varuṇālayādapi gabhīra eti me
śaraṇārthinaḥ smṛtipathaṁ divaspatiḥ.

7. vidadhātu bhadramapavārayatvaghaṁ
vitanotu sampadapi śriyāṁ dhiyām
akhilasya bhūsurakulodbhavasya sa
prabhurambarasya marutāṁ patirvṛṣā.

indrasaptakaṁ samāptam

śrīpavanāṣṭakam

pūrvacatuṣkam

1. prāṇaṁ prapañcasya samīramīḍe
nabhaḥ samantādapi gāhamānam
sa eṣa me sa stutimastu vācaṁ
piteva kanyāṁ parirabhya hṛṣṭaḥ.

2. viśvopakārāya vibhornideśād-
aharniśaṁ gandhavaha prayāsi
śrānto'si manye piba me vacāṁsi
sudhāṁ janastakramivādhvakhinnaḥ.

3. kanyāmivāsmabhyamudāraśīlāṁ
manoramāṁ sampradadau giraṁ yaḥ
tāṁ vāyave samprati darśayāmo
vivardhitāṁ sādhu vibhūṣitāṁ ca.

4. satyaṁ dukūlaṁ paridehi vāṇi
vidhāya dūre vitathaṁ kucelam
mātvajjugupsāṁ gaganasya nāthaḥ
kārṣīnnijaṁ pārśvamupāgatāyāḥ.

uttaracatuṣkam

5. viśvapriyamekaṁ prāṇaṁ pavana tvām
na stauti sacetāḥ ko nāma śarīrī.

6. khelatkhagavargaṁ tārāsumacitram
udyānamidaṁ te khaṁ vāta viśālam.

7. brahmāhurayi tvāṁ mithyātvayi nedam
muktā bhavatā cetseyaṁ gatidīkṣā.

8. vṛttīḥ paribhūya śvabhre vicarantam
paśyannanila tvāṁ paśyedamṛtaṁ nā.

pavanāṣṭakaṁ samāptam

śrīnṛsiṁhapañcaratnam

1. ghaṭikācalamālayamādadhatā
śaraṇāgatarakṣaṇamācaratā
karuṇākalitena jagatpatinā
na vinā mama yāti mudaṁ hṛdayam.

2. vasatiṁ kuruṣe ghaṭikādrivaraṁ
hṛdayaṁ ca madīyamadassadaya
narasiṁha vihāya vibho kapaṭaṁ
vada kutra mano bhavato ramate.

3. ghaṭikācalavāsinamīśamajaṁ
satataṁ smaratāṁ kva satāmaśubham
yadi ko'pi bhavedaśubhasya lavo
rucirāśirudeṣyati pāśi diśi.

4. bahavo'vatarā vilasantu madhuṁ
dviṣato nijavigrahato'pyadhikam
ghaṭikāgirirāḍvaratau nṛharau
karuṇāvati me ramate hṛdayam.

5. caraṇāgatānparamasāttvikānṛṣīn
karuṇāvalokanikareṇa lālayan
ghaṭikādrisīmani nṛsiṁhavigraho
jagatāṁ patirvasati vāsavārcitaḥ.

śrīnṛsiṁhapañcaratnaṁ samāptam

śrīyogāñjaneyapañcaratnam

1. narasiṁhapadāmbhojabhramarāyitamānasam
   yogayuktaṁ hanūmantaṁ ghaṭikādrigataṁ bhaje.

2. eṣa hatvā niśāṭānāṁ koṭīrvīravaraḥ purā
   adhunā dṛśyate yogī narasiṁhapadāntike.

3. satyaṁ vada mahāvīra kutra te ramate manaḥ
   nṛveṣe vā harau kiṁsvinnṛsiṁhatanudhāriṇi.

4. vicintayannivābhedaṁ śrīrāmanarasiṁhayoḥ
   yogayukto marutsūnuḥ ghaṭikādrau pradṛśyate.

5. yasminmanaḥ pathaṁ yāte na janasya vipatpunaḥ
   taṁ bhaje marutaḥ putraṁ yoginaṁ vīrakuñjaram.

śrīyogāñjaneyapañcaratnaṁ samāptam

śrītārakarāmanāmastutiḥ

1. daśarathanandana daśarathanandana daśarathanandana
dāśarathe
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

2. nirguṇa niṣkala nityaniranjana nirgatamatsara gamyavibho
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

3. saṁsāre'smin nirgatasāre pāhi vipāre daśavadanāre
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

4. sarvasamatvaṁ sarvahitatvaṁ satsaṅgatvaṁ dehi vibho me
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

5. jananakleśaṁ maraṇakleśaṁ nāśaya gamanāgamanakleśam
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

6. ko me putraḥ kā me jāyā māyā seyaṁ pāhi vibho mām
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

7. sanakanandanasaṁstutacaritaṁ jānīte tvāṁ goguṇarahitam
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

8. nāsti vapuste nāsti tavākhyā nāsti ca karma svastida viṣṇo
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

9. māyā kalpitamidamakhilaṁ te rūpaṁ karma ca nāma ca
vividham
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

10. nāma tu rāmetyamalamidaṁ te tārakaṁ ṛṣayaḥ paribhāṣante
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

11. caturāsyastvaṁ cakradharastvaṁ parameśastvaṁ paramātmā tvam
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

12. tattvasamūhādupari lasantaṁ puruṣaṁ sāṅkhyāḥ pravadanti tvām
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

13. daśaśatapatre daśamukhaśatro yogavidastvāmālokante
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

14. jaiminimukhyaḥ karmaphalaṁ tvāṁ deva vadanto nandanti sma
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

15. vedānte ye niṣṭhitamatayaḥ te prāhustvāmekamabhedam
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

16. gaṇapatikavinā caritaṁ stotraṁ lalitaṁ prītyai bhavato bhūyāt
daśarathanandana daśarathanandana daśarathanandana
dāśarathe.

śrītārakarāmanāmastutiḥ samāptā

śrīkṛṣṇākṣaramālikā

1. kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

2. avyaya mādhava antavivarjita abdhisutāpriya kānta hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

3. āśaranāśana ādivivarjita ātmajñānada nātha hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

4. indramukhāmara bṛndasamarcita pādasaroruhayugma hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

5. īśvarasannuta ītibhayāpaha rākṣasanāśanadakṣa hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

6. unnatamānasa uccapadaprada ujjvalavigraha deva hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

7. ūrjo nāśitaśātravasañjaya jaladharagarjitakaṇṭha hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

8. ṛṣijanasannuta divyakathāmṛta bhavyaguṇojjvala cittahare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

9. ṝkārapriya ṛkṣagaṇeśvaravanditapādapayoja hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

10. ḷtakasamarcita kāṅkṣitadāyaka kukṣigatākhilalokahare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

11. lṝvalokācārasamīrita rūpavivarjita nitya hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

12. ekamanomuni mānasagocara gokulapālaka veṣahare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

13. airāvatakarasannibhadorbala nirjitadānavasainyahare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

14. oṁkārāmbuja vanakalahaṁsaka kalimalanāśana nāmahare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

15. aunnatyāśraya saṁśritapālaka pākanibarhaṇasahajahare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

16. aṅgadasevita bhaṅgavivarjita saṅgavivarjita sevya hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

17. astagiristhitabhāskaralohitacaraṇasarojataläḍhya hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

18. kamalāvallabha kamalavilocana kamalavibhāharapāda hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

19. kharamukhadānavasainikakhaṇḍana khecarakīrtita kīrtihare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

20. gaṇapatisevita guṇagaṇasāgara varagatinirjita nāgahare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

21. ghaṭikāparvatavāsi nṛkaśari veṣavināśitadoṣahare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

22. ṅaḥ pratyekaṁ na yathā vākye nātha tathā te citte krodhaḥ
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

23. capalābhāsurameghanibhaprabha kamalābhāsuravakṣa hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

24. chalayutadūracalācalalocana gopavadhūhṛdayeśa hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

25. jagatīvallabharūpaparātpara sarvajagajjanapūjya hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

26. jhaṅkāradhvanikārimadhuvṛtamajñulakeśakalāpa hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

27. ñākṣarayutajādhātvarthe pariniṣṭhita naiṣṭhikagamya hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

28. ṭaṅkāradhvanikāridhanurdharaśātaśarāhatadaitya hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

29. ṭhamiti manuṁ vā samiti manuṁ vā japatāṁ siddhida nātha hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

30. ḍamarukareśvarapūjitanirjitarāvaṇadānava rāma hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

31. ḍhakkāvādyapriya bhayavāraṇa vinayavivarjitadūra hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

32. ṇaṭadhātvarthe paṇḍitamaṇḍitasakalāvayavodbhāsi hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

33. tattvamasīti vyāhṛtivācyaprācyadhināyakapūjya hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

34. thūtkārānilaveganabhogatasaptasamudravarāha hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

35. dayitāliṅgitavakṣobhāsura bhūsurapūjitapāda hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

36. dharaṇītanayājīvitanāyaka vālinibarhaṇa rāma hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

37. nārāyaṇa mādhava keśava gopālaka he govinda hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

38. parameśvara varapakṣikuleśvaravāhana mohanarūpa hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

39. phālavilocana paṅkajasambhava kīrtitasadguṇajāla hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

40. balaripupūjita balajitadānava baladevānuja bāla hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

41. bhavabhayanāśana bhaktajanapriya bhūbharanāśanakāri hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

42. māyāmohitasakalajagajjanamāricāsuramathana hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

43. yamunātaṭinīvarataṭaviharaṇa yakṣagaṇeśvaravandya hare.
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

44. rāmarameśvara rāvaṇamardana ratilalanādhava tāta hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

45. lakṣmaṇasevita maṅgalalakṣaṇalakṣita śikṣitaduṣṭa hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

46. vālivināśana vāridhibandhana vanacarasevitapāda hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

47. śaṅkarakīrtita nijanāmāmṛtaśatrunibarhaṇabāṇahare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

48. saḍguṇamaṇḍita saḍdoṣāpaha doṣācarakulakāla hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

49. sadaya sadāśivapūjitapāduka hṛdayavirājita dayita hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

50. hastacatuṣṭayabhāsuranandaka śaṅkhagadārathacaraṇa hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

51. lubulubuniḥsvanamajjitamandaraparvatadhāraṇakūrma hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

52. kṣayitaniśāṭakṣāntiguṇāḍhya kṣetrajñātmaka deva hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

53. gaṇapatipaṇḍitaracitaṁ stotraṁ kṛṣṇasyedaṁ jayatu dharaṇyām
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

54. kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare
kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa janārdana kṛṣṇa hare.

iti kṛṣṇākṣaramālā samāptā

rāmagītā

1. nirguṇa niṣkala nitya nirañjana
nirgatamatsara gamya dayālo
saṁsāre'sminnirgatasāre
pāhi vipāre daśavadanāre.

2. ko'yaṁ putraḥ keyaṁ jāyā
māyā seyaṁ mardaya rāgam
sarvasamatvaṁ sarvahitatvaṁ
satsaṅgitvaṁ dehi vibho me.

3. viśvārambhaṁ viṣṇornāmnām-
astu sahasraṁ sakalastutyam
nāma tu rāme tyamalamidaṁ te
tārakamṛṣayaḥ paribhāṣante.

4. sītākāminniha bhītānāṁ
caraṇaṁ tava yātānām
jananakleśaṁ maraṇakleśaṁ
nāśaya gamanāgamanakleśam.

5. caturāsyastvañcakradharastvaṁ
pramatheśastvaṁ paramātmā tvam
sanakaprabhṛtistutaguṇametad-
vyūhacatuṣkaṁ bahukīrte te.

6. nāsti vapuste nāsti tavākhyā
nāsti ca karma svastida viṣṇo
māyākalpitamidamakhilaṁ te
rūpaṁ karma ca nāma ca vividham.

7. tattvasamūhādupari lasantaṁ
puruṣaṁ sāṅkhyāḥ pravadanti tvām
daśaśatapatre daśamukhaśatro
yogavidastvāmālokante.

8. jaiminimukhyāḥ karmaśrotaṁ
devapate te vaibhavamāhuḥ
vedānte ye niṣṭhitamatayaḥ
te prāhustvāmekamabhedam.

9. tava ca mamāpi ca bhedābhāvaṁ
dūradṛśāṁpara kathayati vāṇi
mama tu tayā'bhūddaśamajñānaṁ
daśavadanāre daśamasyaiva.

iti śrīrāmagītā samāptā

gītamālā

prathamam agnigītam

1. vācamadhitiṣṭhajjyotirapi bhaumam
kiñcidapi daivaṁ geyamavirāmam.

2. sa kratuṣu hotā vipramukhavāsī
atti ca sa havyaṁ veditalabhāsī.

3. pāvaka vasustvaṁ jvālaśatamālī
kaścidasi rudraḥ śāstraśataśālī.

4. pāvaka yadāsye bhāsi manujānām
te tadiha rājyaṁ vibhrati paśūnām.

5. asmi tava dāsye sañcara madāsye
satsadasi mohaṁ yāmi na yatha'ham.

6. nāsti śaraṇaṁ me ko'pyavanipṛṣṭhe
agnimavanārthī devamupatiṣṭhe.

7. asti karamālī ko'pi divi rājā
eṣa nanu kīlī bhāti bhuvi rājā.

8. āhvayati bhānuṁ prātaraśanāya
tvāmanala yajvā sāyamaśanāya.

9. ekamamṛta tvāṁ prātarapi sāyam
śrotumayi vāṇīrāhvayati so'yam.

10. dīptatarakīla tvaṁ bhajasi havyam
netarayi vācāṁ stotramapi bhavyam.

11. asmi na samartho yajñamayi kartum
stotramavalambe śarma tava bhartum.

12. pārthivavibhūtistvaṁ pacanakārī
vaidyutavibhūtirvākpaṭaladhārī.

13. tvaṁ pacanakārī bhāsyudarabhāṇḍe
vākpaṭaladhārī deva kulakuṇḍe.

14. bhāsyudarabhāṇḍe bhāsi kulakuṇḍe
kiṁ ca hṛdi jīvo bhāsyanala piṇḍe.

15. svasya hṛdi rūpaṁ tvāmanala loke
bhāmi vimalo'yaṁ dhāmni gatabhīke.

16. tvāṁ tamahamarthaṁ yaḥ smarati nityam
pāvaka viśokaḥ paśyati sa satyam.

17. yat sphuraṇamantaḥ svasya dhūtapāpam
dhyeyamidamagne deva tava rūpam.

18. deva bhavasi tvaṁ vahniriha loke
sarvada samantādvidyudasi nāke.

19. atra janani te bhūmiratipūtā
dyauranala devī tatra tava mātā.

20. atra vasavaste vāyusakha haste
vācamanubhadrāstatra tava rudrāḥ.

21. atra hṛdi rājan rājasi narāṇām
tatra varadāntaḥ khelasi surāṇām.

22. atra jagadīśa tvaṁ jvalananāmā
tatra maghavā tvaṁ niḥsadṛśadhāmā.

23. dvānalaśakrau pāmarajanānām
sa dvitanurekaḥ paṇḍitajanānām.

24. bhānurapi devo lokasuhṛdeṣaḥ
vyāpaka kṛśāno ko'pi tava veṣaḥ.

25. dehi bhagavanme sampadamudārām
buddhimapi vahne trātaratidhīrām.

26. devi varadāgne tvaṁ bhava mamāstram
bodhaya ca mahyaṁ sarvamapi śāstram.

27. suprabhava dhiyā tvaṁ vyāptamakhilāni
naumi sakalāni kṣemada jayāni.

28. gāṇapatamagneḥ sarvajanahṛdyam
bhātu bhayahāri cchanda idamadyam.

dvitīyaṁ gaṇapatigītam

1. bhadrataramūrtiṁ bhadratamakīrtim
rudratanayaṁ taṁ gāyata mahāntam.

2. jyotiriha sūkṣmajvālamatidīptam
bhāti kulakuṇḍe yogimanujāptam.

3. tannamata vāco daivatamudāram
sańkaṭaśatānāṁ yātumiha pāram.

4. taṁ gaṇapatiṁ yo vismarati loke
santatamabhāgyo majjati sa śoke.

5. dampativihārah śītaśaśikhaṇḍe
nandananivāso dīptakulakuṇḍe.

6. mitra kuru bhaktiṁ viśvayuvarāje
dehi hṛdamuṣmai yoginutibhāje.

7. atra saśarīre mūlaśikhirūpī
yogavimukho nā vindati na pāpī.

8. dhyāyati sadāntaryo'grabhujametam
taṁ bhajati devī siddhiratipūtam.

9. tasya varabhāsā sandravati śīrṣam
yasya paritaptaṁ vindati saharsam.

10. yogavida āhuḥ śīrṣarasadhārām
siddhiśatahetuṁ tāmamṛtasārām.

11. pīṭhamadhirūḍhaṁ mūlasarasījam
sarvabhuvanānāṁ naumi yuvarājam.

12. kācana ruciste bhargasuta pūtā
mańgalasuṣumnāmārgacaramātā.

13. bhāgyamakhilānāṁ deva tava haste
bhūrimahimānaṁ varṇayatu kaste.

14. hastivadano nā sa tvamadhidaivam
sankaṭahārāryaiḥ sangaditamevam.

15. tvatpadasaroje yasya hṛdi bhaktiḥ
kā'pi śivasūno tadvacasi śaktiḥ.

16. tvaṁ khalu maghono dhūtasujanārtiḥ
atra bhuvi kācitkāryakaramūrtiḥ.

17. tvāṁ bhajati gāḍhaprītiratiśastā
siddhiriti lakṣmīstāmarasahastā.

18. saśriyamudārāṁ śrīhṛdayahārī
saṁvitaratānme sarvabaladhārī.

19. śītanagajāyāḥ sūnuratihṛdyām
bhūrikaruṇo me pūrayatu vidyām.

20. vāraṇamukho me vārayatu kaṣṭam
sarvamapi deyāccharvasuta iṣṭam.

21. māṁ caraṇabhājaṁ pāpaharanāmā
pālayatu śambhoḥ sūnuratidhāmā.

22. nirjitajarādhiṁ nirdalitarogam
dantivadano me vardhayatu yogam.

23. sukṣamatamaṁ me kaṣṭahimabhāno
prāṇabalamagryaṁ dehi harasūno.

24. vāci mama divyāṁ dhehi nijadhāṭim
siddhimajitāsyai dehi varaceṭīm.

25. hastimukha yāce gāḍharasabhaktyā
āviśa vibho māṁ divyanijaśaktyā.

26. dehi nijatejaḥ kiṅkarajanāya
īśvara gaṇānāṁ bhāratahitāya.

27. sarvada jano'yam vāñchati na muktim
deśakuśalāya prāthayati śaktim.

28. gāṇapatametadgītamatiśuddham
bhātu bhayahāri cchandasi nibaddham.

tṛtīyam indragītam

1. dhartā sukṛtānāṁ hartā duritānām
bhartā nabhaso me kartāstu śubhānām.

2. khyātā'mitavīryo dhūtākhilvairī
netā vibudhānāṁ trātā bhavatānme.

3. vikramya vibunvanvakrāmtsamareṣu
cakrāyudhamitraḥ śakraḥ śaraṇaṁ naḥ.

4. śakraḥ śubhavittāṁ lakṣmīmaniyattām
ānanditacittāṁ mahyaṁ bhuvi dhattām.

5. nākaṁ tvamarakṣaḥ pākaṁ yudhi jitvā
vṛtraṁ ca vidhūyāmitraṁ pavipāṇe.

6. etāni vikurvan bhūtāni sa pākaḥ
śubhre viphalo'bhūdabhre tava jiṣṇo.

7. pākaḥ prabhureva prāṇāṁśca vikartum
yadyambaranātha tvaṁ na pratikartum.

8. na tvaṁ yadi roddhā vṛtraḥ paribhūya
prajñāmayi viśvaṁ dadyāttimirāya.

9. prajñāmuṣasaṁ tāṁ jñaṁ cājitasūryam
yadrakṣasi vṛtrāttatte surakāryam.

10. sammohanaśaktirvṛtrasya tu nidrā
sambohdanaśaktirvidyuttava bhadrā.

11. nādāntavibhāsyaṁ vedāntarahasyam
modāntarayodhaṁ bhedāntakamīḍe.

12. khe vāyumanantaṁ rudraṁ ninadantam
bhāntaṁ maghavantaṁ vande bhagavantam.

13. tāraṁ madanāriṁ prāṇaṁ pavamānam
devaṁ maghavānaṁ dhyāyāmyatimānam.

14. vīrye sakalaṁ tvaddeveśvara nūnam
devāsuramartyairyuktaṁ jagadūnam.

15. nirjitya samastān bhāvānapi jiṣṇo
samrāḍ bhuvanānāmāsīḥ prabhaviṣṇo.

16. nābhetsya imaṁ ced vṛtraṁ divi vīram
nāmokṣyadaghāre megho bhuvi nīram.

17. gopāyasi viśvam śaśvadbahurītīḥ
svarnātha vidhunvan vṛtrasya vibhūtīḥ.

18. catvāri vapūṁṣi prāhurmunayaste
yeṣāṁ jagadetaddevādhipa haste.

19. rūpāṇi vibho te bhūyāṁsi tatāni
diṅmātratayādyaiścatvāryuditāni.

20. sarvasya ca kartā sarvasya ca dhartā
prāṇaḥ puruhūtaḥ ko nāma sa gītaḥ.

21. sūtraṁ vidureke suślokamanantam
kecidvidhimāhuḥ kaṁ taṁ bhagavantam.

22. viśvasya nidānaṁ viśvātigamānam
etaṁ viduranye vāyuṁ pavamānam.

23. sarvasya ca netrī sarvairapi mānyā
gīrvāṇapate te kālastanuranyā.

24. rudraṁ vidureke netarbahulīlam
prāhuryamamanye kāyam tava kālam.

25. kālo'yamanādiḥ sūryādapi pūrvaḥ
bhākto janivādastasyājara sarvaḥ.

26. sadvyāpakaśaktiṁ prāṇaṁ kathayanti
vyaktetaraśabdaṁ kālaṁ gaṇayanti.

27. vyaktetaraśabdānnaiva praṇavo'nyaḥ
tasyendra tavāṅke viśrāmyati dhanyaḥ.

28. sacchaktirabhāṇi prāṇaḥ paramasya
cicchaktiragādi prājñaiḥ praṇavo'sya.

29. sarvatra visāri jyotistaṭidākhyam
devendra śarīraṁ gītaṁ tava mukhyam.

30. prāṇaṁ praṇavaṁ ca jyotiśca visāri
devaṁ nayadekaṁ vande bhavadhāri.

31. ekaḥ sa tisṝṇāmasthūlatanūnām
rājatyabhimānī rājā bhuvanānām.

32. dṛśyasya parastādbrahmāguṇamasti
indrābhidhayā tat dṛśya'tra cakāsti.

33. bandhurbhuvanānāṁ sūryastatakīrtiḥ
rājannamarāṇāṁ turyā tava mūrtiḥ.

34. deva pratibimbībhūya pratisūryam
viśvasya mahendra tvaṁ paśyasi kāryam.

35. no kevalamarke piṇḍeṣu ca tātaḥ
antaḥ pratibimbībhūtaḥ puruhūtah.

36. piṇḍe pratibimbībhūtaṁ puruhūtam
vaiśvānaramāhurlokatrayatātam.

37. nānyāni kila tvadrūpāṇyakhilāni
māyin vibhavaṁ te kiṁ vā kathayāmi.

38. pāhi tridaśānāmīśāna kṛśānnaḥ
bhūyāttava deva stotā bahulānnaḥ.

39. sarvaṁ bhavatā'haṁ pakṣeṇa jayāni
īśo bhuvi loke nākeśa bhavāni.

40. āviśya vibho māṁ kartuṁ bhuvi kāryam
sampreṣaya kiñciddivyaṁ tava vīryam.

41. dhātā bhuvanānāṁ netā tridaśānām
āviśya vibhurmāmābhātu sukarmā.

42. indraṁ prabhajantāmetāstanumadhyāḥ
nāthaṁ guṇavatyo yadvattanumadhyāḥ.

caturthaṁ vāyugītam

1. diṣṭātpatito'haṁ mande naravṛnde
trāṇāya samīraṁ taṁ samprati vande.

2. tārāsumacitraṁ khelatkhagajālam
udyānamidaṁ te khaṁ vāta viśālam.

3. devo'si balasya prāṇo'syakhilasya
brūyādatimānaṁ kaste mahimānam.

4. bhaktyā tava puṇyaṁ tulyaṁ kva nu gaṇyam
tadvakti caritraṁ raikvasya pavitram.

5. meyaḥ sa ca nākaḥ svalpo naralokaḥ
nityānila śubhraṁ niḥsīma tavābhram.

6. ghuṣyannasi rudro dīpyannasi śakraḥ
prāṇannasi vātastredhāsi nuto'taḥ.

7. sarvāśca diśaste vyomeśvara haste
bhāktā punareṣā koṇediti bhāṣā.

8. nityādhvaga kartuṁ śrānte parihāram
vāsiṣṭhavaco'mbho hṛdyaṁ piba dhīram.

9. annāni kṛśānau juhvatvadaridrāḥ
vāyo juhumo'mī vācastvayi bhadrāḥ.

10. yadyapyayi divyo guptastava veṣaḥ
vyomeśa tathā'pi vyaktastava ghoṣaḥ.

11. ākāśagṛhāṇāmātmāsi surāṇām
vīryadraviṇānāṁ kośo'si narāṇām.

12. tvāmāha sa raikvaḥ saṁvargamanantam
svasmiṁtsudṛḍhānāṁ duḥkhāni harantam.

13. mūlaṁ tapasāṁ tvaṁ devāsi ṛṣīṇām
loke sakalānāṁ hetuśca kṛṣīṇām.

14. dānārthamasūnāṁ prāptakṣiriraṅgāḥ
ete tava vātāḥ kheśāna taraṅgāḥ.

15. ātmā marutāṁ tvaṁ kairapyasi gītaḥ
kairapyadhirājaḥ kairapyayi tātaḥ.

16. ātmā marutāṁ tvaṁ gītaḥ pṛṣadaśvaḥ
rājā puruhūtastāto nigamāśvaḥ.

17. vātastava vīcirvidyuttava kāyam
tārastava śabdo devādhipa so'yam.

18. vedādimanādiṁ tāraṁ praṇavākhyam
dhyāyanti vido ye taiḥ syāttava sakhyam.

19. vāto'syadhibhūtaṁ śakro'syadhidaivam
rudro'syadhipiṇḍaṁ pakṣāntaramevam.

20. gītāḥ kavirājā sarvastava bhāje
etāstanumadhyāstātāya kharāje.

pañcamaṁ sūryagītam

1. bhuvanatrayapatimūrdhajamadhye
dīpyanmaṇirayamahimamayūkhaḥ
bhuvanatrayato'pyadhiko mūlye
bhavatāṁ sampadamatulāṁ bhaṇatu.

2. etanmaṇḍalamatuhinabhānor-
bhāsāṁ sthānaṁ nigamanidhānam
viprairvandyaṁ kāle kāle
viśvaprāṇāyatanaṁ jayati.

3. śambhoḥ keśe vapuṣā kena
śrotre māturvapuṣā kena
rājasi nalinīpriya dampatyor-
bhūṣaṇamasi vā paryāyeṇa.

4. kaścana dakṣiṇanayanaṁ bhartur-
mūrtiṁ kāmapi bhaṇati vidanyaḥ
aparo bhavanaṁ bhuvanaṁ tvitaraḥ
prāṇaṁ daśaśatakiraṇa parastvām.

5. prāṇiti bhavatā paśyati bhavatā
khādati pāti ca bhuvanaṁ bhavatā
bhāti ca bhavatā bhāskara bhavato
māhābhāgyaṁ na bhaṇiti mārge.

6. hṛdayaṁ yadvajjīvānāṁ no
maṇḍalametannāthasyaivam
tasmādetatparidṛṣṭāntair-
hṛdayasamaṣṭiḥ kathitā śiṣṭaiḥ.

7. maṇḍalamadhye yattajjyotir-
hṛdayasyāntaryattajjyotiḥ
bhavati tadasminnakṣiṇi gamyaṁ
ramyaṁ pūrṇaṁ mama khalu kāmyam.

8. kṣetre kṣetre bahuśo'nviṣṭaṁ
locanamaṇḍalamadhye dṛṣṭam
kaṣṭaṁ galitaṁ phalitaṁ ceṣṭaṁ
punarasmākaṁ kiṁ pariśiṣṭam.

9. sākṣiṇamakṣiṇi niścaladṛṣṭyā
nirmalanabhasi sthitayā dvārā
lakṣyaṁ rātrāvapi dinanāthaṁ
paśyata naśyaṁ muñcata nikhilam.

10. narakāmānamayamiha rājā
jāgartyakṣiṇi sāyaṁ pātā
surakāmānāmīśāno'sau
sūrye bhāti prātaḥ pātā.

11. jñānākāraṁ tejaḥ paśyat-
pratibimbaṁ vā puṁso haimam
dhīro dhyāyannayanasthāne
pāśairmuktaḥ kṛtakṛtyaḥ syāt.

12. niḥśeṣābhiḥ sahitaṁ śrībhir-
nirhatapāpe daharasaroje

kṛtinaḥ kiraṇairaṅguṣṭhābhaṁ
taṁ lokeranpuruṣamaṇiṣṭham.

13. paramavidustvāṁ pāvakamavanau
divi ravimambarabhuvane śakram
ātmānaṁ vā jyotirvaikaṁ
jagatāṁ bhedāt kavayastredhā.

14. vaibhavaśālī dīdhitimālī
praśamitapāpastribhuvanadīpaḥ
divi bhāti raviryatracarataś-
carataśceśitṛparamaṁ jyotiḥ.

15. jayati vivasvān daśaśatadhāmā
jayati ca tasmin paramaṁ dhāma
pādākulakairnutiradasīyā
gaṇapatimuninā racitā jayati.

ṣaṣṭhaṁ daśāvatāragītam

1. vedacoramāśaraṁ vimathya somakaṁ purā
yaḥ smṛtiṁ dhruvāṁ punaḥ sutāya bhāsvato dadau
sindhuvāri bandhurāsa naudharastapasvināṁ
yaśca taṁ sakhe bhajasva jhāṣaveṣamacyutam.

2. mandārādridhāriṇe mahendrakāryakāriṇe
maunicittacāriṇe mahograpāpahāriṇe
añjaliṁ kuruṣva bhorharillatāntamañjula-
svacchakīrtaye vilāsakacchapāya viṣṇave.

3. kāñcanākṣamuṣṇaraśmijālayā dṛśaikayā
cyāvayantamojasaḥ pradīptaghoratārayā

sāntvayantamanyayā dayārdrayā vasundharāṁ
śītalatviṣā hariṁ kiricchalaṁ smarāntare.

4. prāṇamujjahāra daityavakṣaso vidaritā
dyonakhairakharvaśaktipauruṣojvalan ruṣā
āsurātkulācchriyaṁ suparvacetaso bhiyaṁ
nārasiṁhamūrtirārtimacyutaḥ sa hantu te.

5. trīṇi yaḥ padānyajaḥ samantato vicakrame
nāṅgulaṁ yathātyaricyatātra divyamutra vā
nākacāriṇo'dhikartumāśu hartumāsurīṁ
sampadaṁ ca taṁ paraṁ pumāṁsamāśrayasva re.

6. yo'rjunaṁ bhujābalena nirjigāya durjayaṁ
cetasā vaśaṁvadena paryabhūdananyajam
lobhamāsamudrabhūmidānakarmaṇājayad-
raiṇukeyabhūmikaḥ sa te syatādbhiyaṁ hariḥ.

7. vākyakṛtsutaḥ pituḥ prabhuśca rakṣitā viśām-
agrajo'tivatsalo niyāmako'nujanmanām
śrīkaraḥ satāṁ sakhā dviṣāṁ ca bhīkaro ripuḥ
sītayā kalatravānnaro harirdhinotu vaḥ.

8. bhūmibhāravāraṇāya yo yaduṣvabhūdvibhur-
vismayaṁ śiśośca yasya ceṣṭitāni tenire
śarma vaḥ sa pūruṣo rathāṅgamāyudhaṁ dadhat
karmayogadeśikaḥ karotu pārthasārathiḥ.

9. bhāratam na kevalaṁ catuḥsamudramudritaṁ
bhūmikhaṇḍameva yo vyabhūṣayannijairguṇaiḥ
tasya pūruṣottamasya buddhanāmadhāriṇaḥ
pāvanī kathā mude vidāṁ nadīva nābhasī.

10. gāyata stutādriyadhvamāśrayadhvamuttamaṁ
pūruṣaṁ purāṇamarkamaṇḍalāntarālayam
kalkabhāravāraṇāya kalkibhūmikādharo
yo'yamasya bhūtalasya rakṣaṇāya ceṣṭate.

saptamam ambikāgītam

1. sevakapātakaśamanaṁ daivaṁ
mānasavāñchitaphaladaṁ daivam
sajjanarakṣaṇacaturaṁ daivaṁ
durjanamardanaparuṣaṁ daivam.

2. bhāskarabimbe dīptaṁ daivaṁ
locanamadhye suptaṁ daivam
sitakaramaṇḍalaguptaṁ daivaṁ
triguṇitabhuvanavyāptaṁ daivam.

3. bahuśataceṭīsahitaṁ daivaṁ
reṇusamaṣṭyā vihitaṁ daivam
ambarasaudhe nihitaṁ daivaṁ
bhairavavadanā'bhihitaṁ daivam.

4. asurucipadyābhūtam daivaṁ
vasurudrārkairgītaṁ daivam
kṣitijalaśuciṣuprotaṁ daivaṁ
sītamatibhiḥ samadhītaṁ daivam.

5. mṛduhṛdayānāṁ saumyaṁ daivaṁ
priyarūpāṇāṁ ramyaṁ daivam
tattvajñānāṁ viśvaṁ daivaṁ
guṇavirucīnāṁ śūnyaṁ daivam.

6. cālakamavaneḥ śaktyāḥ daivaṁ
śampādvārā dṛśyaṁ daivam
dogdhrīmanuvaravācyaṁ daivaṁ
vidadhadvinatamaśocyaṁ daivam.

7. śaile śaile viharaddaivaṁ
vipine vipine vicaraddaivam
grāme grāme khyātaṁ daivaṁ
nagare nagare prathitaṁ daivam.

8. parito vyomni nirākṛti daivaṁ
svarge paulomyākṛti daivam
himavati gaurīrūpaṁ daivaṁ
tanuṣu prāṇākāraṁ daivam.

9. ardhaṁ suragiridhanuṣo daivaṁ
bhuvanatritaye pūrṇaṁ daivam
hṛdi bhūtānāṁ kiñciddaivaṁ
tṛṇavanmanasi pracuraṁ daivam.

10. lajjābhāvo lalitaṁ daivaṁ
rasanābhāvo bhīmaṁ daivam
dṛṣṭau dṛṣṭau sūkṣmaṁ daivaṁ
viṣaye viṣaye sthūlaṁ daivam.

11. stotre stotre madhuraṁ daivaṁ
dhyāne dhyāne madakṛddaivam
namane namane varadaṁ daivaṁ
carite carite pūtaṁ daivam.

12. ākāśāmalagātraṁ daivaṁ
tārāraviśaśinetraṁ daivam

vyāpakapavanaśvasitaṁ daivaṁ
pārāvārasvedaṁ daivam.

13. līlānārīveṣaṁ daivaṁ
divyahiraṇmayabhūṣaṁ daivam
keṣāñcitkṛtapoṣaṁ daivaṁ
keṣāñcitkṛtaśoṣaṁ daivam.

14. poṣavidhāne śītaṁ daivaṁ
śoṣavidhāne tapanaṁ daivam
sargavidhāne vikasaddaivaṁ
pralayavidhāne mīladdaivam.

15. somaṁ pītvā puṣṭaṁ daivaṁ
dviṣato hatvā hṛṣṭaṁ daivam
bhuvanapralaye śiṣṭaṁ daivam
sarvapadārthotkṛṣṭaṁ daivam.

16. kaulācāriṣu mādyaddaivaṁ
samayācāriṣu śāntaṁ daivam
yogācāriṣu pīnaṁ daivaṁ
jñānācāriṣu līnaṁ daivam.

17. kāmavirodhi kalatraṁ daivaṁ
gaṇapaṣaḍānanaputraṁ daivam
pāpavidāri pavitraṁ daivaṁ
jayati munistutipātraṁ daivam.

aṣṭamaṁ reṇukāgītam

1. suraśiraścaraccaraṇareṇukā
jagadidhīśvarī jayati reṇukā.

2. devatāśirodeśalālitam
reṇukāpadaṁ diśatu me mudam.

3. kuṇḍalīpurīmaṇḍanaṁ mahaḥ
kimapi bhāsatāṁ mama sadā hṛdi.

4. mastakaitavaṁ vastu śāśvatam
asti me sadā śastadaṁ hṛdi.

5. ādināri te pādapaṅkajam
sphuratu me manaḥ sarasi sarvadā.

6. kevalaṁ padoḥ sevako'smi te
vedmi netaradvedasannute.

7. hṛdaya te'ṇunaḥ samucito'ṇunā
paricayo'mbikāpādareṇunā.

8. pāhi muñca vā pādapaṅkajam
tridaśasannute na tyajāmi te.

9. caraṇamamba te yo niṣevate
punarayaṁ kucau dhayati kiṁ kṛtī.

10. aharaho'mba te rahasi cintayā
dhanyatāṁ gato nānyadarthaye.

11. smarajito yathā śirasi jāhnavī
janani reṇuke manasi te kṛpā.

12. amba pāhi māṁ dambhatāpasi
pādakañjayorādikiṅkaram.

13. putramātmanaḥ puṇyakīrtane
bahukṛpe kuto māmupekṣase.

14. amba saṁstute jambhavairiṇā
pāhi māmimaṁ magnamāpadi.

15. tattvavādinaḥ sattvaśālini
tvāmaje viduḥ satsvarūpiṇīm.

16. tvāṁ pracakṣate sadayavīkṣite
vedavedino modarūpiṇīm.

17. saṁvidaṁ vidustvāmidaṁ prasu
paramayoginaḥ paramadevate.

18. janani kuṇḍalīpuranivāsini
paraśurāmavat paśya māmimam.

19. tanayarodanaṁ śravaṇaśālini
śṛṇu surārcite yadi dayā hṛdi.

20. yācakaḥ suto bhajanamīpsitam
tadapi durlabhaṁ kimidamambike.

21. māstu vetanaṁ chinnamastake
bhajanameva te yācyate mayā.

22. taralatārayā jalajadīrghayā
sānukampayā śītapātayā.

23. kevalaṁ dṛṣā paśya reṇuke
tena me śubhaṁ na ca tavāśubham.

24. kiṅkarībhavatsuravilāsinī
jayati kuṇḍalīnagaravāsinī.

25. madhuramamba te caraṇapaṅkajam
tatra yadrataistyajya te'khilam.

26. caraṇamamba te caratu me hṛdi
iyamanāmaye prārthanā mama.

27. bhujagakaṅkaṇaprabhṛtisaṁstute
bhujabhuvāmarerjanani pāhi mām.

28. kuṇḍalīpurīmaṇḍanāyitā
gaṇapatistutā jayati reṇukā.

navamaṁ gurugītam

1. avyaktādyata etadvyaktaṁ jātamaśeṣam
yaddhatte tadajasraṁ yatrānte layameti.

2. ādhāre khalu yasmin golānāṁ saha lakṣyaiḥ
brahmāṇḍaṁ pratitiṣṭhatyetannistulasattve.

3. sūryādigrahabhāsāṁ yanmūlaṁ ghanatejaḥ
yadbrahmādisurāṇāṁ śaktyai śaktirutāho.

4. jñātvā tattvamasaṅgā bhāsā yasya ramante
yajjālene samaste dvaitekṣālpamatīnām.

5. yaddhyānena bhavanti svātmānandanimagnāḥ
yanniṣṭhā khalu muktiryacchando'pi tadarthaḥ.

6. tadbrahma praṇavākhyaṁ citte dhyānakṛte me
aśrāntaṁ ramaṇākhyaṁ vibhradbhātu madiṣṭam.

7. ādhāre dhṛtamūlaṁ hārdābje kṛtavāsam
śīrṣābjāya vahadyatpaścādindriyaśaktyai.

8. dṛṣṭyāṁ tatra parācyāṁ yaddehabhramakāri
āvṛttaṁ tu punaryatstvātmaikyānubhavāya.

9. paśyadvā viṣayaughaṁ viśrāntaṁ yadutāho
muktyai saṁsthitamantarvṛttyaikyānubhavena.

10. ātmajyotiridaṁ me vibhrāṇaṁ ramaṇākhyam
aśrāntaṁ sphuratāttacchuddhaṁ hārdasaroje.

11. yaddīpādramaṇākhyādvyāptaṁ gāṇapatiṣu
vāṇībhittiṣu dhatte gītācitravilāsam.

12. yaddhanti cchavijālairajñānāṁ timirāṇi
tattattvaṁ sphuratādvastārādhyānasamadhau.

13. yātayātavihārairādhāreṣu ca śīrṣe
sañcāraṁ vidadhānaṁ kiñcāśeṣavisāri.

14. ālambena vihīnaṁ vyomābhaṁ paripūrṇam
niḥśabdaṁ gururūpaṁ tadbrahma sphuratānme.

15. jñānaṁ bhāti parokṣaṁ yattattvaśravaṇena
yatsāṅgatyaviśeṣo hetuḥ syādaprokṣe.

16. yaccintā sthiramuktyai brahmaitadramaṇākhyam
māmāvṛtya samantādānande nidadhātu.

17. tārānandaniyuktaḥ prītyā tasya matena
ādhāddīptagabhīraṁ vāsiṣṭho gurugītam.

daśamaṁ yogasāragītam

1. niśitayā dhiyā hṛdi nibhālanam
bhuvanabhūpaterbhavanaśodhanam.

2. daharamajjanaṁ vidadhataṁ janam
bahulasammadaṁ nayati dhīḥ padam.

3. ahamiti smṛtervraja janisthalam
bhavakathānakaṁ galati te'khilam.

4. nijavilokitaṁ yadi nibhālyate
viṣayasaṅgitā kva nu vibhāvyate.

5. nayanadṛśyayorgaganamantaram
samavalokayan bhaja vibhuṁ param.

6. viṣayavarjanādviṣayiṇi sthire
sakalasiddhayo yatadhiyaḥ kare.

7. rasananīrage manasi santatam
karagataṁ sukhaṁ bhavati niścitam.

8. gamaya mastakāt kulagṛhānalam
avataranniva smṛtimidaṁ tvalam.

9. smaraṇasarpiṣā kulagṛhe śikhī
jvalati yasya sa kṣititale makhī.

10. yadi śaśī dravetkulaśikhitviṣā
amṛtataḥ śamaṁ vrajati nastṛṣā.

11. calatamaṁ manaḥ praśamameti naḥ
smaraṇayuktayā śvasitayātrayā.

12. nijacitismṛtiryadi na vicyutā
bhavati yogitā sulabhasādhitā.

13. daśaśatacchadasthitamanāḥ sadā
anubhavenmahomahadado mudā.

14. bhavati niṣṭhito yadi catuṣpathe
mahasi līyate dhṛtajagatkathe.

15. ayi vicintaya svavapuruttaram
vaśamitaṁ bhavettava mahattaram.

16. paramaśaktaye svavapurarpyatām
ayi kimadbhutaṁ bhavati dṛśyatām.

17. karaṇaśaktivitkṛtiṣu rājate
gamanaśaktividgatiṣu śobhate.

18. śravaṇaśaktivicchrutiṣu na skhalet
mananaśaktivinmatiṣu no patet.

19. atulasiddhidaniha pṛthagvidhān
munivaro'bhyadhāditi tapaḥ pathān.

20. bahulayogivāṅmathanato'mṛtam
anubhavakṣatam tadidamāhṛtam

gītamālā samaptā

śivagītam

1. uddīpyat kiraṇaṁ citraṁ śrīśaraṇam
kāmāreścaraṇaṁ bhūyānnaḥ śaraṇam.

2. satyaḥ ko'pi śivo nityaḥ pālayitā
madhye yo jagatāṁ sa dhyeyaṁ satatam.

3. nāstyetasya vapurvastye kvāpi na saḥ
matyā'bhāṇi budhaiḥ satyādhārapadam.

4. uktaṁ sūkṣmatamaṁ dvedhaikaṁ paramam
rūpaṁ rūpatayā kiṁ ca sthānatayā.

5. so'ṇuḥ syādaṇuto dhātaiṣāṁ jagatām
tacchaktirmahato vijñeyā mahatī.

6. gatvā tiṣṭhati nā yatsvaṁ hārdapadam
agrāhyasya vibhostasya dhyānamidam.

7. ātmānaṁ jagatāṁ rājānaṁ pitaram
ācāryaṁ ca muhuḥ saṅgāyāmi haram.

8. dīpyantaṁ divi taṁ loke sarvabhujam
bhūteśaṁ praṇuto māyākāntamajam.

9. dṛśye viśvatanuṁ pāre nirvapuṣam
gāyāmaḥ paramaṁ bhaktajñānapuṣam.

10. aṣṭau te tanavaḥ trātarviśvamidam
vaktyetadbhavate māhātmyaṁ viśadam.

11. sarveṣāṁ jagatāṁ mātā devanutā
īśāna triguṇā māyā te dayitā.

12. śaktyāsau bhuvanaṁ sṛṣṭvā pātumidam
haimaṁ divyavapurjagrāhābhayadam.

13. sūkṣmaṁ syādaguṇaṁ haimaṁ syātsaguṇam
devasyādivibhorevaṁ dve vapuṣī.

14. bhāṣāmātravapuḥ pūrvaṁ syādavapuḥ
anyadbuddhimatāṁ dhyānagrāhyavapuḥ.

15. bibhradbhāti jagatsāmrājyaṁ gagane
haimo'sau puruṣaḥ siddhānāṁ bhuvane.

16. indro vedavidāṁ bhāṣāyāṁ saparaḥ
nāthastantravidāṁ vyāhāreṣu haraḥ.

17. pratyuṣṇāṁśutayā tanvā bimbitayā
pratyaṇḍaṁ prabhutāṁ dhatte so'dbhutayā.

18. abhre rājati yo bibhrāṇo bhuvanam
śubhrāge ca vibhuḥ samrājiṣṇuyaśāḥ.

19. gauro'yaṁ gagane śuklaḥ śubhranage
ekeyaṁ tu bhidā māyārūpakṛtā.

20. rudraḥ śuklagirāvagnirvā sa pumān
īśo vyomni lasannindro vā sumahān.

21. haimaṁ bhūtapate śuklaṁ vā śiva te
rūpaṁ yaḥ smarati prājño'yaṁ jayati.

22. abhre ye marutaḥ śubhre bhūbhṛti te
kleśānāṁ damanā īśāna pramathāḥ.

23. dāso'haṁ marutaḥ pātāro jagataḥ
bhūtā vā bhavatāṁ stotā pāpahṛtām.

24. pāyānmāmabhitastiṣṭhantaṁ tapasi
bibhrāṇaḥ sa śivaḥ kāruṇyaṁ manasi.

25. gātāraṁ gaṇapaṁ gāyatrairmukulaiḥ
īśo yo jayatātsarvaiścāpi balaiḥ.

iti śrībhagavanmaharṣiramaṇāntevāsino vāsiṣṭhasya
narasiṁhasūnorgaṇapateḥ kṛtiḥ śivagītaṁ samāptam

ramaṇagītam

1. ramaṇamunivimalataracaraṇe bhaja manuja
namadakhilanaranikaraśaraṇe sumaviśikha-
samaraparahṛdayamadaharaṇe yadi kutukamadhunā te.
ramaṇamuni

2. aniśamapi vinamadalivalite bhaja manuja
nanu manasi navajalaja lalite vividhakavi-
janavacanajaṭilarucikalite giriśikharamaṇibhūte.
ramaṇamuni

3. niratiśayanikhilasukhanilaye vinatajana-
bharaṇadhṛtakanakamayalaye bhavajaladhi
taraṇavidhitaralahṛdi valaye bahumahimasamupete
ramaṇamuni

4. jananamṛtirahitajanavinute kalikaluṣa-
janakamapi hṛdayamiha manute paramasukha-
paravaśitapadanihitavinate mama vijitajalajāte.
ramaṇamuni

samāptaṁ ramaṇagītam



Kavyakantha Ganapati Muni



Ganapati Muni: A Pencil Sketch
by Madam Jane Adames

|| वासिष्ठकाव्यकण्ठगणपतिमुनेः ग्रन्थमाला ||

Vāsiṣṭhakāvyakaṇṭhagaṇapatimuneḥ Granthamālā

Collected Works of Vasishtha Kavyakantha Ganapati Muni

Contents of all Volumes

VOLUME 1

VOLUME 2

2. स्तोत्रग्रन्थमाला *stotragranthamālā* **The Book of Adoration (Part Two)**

2.1.	देवीस्तोत्रमञ्जरी *devīstotramañjarī*	Verses in praise of Goddess Uma (118 verses)
2.2.	श्रीत्रिपुरसुन्दरीगीतम् *śrītripurasunda-rīgītam*	Singing praise of Goddess Tripurasundari (18 verses)
2.3.	अमृताम्बापञ्चरत्नम् *amṛtāmbā-pañcaratnam*	Verses in praise of Amritamba – the consort of Narasimha (5 verses)
2.4.	सौन्दर्याम्बानिर्वाण-षट्कम् *soundaryāmbā-nirvāṇaṣaṭkam*	Verses on the liberation of Saunda-ryamba – the mother of Sri Ramana Maharshi (6 verses)
2.5.	रेणुकाषट्कम् *reṇukāṣaṭkam*	Verses on Renuka – the mother of Parasurama (6 verses)
2.6.	रेणुकासप्तकम् *reṇukāsaptakam*	Verses in praise of Goddess Renuka (7 verses)
2.7.	इन्द्राणीसप्तशती *indrāṇīsaptaśatī*	Verses in praise of Goddess Indrani – the consort of the Vedic godhead Indra (700 verses)

2.8.	प्रचण्डचण्डीत्रिशती *pracaṇḍacaṇḍī-triśatī*	Verses in praise of Chinnamasta – one of the ten cosmic powers of the Divine Mother (300 verses)
2.9.	मङ्गलगौरीस्तोत्रम् *maṅgalagaurī-stotram*	Benedictory verses in praise of Goddess Gauri (8 verses)

VOLUME 3

3. स्तोत्रग्रन्थमाला *stotragranthamālā* **The Book of Adoration (Part Three)**

3.1.	श्रीरमणचत्वारिंशत् *śrīramaṇa-catvāriṁśat*	Verses in praise of Sri Ramana Maharshi (40 verses)
3.2.	शिवशतकम् *śivaśatakam*	Verses in praise of Shiva (100 verses)
3.3.	शिवस्तवराजः *śivastavarājaḥ*	Verses in praise of Shiva (72 verses)
3.4.	शिवसप्ततिनामस्तोत्रम् *śivasaptati-nāmastotram*	Seventy names of Shiva as mentioned in the Veda (8 verses)
3.5.	इन्द्रसहस्रनामस्तोत्रम् *indrasahasra-nāmastotram*	Verses having one thousand names of Indra as mentioned in the Rigveda (115 verses)

3.6.	इन्द्रसहस्रे प्रथमं शतकम् *indrasahasre pathamaṁ śatakam*	Verses in praise of Indra (100 verses)
3.7.	इन्द्रसहस्रे कटाक्षस्तबकः *indrasahasre kaṭākṣastabakaḥ*	Verses extolling the graceful look of Indra (24 verses)
3.8.	इन्द्रविंशतिः *indraviṁśatiḥ*	Verses in praise of Indra (20 verses)
3.9.	इन्द्रसप्तकम् *indrasaptakam*	Verses in praise of Indra (7 verses)
3.10.	श्रीपवनाष्टकम् *śrīpavanāṣṭakam*	Verses in praise of Vayu (8 verses)
3.11.	श्रीनृसिंहपञ्चरत्नम् *śrīnṛsiṁha pañcaratnam*	Verses in praise of Sri Narasimha (5 verses)
3.12.	श्रीयोगाञ्जनेयपञ्चरत्नम् *śrīyogāñjaneya-pañcaratnam*	Verses in praise of Sri Yoganjaneya (5 verses)
3.13.	श्रीतारकरामनामस्तुतिः *śrītārakarāma-nāmastutiḥ*	Verses singing the name of Sri Rama (16 verses)
3.14.	श्रीकृष्णाक्षरमालिका *śrīkṛṣṇākṣara-mālikā*	Verses on Sri Krishna in Sanskrit alphabetical order (50 verses)

3.15.	रामगीता *rāmagītā*	Verses on Sri Rama (9 verses)
3.16.	गीतमाला *gītamālā*	Garland of ten songs praising different Vedic and other godheads (225 verses)
3.17.	शिवगीतम् *śivagītam*	Verses praising Lord Shiva (25 verses)
3.18.	रमणगीतम् *ramaṇagītam*	Verses praising Sri Ramana Maharshi (4 verses)

VOLUME 4

4. तत्त्वग्रन्थमाला *tattvagranthamālā*
The Book onPrinciples of Existence

4.1.	सदाचारबोधिनी *sadācārabodhinī*	Code of conduct for human beings (81 verses)
4.2.	तत्त्वघण्टाशतकम् *tattvaghaṇṭā-śatakam*	Verses on the principles of existence composed extem-pore in one hour as a part of an ashtavadhanam (100 verses)
4.3.	*तन्त्रहृदयम् *tantrahṛdayam*	A Tantra treatise on worship-ping different aspects of the Divine Mother (192 verses)

4.4.	अक्षरावलिः *akṣarāvaliḥ*	Verses describing Sanskrit syllables (alphabet) and their corresponding deities (21 verses)
4.5.	श्रीरमणगीता *śrīramaṇagītā*	Teachings of Sri Ramana Maharshi (303 verses)
4.6.	सद्दर्शनम् *saddarśanam*	Sanskrit rendering of an original Tamil text "*ulladu narpadu*" of Sri Ramana Maharshi (44 verses)
4.7-9.	*विश्वमीमांसा *viśvamīmāṁsā*	These three (4.7-9) deal with several spiritual and metaphysical aspects of the principles of existence (679 verses)
4.10.	*धर्मानुशासनम् *dharmānuśāsanam*	Verses dealing with the Hindu religious injunctions (39 verses)

VOLUME 5

5. सूत्रग्रन्थमाला *sūtragranthamālā*
The Book of Aphorisms (Part One)

5.1.	महाविद्यासूत्रम् *mahāvidyāsūtram*	On the ten cosmic powers of the Divine Mother (705 aphorisms)
5.2.	राजयोगसारसूत्रम् *rājayogasārasūtram*	Essence of Rajayoga (103 aphorisms)

---

* Incomplete writings

5.3.	इन्द्रेश्वराभेदसूत्रम् *indreśvarā bhedasūtram*	Proclamation of the non-difference between Indra and Ishwara (37 aphorisms)
5.4.	चतुर्व्यूहसूत्रम् *caturvyūhasūtram*	Four main aspects of the Indra of the Rigveda (162 aphorisms)
5.5.	रुद्रकुटुम्बसूत्रम् *rudrakuṭumba sūtram*	Description of the family of Rudra (42 aphorisms)
5.6.	सृष्टिसूत्रम् *sṛṣṭisūtram*	On Creation (33 aphorisms)
5.7.	ईश्वरमीमांसा *īśvaramīmāṁsā*	Description of the true nature of Ishwara (65 aphorisms)
5.8.	क्रियाशक्तिमीमांसा *kriyāśaktimīmāṁsā*	On the Divine power of action (24 aphorisms)
5.9.	सिद्धान्तसारसूत्रम् *siddhāntasārasūtram*	The essence of decisive truth principle (42 aphorisms)
5.10.	मनीषासङ्ग्रहः *manīṣāsaṅgrahaḥ*	A manual of spiritual science (120 aphorisms)
5.11.	अथ शान्तितपोबोधानां फलनिरूपणम् *atha śāntitapo-bodhānāṁ phalanirūpaṇam*	Determining the fruits of peace, austerity and knowledge (9 aphorisms)

5.12.	गायत्रीव्याख्यानम् *gāyatrīvyākhyānam*	Explanation of the Gayatri Mantra of Rishi Vishwamitra (48 aphorisms)
5.13.	योगव्याख्यानम् *yogavyākhyānam*	On Yoga (48 aphorisms)
5.14.	सीताव्याख्यानम् *sītāvyākhyānam*	On Sita – the consort of Sri Rama (51 aphorisms)
5.15.	कृष्णव्याख्यानम् *kṛṣṇavyākhyānam*	On Sri Krishna (75 aphorisms)
5.16.	त त्त्वसामान्यमीमांसा *tattvasāmānya-mīmāṁsā*	A brief enquiry into the principles of existence (20 aphorisms)
5.17.	*तत्त्वमीमांसा *tattvamīmāṁsā*	The principles of existence (245 aphorisms)
5.18.	प्रमाणपरीक्षा *pramāṇaparīkṣā*	Explaining Pramana, a means to attain Prama or a certain Knowledge (50 aphorisms)
5.19.	समवायपरीक्षा *samavāyaparīkṣā*	Explaining Samavaya or the perpetual co-inherence that lies between a substance and its qualities (14 aphorisms)
5.20.	अभावपरीक्षा *abhāvaparīkṣā*	Explaining Abhava or non-existence, one of the six pramanas of the Vedanta philosophy (40 aphorisms)

5.21.	पञ्चजनचर्चा *pañcajanacarcā*	On untouchability (89 aphorisms)
5.22.	गोत्रप्रवरनिर्णयः *gotrapravara-* *nirṇayaḥ*	Determination of the family sub- divisions (200 aphorisms)
5.23.	विवाहधर्मसूत्रम् *vivāhadharmasūtram*	On Hindu laws and custom of marriage (151 aphorisms)
5.24.	शब्दप्रमाणचर्चा *śabdapramāṇacarcā*	An enquiry into the authority of Vedas (166 aphorisms)
5.25.	जैमिनीयतर्कवार्तिकम् *jaiminīyatarka-* *vārtikam*	A new interpretation of the aphorisms of Jaimini (348 aphorisms)
5.26.	पञ्चममीमांसा *pañcamamīmāṁsā*	On five kinds of people (130 aphorisms)
5.27.	दर्शनमाला *darśanamālā*	On Metaphysics (121 aphorisms)
5.28.	गणपतिदर्शनम् *gaṇapatidarśanam*	Spiritual thoughts of Ganapati Muni (95 aphorisms)
5.29.	*शक्तिदर्शनम् *śaktidarśanam*	On the dynamic aspect of the Divine (109 aphorisms)
5.30.	साम्राज्यनिबन्धनम् *sāmrājya* *nibandhanam*	A new constitution for India (560 aphorisms)

VOLUME 6

6. सूत्रग्रन्थमाला *sūtragranthamālā*
THE Book of Aphorisms (Part Two)

6.1-16.	*विश्वमीमांसा *viśvamīmāṁsā*	An encyclopedic work on all aspects of the Hindu religion (1640 aphorisms)
6.17.	तत्त्वानुशासनसूत्राणि *tattvānuśāsana-sūtrāṇi*	Instructions on the principles of existence (18 aphorisms)
6.18-26	*धर्मानुशासनम् *dharmānuśāsanam*	Instructions on Dharma (839 aphorisms)
6.27-28	*देवतामीमांसा *devatāmīmāṁsā*	On Vedic deties (162 aphorisms)
6.29.	*वासिष्ठदर्शनम् *vāsiṣṭhadarśanam*	Doctrine of Ganapati Muni (45 aphorisms)
6.30.	*सर्वार्थदर्शनम् *sarvārtha-darśanam*	On the doctrine of direct perception (77 aphorisms)
6.31.	*आदिशास्त्रार्थसूत्रम् *ādiśāstrātha-sūtram*	On the first hymn of the Rigveda (70 aphorisms)
6.32.	*वासिष्ठकामसूत्राणि *vāsiṣṭhakāma sūtrāṇi*	On sexual love as understood by Ganapati Muni (89 aphorisms)

6.33.	*महावार्तिकम् *mahāvārtikam*	On the authenticity of Vedic texts (94 aphorisms)

VOLUME 7

7. भाष्यग्रन्थमाला *bhāṣyagranthamālā* **Book of Commentaries**

7.1.	*मूलग्रन्थप्रशंसा *mūlagrantha-praśaṁsā*	A tribute to Rigveda
7.2.	*नूतनभाष्यकरणा-वसरकथनम् *nūtanabhāṣyakaraṇā-vasarakathanam*	Necessity for a fresh and new interpretation of the Rigveda
7.3-5.	*ऋग्वेदभाष्यम् *ṛgvedabhāṣyam*	Introduction to a commentary on the Rigveda
7.6.	*आदिवेदमीमांसा *ādivedamīmāṁsā*	On the Rigveda
7.7.	*ऋग्वेदविमर्शिनी *ṛgvedavimarśinī*	Rigveda – an introduction
7.8.	ऋग्वेदमन्त्रभाष्यम् *ṛgvedamantra-bhāṣyam*	Explanation of some of the hymns of the 1st, 2nd and 7th mandala of Rigveda

7.9.	*विश्वमीमांसा-प्रथमम् अक्षरप्रकरणम् *viśvamīmāṁsā-prathamamakṣara-prakaraṇam*	On word-meaning relationship
7.10.	*देवताकाण्डे द्वितीयं प्रकरणम् *devatākāṇḍe dvitīyaṁ prakaraṇam*	Second chapter on Vedic godheads
7.11.	*ऐन्द्रसहस्रनाम-भाष्यम् *aindrasahasra-nāmabhāṣyam*	Commentary on thousand names of Indra
7.12.	जैमिनीयसूत्रभाष्यम् *jaiminīyasūtra-bhāṣyam*	Commentary on the aphorisms of Jaimini
7.13.	ईशोपनिषद्भाष्यम् *īśopaniṣadbhāṣyam*	Commentary on Ishopanishad
7.14.	उपदेशसारभाष्यम् *upadeśasārabhāṣyam*	Commentary on Upadeshasara of Sri Ramana Maharshi
7.15.	गुरुमन्त्रभाष्यम् *gurumantrabhāṣyam*	Commentary on Gurumantra
7.16.	अग्नेः चतस्रो विभूतयः *agneḥ catasro vibhūtayaḥ*	Four emanations of Agni

7.17.	दैवरातदर्शनम् अन्वयभाष्यम् *daivarāta-darśanam anvayabhāṣyam*	A commentary on the doctrine of Daivarata, a disciple of Sri Ganapati Muni
7.18.	*मातृतत्त्वप्रकाशिका *mātṛtattva-prakāśikā*	A Sanskrit rendering of two chapters of Sri Aurobindo's *The Mother*
7.19.	*शारीरकमीमांसा टिप्पणी *śārīrakamīmāṁsā-ṭippaṇī*	A note on the *Brahmasutra-bhashya* of Adi Sankara
7.20.	*वैदिकशब्दानामर्थाः *vaidikaśabdānām arthāḥ*	Meanings of Vedic words

VOLUME 8

8. आयुर्वेदज्योतिषग्रन्थमाला
āyurvedajyotiṣagranthamālā
Book of Ayurveda and Astrology

8.1.	चिकित्सानुशासनम् *cikitsānuśāsanam*	Instructions on medical treatment (384 aphorisms)
8.2.	प्राणतोषणम् *prāṇatoṣaṇam*	A treatise on the maintenance of a healthy life (108 verses)

8.3.	होरानिर्णयसङ्ग्रहः *horānirṇaya-saṅgrahaḥ*	A treatise on Astrology (81 verses)
8.4.	षोडशश्लोकी *ṣoḍaśaślokī*	Merits and demerits of the planetary positions (16 verses)
8.5.	त्रिभावफलचन्द्रिका *tribhāvaphala-candrikā*	A work on Keraliya Astrology dealing with Ayu – life-span, Kalatra – wife, Putra – son (89 verses)
8.6.	गणककण्ठाभरणम् *gaṇakakaṇṭhā-bharaṇam*	On movements of the planets

VOLUME 9

9. *भारतचरित्रमीमांसा *bhāratacaritramīmāṁsā*
A Treatise on the Mahabharata

VOLUME 10

10. *पूर्णा *pūrṇā*
Purna – A Novel

VOLUME 11

11. प्रकीर्णकम् *prakīrṇakam*
Miscellaneous Writings

11.1.	गणपतिमुनेः पत्राणि *gaṇapatimuneḥ patrāṇi*	Letters of Ganapati Muni
11.2.	नवद्वीप-काव्यकण्ठः *navadvīpa-kāvya-kaṇṭhaḥ*	Ganapati Muni recieving 'Kavyakantha' title
11.3.	प्रास्ताविकपद्यानि *prāstāvikapadyāni*	Collection of stray verses
11.4.	सुकन्यादस्रसंवादः *sukanyādasra-saṁvādaḥ*	Dialogue between Sukanya and Ashwinideva from Mahabharata
11.5.	पाण्डवधार्तराष्ट्रसम्भवः *pāṇḍavadhārta-rāṣṭrasaṁbhavaḥ*	Extempore verses on the origin of the Pandavas and Kauravas
11.6.	*भृगुवंश इतिहासः *bhṛguvaṁśa itihāsaḥ*	History of Bhrigu lineage
11.7.	लालिभाषोपदेशः *lalibhāṣopadeśaḥ*	A proposed new language

11.8. इतरग्रन्थाः *itaragranthāḥ* Other texts

VOLUME 12

12. अनुक्रमणी *anukramaṇī*
Index

"Vasishtha Ganapati Muni (1878-1936) was a luminary of the first magnitude on the spiritual firmament of modern India. He was a versatile genius whose contribution in the many fields to which he turned his attention are yet to be fully assessed." **Sri M.P. Pandit,** ***Adoration of the Divine Mother.***

"Kavyakantha Ganapati Sastri, . . . played much the same role in the life and reputation of Bhagavan Sri Ramana Maharshi as Swami Vivekananda did in that of Sri Ramakrishna Paramahamsa. Sri Vasishtha Muni was a mighty spiritual personality in his own right,... he recognized the uniqueness of Bhagavan's teaching, accepted him as his *guru* and proclaimed him as the Maharshi to the whole world. Those who want to understand the message of the Maharshi in its pristine purity have to study the Muni's redaction of the Master's teachings ..." **Sri S. Shankaranarayanan,** ***Bhavan's Journal.***

॥ वासिष्ठकाव्यकण्ठगणपतिमुनेः ग्रन्थमाला ॥

Collected Works of Vasishtha Kavyakantha Ganapati Muni

VOLUME 1	स्तोत्रग्रन्थमाला *stotragranthamālā* The Book of Adoration (Part One)
VOLUME 2	स्तोत्रग्रन्थमाला *stotragranthamālā* The Book of Adoration (Part Two)
VOLUME 3	**स्तोत्रग्रन्थमाला *stotragranthamālā*** **The Book of Adoration (Part Three)**
VOLUME 4	तत्त्वग्रन्थमाला *tattvagranthamālā* A Book on the Principles of Existence
VOLUME 5	सूत्रग्रन्थमाला *sūtragranthamālā* The Book of Aphorisms (Part One)
VOLUME 6	सूत्रग्रन्थमाला *sūtragranthamālā* The Book of Aphorisms (Part Two)
VOLUME 7	भाष्यग्रन्थमाला *bhāsyagranthamālā* The Book of Commentaries
VOLUME 8	आयुर्वेदज्योतिषग्रन्थमाला *āyurvedajyotiṣagranthamālā* The Book of Ayurveda and Astrology
VOLUME 9	भारतचरित्रमीमांसा *bhāratacaritramīmāmsā* A Treatise on the Mahabharata
VOLUME 10	पूर्णा *pūrṇā* Purna - A Novel
VOLUME 11	प्रकीर्णकम् *prakīrnakam* Miscellaneous Writings
VOLUME 12	अनुक्रमणी *anukramaṇī* Index